रूपेश
सम्पूर्ण
407
पूजन एवं यज्ञविधिः

सम्पूर्ण पूजन एवं यज्ञविधिः

लेखक
एवं सम्पादक
आचार्य रामसेवक पाण्डेय (प्राध्यापक)
अन्नपूर्णा ऋषिकूल ब्रह्मचर्य आश्रम
संस्कृत महाविद्यालय, शिवपुर, वाराणसी

रुपेश ठाकुर प्रसाद प्रकाशन
कचौड़ीगली, वाराणसी-221001
फोन : 0542-2392543, 2392471
सन् 2017 ई०]

Written By -

"Acharya Shri Ramsevak Pandey Ji maharaj"

Shri Annapurna Sanskrit Degree College
Shivpur, Varanasi

DEVELOPER -

Vashu Pandit...

Banarash Hindu University
"Department Of Sahitya"

विषयानुक्रमणिका

संध्या न करने से दोष

जिसने संध्या का ज्ञान नहीं किया, जिसने संध्या की उपासना नहीं की वह (द्विज) जीवित रहे, शूद्र-सम रहता है और मृत्यु के बाद कुत्ते आदि की योनि को प्राप्त करता है—

संध्या येन न विज्ञाता संध्या येनानुपासिता।
जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजायते।।

(दे.भाग. ११-१६-७)

ब्राह्मण, क्षत्रिय, वैश्य आदि संध्या नहीं करें, तो वो अपवित्र है और उन्हें किसी पुण्यकर्म के करने का फल प्राप्त नहीं होता।

संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत् कुरूते कर्म न तस्य फलभाग्भवेत्।।

(दक्ष स्मृ. २-२७)

सूर्य और तारों से रहित दिन-रात की संधि को तत्वदर्शी मुनियों ने संध्याकाल माना है-

अहोरात्रस्य या संधिः सूर्यनक्षत्रवर्जिता।
सा तु संध्या समाख्याता मुनिभिस तत्वदर्शिभिः।।

(आचारभूषण ८९)

संध्यास्तुति

ब्राह्मणरूपी वृक्ष का मूल संध्या है, चारों वेद, चार शाखाएँ हैं, धर्म और कर्म पत्ते हैं। अतः मूल की रक्षा यत्न से करनी चाहिये। मूल के छिन्न हो जाने पर वृक्ष और शाखा कुछ भी नहीं रह सकते—

विप्रो वृक्षो मूलकान्यत संध्या
वेदाः शाखा धर्मकर्माणि पत्रम्।

तस्मान्मूलं यत्नतो रक्षणीयं
छिन्ने मूले नैव वृक्षो न शाखा।।

(देवीभाग. ११-१६-६)

समय पर की गयी संध्या इच्छानुसार फल देती है, और बिना समय की की गयी संध्या वन्ध्या स्त्री के समान होती है—

स्वकाले सेविता संध्या नित्यं कामदुघा भवेत्।
अकाले सेविता सा च संध्या वन्ध्या वधूरिव।।

(मित्रकल्प)

प्रातःकाल में तारों के रहते हुए, मध्याह्नकाल में जब सूर्य आकाश के मध्य में हों, सायंकाल में सूर्यास्त के पहले ही इस तरह तीन प्रकार की संध्या करनी चाहिये—

प्रातः संध्या सनक्षत्रां मध्याह्ने मध्यभास्कराम्।।
ससूर्या पश्चिमां संध्यां तिस्रः संध्या उपासते।

(दे.भा. ११/१६/२-३)

सायंकाल में पश्चिम की तरफ मुँह करके जब तक तारों का उदय न हो और प्रातःकाल में पूर्व की ओर मुख करके जब तक सूर्य का दर्शन न हो, तबतक जप करता रहे—

जपन्नासीत सावित्रीम्प्रत्यगातार कोदयात्।
संध्या प्राक् प्रातरेवं हि तिष्ठदासूर्यदर्शनात्।

(पा.स्मृ. २।२४-२५)

गृहस्थ तथा ब्रह्मचारी गायत्री के आदि में 'ॐ' जप करें, और अन्त में 'ॐ' का उच्चारण न करें, क्योंकि ऐसा करने से सिद्धि नहीं होती है।

गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत्।
अन्ते यः प्रणवं कुर्यान्नासौ सिद्धिम वाप्नुयात्।।

(याज्ञवल्क्य स्मृ. आचाराध्याय २४।२५ बालम्भट्टी)

जपके आदि में चौसठ कलायुक्त विद्याओं तथा सम्पूर्ण ऐश्वर्यो का सिद्धिदायक 'गायत्री-हृदय' का तथा अन्त में 'गायत्री-कवच' का पाठ करें। (यह नित्य-संध्या में आवश्यक नहीं है, करे तो अच्छा है।)

चतुष्षष्टिकला विद्या सकलैश्वर्यसिद्धिदा।
जपारम्भे च हृदयं जपान्ते कवचं पठेत्।।

घर में संध्या-वन्दन करने से एक, गो-स्थान में सौ, नदी किनारे लाख तथा शिव के समीप में अनन्त गुना फल होता है—

गृहेषु तत्समा संध्या गोष्ठे शतगुणा स्मृता।
नद्यां शतगुणा प्रोक्ता अनन्ता शिवसंनिधौ।।

(लघुशातातप स्मृ. ११४)

पैर धोने से, पीने से और संध्या करने से बचा हुआ जल श्वान के मूत्र के समान हो जाता है, उसे पीने पर चान्द्रायण-व्रत करने से मनुष्य पवित्र होता है। इसलिए बचे हुए जल को फेंक दें—

पादशेषं पीतशेषं संध्याशेषं तथैव च
शुनो मूत्र समं तोयं पित्वा चान्द्रायणं चरेत्।।

●

शताक्षर गायत्री मंत्र–

सौ अक्षरों की गायत्री का जाप करने के बाद गायत्री मन्त्र का जाप करना चाहिये—

ॐ भूर्भुव स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

ॐ त्र्यम्बकं य्यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय माऽमृतात्।।

ॐ जातवेदसे सुनवामसोममरातीयतो निर्दहातिवेदः। सनः पर्षदति दुर्गाणि विश्वा नावेवसिन्धुं दुरितात्यग्निः।।

●

अथ सन्ध्योपासनविधिः

पवित्रीकरणम्

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

त्रिराचमनम्

अन्तर्जानुहस्तः संहताङ्गुलिना शुद्धजलं गृहीत्वा मुक्ताङ्गुष्ठकनिष्ठेन वामेनान्वारब्धपाणिना ब्रह्मतीर्थेन त्रिरपः पिबेत्—

ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ गोविन्दाय नमः। हस्तौ प्रक्षाल्य॥

आसनशुद्धिः

पृथ्वीतिमन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः—

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

पवित्रीधारणम्

ॐ पवित्रेस्थोव्वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्।

भस्मतिलकधारणम्

त्र्यायुषमित्यस्य नारायण ऋषिः रुद्रो देवता उष्णिक्छन्दः भस्मधारणे विनियोगः—

ॐ त्र्यायुषञ्जमदग्नेः ललाटे। कश्यपस्य त्र्यायुषम् ग्रीवायाम्।

यद्देवेषु त्र्यायुषम् बाह्वोः। तन्नोऽअस्तु त्र्यायुषम् हृदये।

स्वस्ति-तिलक धारणम्

ॐ स्वस्ति नऽइन्द्रोव्वृद्धश्रवाः स्वस्ति नः पूषाव्विश्ववेदाः।
स्वस्ति नस्ताक्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

शिखाबन्धनम्

मानस्तोक इति मन्त्रस्य कुत्स ऋषिः जगती छन्दः एको रुद्रो देवता शिखाबन्धने विनियोगः।

ॐ मानस्तोकेतनये मानऽआयुषि मानोगोषु मानोऽअश्वेषुरीरिषः।
मानोव्वीरान्नुदद्रभामिनोव्वधी र्हविष्मन्तः सदमित्वा हवामहे।।

चिद्रूपिणी महामाये दिव्यतेजः समन्विते।
तिष्ठ देवि शिखाबन्धे तेजोवृद्धिं कुरुष्व मे।।

संकल्पः

ॐ शुभे शोभनेमुहुर्ते अद्य ब्रह्मणो द्वितीयपरार्धे श्रीश्वेत-वाराहकल्पे जम्बूद्वीपे भरतखण्डे आर्यावर्तैकदेशान्तर्गते पुण्यक्षेत्रे कलियुगे कलिप्रथमचरणे......सम्वत्सरे....... मासे.....पक्षे......तिथौ.......वासरे....नक्षत्रे.......योगे.... ममोपात्तदुरितक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मवर्चस्वाप्तये प्रातः/ मध्याह्न/ सायं/ संध्योपासनं करिष्ये।

अघमर्षणाचनम्

ॐ ऋतं चेति त्र्यृचस्य माधुच्छन्दसोऽघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तं दैवतमपामुपस्पर्शने विनियोगः॥

ॐ ऋतं च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः॥
समुद्रादर्णवादधिसंवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः।।

प्राणायामः

ॐ कारस्यब्रह्मऋषिर्दैवीगायत्रीछन्दःपरमात्मादेवता सप्तव्याहृतीनां प्रजापति ऋर्षिगार्यत्र्युष्णिगनुष्टुब्बृहती पंक्तित्रिष्टुब्जगत्यश्छन्दांस्यग्नि वायु सूर्य बृहस्पतिर्वरुणेन्द्रविश्वेदेवादेवताः, तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता आपोज्योतिरिति शिरसः प्रजापति-ऋर्षिर्यजुश्छन्दो ब्रह्माग्निवायुसूर्या देवताः प्राणायामे विनियोगः—

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।।

प्रातराचमनम्

सूर्यश्च मेति नारायण ऋषिः प्रकृतिश्छन्दः सूर्यमन्युमन्युपतयो रात्रिश्च देवता अपामुपस्पर्शने विनियोगः—

ॐ सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्योरक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु। यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा।।

मध्याह्नाचमनम्

आपः पुनन्त्विति मंत्रस्य नारायण ऋषि अनुष्टुप् छन्दः आपः पृथिवी, ब्रह्मणस्पतिर्ब्रह्म च देवता अपामुपस्पर्शने विनियोगः।

ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्।
पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्।
यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसतां च प्रति ग्रहँ स्वाहा।।

सायमाचमनम्

अग्निश्चमेति नारायण ऋषिः प्रकृतिश्छन्दोग्निमन्युम न्युपतयोऽहश्च देवता अपामुपस्पर्शने विनियोगः।

ॐ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापभ्यो रक्षन्ताम्। यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु। यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा।।

मार्जनम्

आपो हिष्ठेति त्र्यृचस्य सिन्धुद्वीप ऋषिर्गायत्री छन्दः आपोदेवता मार्जने विनियोगः।

ॐ आपो हिष्ठा मयो भुवः। ॐ ता न ऊर्जे दधातन।
ॐ महे रणाय चक्षसे। ॐ यो वः शिवतमो रसः।
ॐ तस्य भाजयतेह नः। ॐ उशतीरिव मातर।
ॐ तस्मा अरङ्गमाम वः। ॐ यस्य क्षयाय जिन्वथ।
ॐ आपो जनयथा च नः।

अभिमन्त्रणम्

द्रुपदादिवेत्यश्विसरस्वतीन्द्रा ऋषयोऽनुष्टुप्छन्द आपो देवताः शिरस्सेके विनियोगः।

ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।
पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः।।

अघमर्षणम्

ऋतञ्चेतित्र्यृचस्यमाधुश्छन्दसोऽघमर्षण ऋषिः अनुष्टुप्छन्दोभाववृतं दैवतमघमर्षणे विनियोगः।

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः।।

समुद्रादर्णवादधिसंवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।।
सुर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः।।

आचमनम्

अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप्छन्दः आपो देवता अपामुपस्पर्शने विनियोगः।

ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम्।।

सूर्याघ्यर्म्

ॐकारस्य ब्रह्म ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता, तिसृणां महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवायुसूर्या देवताः तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता सूर्याघ्यर्दाने विनियोगः।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

सूर्योपस्थानम्

उद्वयमिति प्रस्कण्व ऋषिः अनुष्टुप्छन्दः सूर्यो देवता उदुत्यमिति प्रस्कण्व ऋषिः निचृद्गायत्री छन्दः सूर्यो देवता चित्रमिति कुत्साङ्गिरस ऋषिः त्रिष्टुप्छन्दः सूर्यो देवता तच्चक्षुरिति दध्यङाथर्वण ऋषिः एकाधिका ब्राह्मी त्रिष्टुप्छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः।

ॐ उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।।

ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।।

ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्राद्यावापृथिवी अन्तरिक्षꣳसूर्यऽआत्माजगतस्तस्थुषश्च॥

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शत ꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥

न्यासः

प्रतिमन्त्रं दक्षिणेन पाणिना वामकरस्थिततोयैरभिषिञ्चेत्।

ॐ भूः पुनातु-शिरशि। ॐ भुवः पुनातु - नेत्रयोः।
ॐ स्वः पुनातु - कण्ठे। ॐ महः पुनातु - हृदये।
ॐ जनः पुनातु - नाभ्याम्। ॐ तपः पुनातु-पादयोः।
ॐ सत्यं पुनातु - पुनः शिरसि।

गायत्र्यावाहनम्

ॐ तेजोऽसीति धामनामासि च परमेष्ठी प्रजापति ऋर्षिर्यजुस्त्रिष्टुबृगुष्णिहौ छन्दसा सविता देवता गायत्र्यावाहने विनियोगः।

ॐ तेजोऽसि शुक्रमस्यमृतमसि। धामनामासि प्रियं देवनामनाधृष्टं देवयजनमसि॥

गायत्रीध्यानम्

ॐ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा।
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता॥
आदित्यमण्डलस्था च ब्रह्मलोकगताऽथवा।
अक्षसूत्रधरा देवी पद्मासनगता शुभा॥

गायत्र्युपस्थानम्

गायत्र्यसीति विवस्वान् ऋषिः स्वराण्महापंक्तिश्छन्दः परमात्मादेवता गायत्र्युपस्थाने विनियोगः।

ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदशि न हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदो मा प्रापत।

गायत्रीजपः

ॐ कारस्य ब्रह्म ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता, तिसृणां महाव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्नि-वायुसूर्या देवता, तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता जपे विनियोगः।

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥

जपस्य पूर्व मुद्रा

सुमुखं सम्पुटं चैव विततं विस्तृतं तथा।
द्विमुखं त्रिमुखं चैव चतुष्पंचमुखं तथा॥
षण्मुखाऽधोमुखं चैव व्यापकाञ्जलिकं तथा।
शकटं यमपाशं च ग्रथितं चोन्मुखोन्मुखम्॥
प्रलम्बं मुष्टिकं चैव मत्स्यः कूर्मो वराहकम्।
सिंहाक्रान्तं महाक्रान्तं मुद्गरं पल्लवं तथा।
एता मुद्राश्चतुर्विंशज्जपादौ परिकीर्तिताः॥

सुमुखम्

सम्पुटम्

३. विततम्

४. विस्तृतम्

५. द्विमुखम्

६. त्रिमुखम्

७. चतुर्मुखम्

८. पंचमुखम्

९. षण्मुखम्

१०. अधोमुखम्

११. व्यापकाञ्जलिकम्

१२. शकटम्

१३. यमपाशम्

१४. ग्रथितम्
१५. उन्मुखोन्मुखम्
१६. प्रलम्बम्
१७. मुष्टिकम्
१८. मत्स्य
१९. कूर्म
२०. वराहकम्
२१. सिंहक्रान्तम्
२२. महाक्रान्तम्
२३. मुद्गरम्
२४. पल्लवम्

प्रार्थना–

ॐ अहो देवि महादेवि संध्ये विद्ये सरस्वति।
अजरे अमरे चैव ब्रह्मयोनिर्नमोऽस्तु ते।।
ॐ देवि गायत्रि त्वं ब्रह्मशापाद्विमुक्ता भव।
वसिष्ठ शापाद्विमुक्ता भव।
विश्वामित्र शापाद्विमुक्ता भव।
शुक्रशापाद्विमुक्ता भव।

माला प्रार्थना

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणी।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव।।
ॐ अविघ्नं कुरू माले त्वं गृहामि दक्षिणे करे।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये।।

ॐ अक्षमालाधिपतये सुसिद्धि देहि देहि सर्वमन्त्रार्थसाधिनि साधय साधय सर्वसिद्धिं परिकल्पय मे स्वाहा।

ॐगुह्याति गुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि।।

जप के बाद की आठ मुद्राएँ

सुरभिर्ज्ञानवैराग्ये योनिः शंखोऽथ पङ्कजम्।
लिङ्गं निर्वाणमुद्रां च जपान्तेऽष्टौ प्रदर्शयेत्।।

नोट : गायत्री जप करने से पूर्व सौ अक्षर की गायत्री करने के पश्चात् ही जप करें।

मंत्र—**त्र्यम्बकं यजामहे०, जातवेदसो सुनवाम०,**
भूर्भुवः स्वः तत्सवितुवरेण्यम्०।

१. सुरभि

२. ज्ञानम्

३. वैराग्यम्

४. योनिः

५. शंख

६. पङ्कजम्

७. लिङ्गम्

८. निर्वाणम्

सूर्यप्रदक्षिणा

विश्वतश्चक्षुरिति भौवन ऋषिः त्रिष्टुप्छन्दो विश्वकर्मा देवता सूर्यप्रदक्षिणायां विनियोगः।

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात्। सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमि जनयन् देव एकः॥

जपसमर्पणम्

ॐ देवा गातुविद इति मनसस्पतिऋषिर्विराडनुष्टुप्छन्दः वातो देवता जपनिवेदने विनियोगः।

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित।
मनसस्पत इमं देव यज्ञꣳस्वाहा व्वाते धाः॥

अनेन यथाशक्तिकृतेन गायत्रीजपाख्येन कर्मणा भगवान् सूर्यनारायणः प्रीयताम्

विसर्जनम्

उत्तमे शिखरे इति वामदेव ऋषिः अनुष्टुप्छन्दः गायत्री देवता गायत्रीविसर्जने विनियोगः।

ॐ उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि।
ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्॥

अनेन संध्योपासनाख्येन कर्मणाश्रीपरमेश्वरः प्रीयताम्। ॐ तत्सद् ब्रह्मार्पणमस्तु।

गायत्री-कवचम्

अस्य श्रीगायत्रीकवचस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो गायत्री देवता ॐ भूः बीजम् भुवः शक्तिः स्वः कीलकम् गायत्रीप्रीत्यर्थे जपे विनियोगः।

ॐ पञ्चवक्त्रां दशभुजां सूर्यकोटिसमप्रभाम्।
सावित्रीं ब्रह्मवरदां चन्द्रकोटिसुशीतलाम्।

त्रिनेत्रां सितवक्त्रां च मुक्ताहारविराजिताम्।
वराभयां कुशकशा हेमपात्राक्षमालिकाम्।।
शङ्खचक्राब्जयुगलं कराभ्यां दधतीं वराम्।
सितपंकजसंस्थं च हंसारूढां सुखस्मिताम्।
ध्यात्वैवं मानसाम्भोजे गायत्री कवचं जपेत्।।

ॐ ब्रह्मोवाच

विश्वामित्र महाप्राज्ञ गायत्रीकवचं शृणु।
यस्य विज्ञानमात्रेण त्रैलोक्यं वशयेत् क्षणात्।।१।।
सावित्री मे शिरः पातु शिखायाममृतेश्वरी।
ललाटं ब्रह्मदैवत्या भ्रुवौ मे पातु वैष्णवी।।२।।
कर्णौ मे पातु रुद्राणी सूर्या सावित्रिकाऽम्बिके।
गायत्री वदनं पातु शारदा दशनच्छदौ।।३।।
द्विजान् यज्ञप्रिया पातु रसनायां सरस्वती।
सांख्यायनी नासिकं मे कपोलौ चन्द्रहासिनी।।४।।
चिबुकं वेदगर्भा च कण्ठं पात्वघनाशिनी।
स्तनौ मे पातु इन्द्राणी हृदयं ब्रह्मवादिनी।।५।।
उदरं विश्वभोक्त्री च नाभौ पातु सुरप्रिया।
जघनं नारसिंही च पृष्ठं ब्रह्माण्डधारिणी।।६।।
पार्श्वौ मे पातु पद्माक्षी गुह्यं गोगोप्त्रिकाऽवतु।
ऊर्वोरोंकाररूपा च जान्वोः सन्ध्यात्मिकाऽवतु।।७।।
जङ्घयो पातु अक्षोभ्या गुल्फयोर्ब्रह्मशीर्षका।
सूर्या पदद्वयं पातु चन्द्रा पादांगुलीषु च।।८।।
सर्वाङ्गं वेदजननी पातु मे सर्वदाऽनघा।
इत्येतत् कवचं ब्रह्मन् गायत्र्याः सर्वपावनम्।
पुण्यं पवित्रं पापघ्नं सर्वरोगनिवारणम्।।९।।

त्रिसन्ध्यं यः पठेद्विद्वान् सर्वान् कामानवाप्नुयात्।
सर्वशास्त्रार्थतत्वज्ञः स भवेद्वेदवित्तमः ।।१०।।
सर्वयज्ञफलं प्राप्य ब्रह्मान्ते समवाप्नुयात्।
प्राप्नोति जपमात्रेण पुरुषार्थंश्चतुर्विधान्।।११।।

।। इति सन्ध्योपासन विधिः।।

भगवतीस्तुतिः

प्रातः स्मरामि शरदिन्दुकरोज्ज्वलाभां
सद्रत्नवन्मकरकुण्डलहारभूषाम।
दिव्यायुधोर्जितसुनीलसहस्रहस्तां
रक्तोत्पलाभचरणां भवतीं परेशाम्।।
प्रातर्नमामि महिषासुरसुरचण्डमुण्ड-
शुम्भासुरप्रमुखदैत्यविनाशदक्षाम्।
ब्रह्मेन्द्ररुद्रमुनिमोहनशीललीलां
चण्डीं समस्तसुरमूर्तिमनेकरूपाम्।।
प्रातर्भजामि भजतामभिलाषदात्रीं
धात्रीं समस्तजगतां दुरितापहन्त्रीम्।
संसारबन्धनविमोचनहेतुभूतां
मायां परां समधिगम्य परस्य विष्णोः।।
तव च का किल न स्तुतिरम्बिके!
सकलशब्दमयी किल ते तनुः।
निखिलमूर्तिषु मे भवदन्वयो
मनसिजासु बहिःप्रसरासु च।।
इति विचिन्त्य शिवे! शमिताशिवे!
जगति जातमयत्नवशादिदम्।
स्तुतिजपार्चनचिन्तवर्जिता
न खलु काचन कालकलास्ति मे।।

तर्पण-विधिः

(देवर्षिमनुष्यपितृतर्पण-विधि)

प्रातःकाल ब्राह्मीवेला के पूर्व उठकर शौचादि से निवृत्त हो स्नान करके शुद्ध श्वेत वस्त्र धारण कर पूर्वाभिमुख हो कुशासन पर बैठे। फिर तीन बार आचमन करके संध्योपासना एवं नित्यमोह करने के पश्चात् बायें और दायें हाथ की अनामिका अंगुलि में **'पवित्रे स्थो वैष्णव्यौ०'**–इस मन्त्र को सम्पूर्णरूप से पढ़ते हुए पवित्री धारण करे। फिर हाथ में त्रिकुश, यव, अक्षत और जल लेकर निम्नलिखित संकल्प पढ़े—

ॐ विष्णवे नमः ३। हरिः ॐ तत्सदद्यैतस्य श्रीब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे कलियुगे कलिप्रथमचरणे अमुकसंवत्सरे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकगोत्रोत्पन्नः अमुकशर्मा (वर्मा, गुप्तः) अहं परमेश्वरप्रीत्यर्थं देवर्षिमनुष्यपितृतर्पणं करिष्ये।

देवताओं का आवाहन—

ॐ विश्वेदेवास ऽआगत शृणुता म इमँ्हवम्। एदं बर्हिर्निषीदत।।

ॐ विश्वेदेवाः शृणुतेमँ्हवं मे ये अन्तरिक्षे य उप द्यविष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्।।

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः।
ये तर्पणेऽत्र विहिताः सावधाना भवन्तु ते।।

देवतर्पण

पूर्वाभिमुख होकर चावल मिश्रित जल द्वारा कुशाग्र भाग से देवतीर्थ से ब्रह्मादि देवताओं को एक-एक अञ्जलि जल देवे—

ॐ ब्रह्मा तृप्यताम्। ॐ विष्णुस्तृप्यताम्। ॐ रुद्रस्तृप्यताम्। ॐ प्रजापतिस्तृप्यताम्। ॐ देवास्तृप्यन्ताम्। ॐछन्दांसि तृप्यन्ताम्। ॐ वेदास्तृप्यन्ताम्। ॐ ऋषयस्तृप्यन्ताम्। ॐ पुराणाचार्यास्तृप्यन्ताम्। ॐ गन्धर्वास्तृप्यन्ताम्। ॐ इतराचार्यास्तृप्यन्ताम्। ॐ संवत्सरः

नोटः नित्य के तर्पण में जौ, तिल, चावल का प्रयोग निषेध है।

सावयवस्तृप्यन्ताम्। ॐ देव्यस्तृप्यन्ताम्। ॐ अप्सरसस्तृप्यन्ताम्। ॐ देवानुगास्तृप्यन्ताम्। ॐ नागास्तृप्यन्ताम्। ॐ सागरास्तृप्यन्ताम्। ॐ पर्वतास्तृप्यन्ताम्। ॐ सरितस्तृप्यन्ताम्। ॐ मनुष्यास्तृप्यन्ताम्। ॐ यक्षास्तृप्यन्ताम्। ॐ रक्षांसि तृप्यन्ताम्। ॐ पिशाचास्तृप्यन्ताम्। ॐ सुपर्णास्तृप्यन्ताम्। ॐ भूतानि तृप्यन्ताम्। ॐ पशवस्तृप्यन्ताम्। ॐ वनस्पतयस्तृप्यन्ताम्। ॐ ओषधयस्तृप्यन्ताम्।

ॐ भूतग्रामश्चतुर्विधस्तृप्यन्ताम्।

ऋषितर्पण

इसी प्रकार निम्नांकित मन्त्र वाक्यों से मरीचि आदि ऋषियों को भी एक-एक अञ्जलि जल दें।

ॐ मरीचिस्तृप्यताम्। ॐ अत्रिस्तृप्यताम्। ॐ अङ्गिरा-स्तृप्यताम्। ॐ पुलस्त्यस्तृप्यताम्। ॐ पुलहस्तृप्यताम्। ॐ क्रतुस्तृप्यताम्। ॐ वसिष्ठस्तृप्यताम्। ॐ प्रचेतास्तृप्यताम्। ॐ भृगुस्तृप्यताम्। ॐ नारदस्तृप्यताम्।

दिव्यमनुष्यतर्पण

जनेऊ को माला की तरह गले में धारण कर उत्तराभिमुख होकर जौ मिश्रित जल द्वारा कुशा का मध्य भाग कनिष्ठिका के मूलभाग में उत्तराग्र रखकर प्राजापत्य तीर्थ से दिव्य मनुष्यों को दो-दो अञ्जलि जल दें।

ॐ सनकस्तृप्यताम्।।२
ॐ सनन्दनस्तृप्यताम्।।२
ॐ सनातनस्तृप्यताम्।।२
ॐ कपिलस्तृप्यताम्।।२
ॐ आसुरि-स्तृप्यताम्।।२
ॐ वोढुस्तृप्यताम्।।२
ॐ पञ्चशिखस्तृप्यताम्।।२

दिव्यपितृतर्पण

दक्षिणाभिमुख हो बायें घुटने को पृथ्वी पर रखकर अपसव्य भाव से (जनेऊ को दाहिने कंधे पर रखकर) तिल सहित जल द्वारा कुशा के मूल

भाग को दक्षिणाग्र रखकर पितृतीर्थ (अँगूठा और तर्जनी के मध्यभाग से) दिव्य पितरों को तीन-तीन अञ्जलि जल दें।

ॐ कव्यवाडनलस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३
ॐ सोमस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३
ॐ यमस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३
ॐ अर्यमा तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३
ॐ अग्निष्वात्ता पितरस्तृप्यन्ताम् इदं सतिलं जलं (गङ्गाजलं) तेभ्यः स्वधा नमः।।३
ॐ सोमपाः पितरस्तृप्यन्ताम् इदं सतिलं जलं (गङ्गाजलं) तेभ्यः स्वधा नमः।।३
ॐ बर्हिषदः पितरस्तृप्यन्ताम् इदं सतिलं जलं (गङ्गाजलं) तेभ्यः स्वधा नमः।।३

यमतर्पण

इसी प्रकार निम्नलिखित मन्त्र-वाक्यों को पढ़ते हुए दक्षिणाभिमुख होकर चौदह यमों के लिये भी पितृतीर्थ से ही तीन-तीन अञ्जलि तिलसहित जल दें।

ॐ यमाय नमः।।३ — ॐ धर्मराजाय नमः।।३
ॐ मृत्यवे नमः।।३ — ॐ अन्तकाय नमः।।३
ॐ वैवस्वताय नमः।।३ — ॐ कालाय नमः।।३
ॐ सर्वभूतक्षयाय नमः।।३ — ॐ औदुम्बराय नमः।।३
ॐ दध्नाय नमः।।३ — ॐ नीलाय नमः।।३
ॐ परमेष्ठिने नमः।।३ — ॐ वृकोदराय नमः।।३
ॐ चित्राय नमः।।३ — ॐ चित्रगुप्ताय नमः।।३

मनुष्यपितृतर्पण

इसके पश्चात् पितरों का आवाहन निम्नांकित मन्त्र से करें।

**ॐ उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे।।**

(यजु० १९।७०)

**आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्।।**

(यजु० १९।५८)

तदनन्तर अपने पितृगणों का नाम-गोत्र आदि उच्चारण करते हुए प्रत्येक के लिये पूर्वोक्त विधि से ही तीन-तीन अञ्जलि तिलसहित जल दे।

अमुकगोत्रः अस्मत्पिता (बाप) अमुकशर्मावसुरूपस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३।।

अमुक गोत्रः अस्मत्पितामहः (दादा) अमुकशर्मा रुद्ररूपस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३।।

अमुक गोत्रः अस्मत्प्रपितामहः (परदादा) अमुकशर्मा आदित्यरूपस्तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३।।

अमुकगोत्रा अस्मन्माता (माता) अमुकी देवी दा वसूरूपा तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३।।

अमुकगोत्रा अस्मत्पितामही (दादी) अमुकी देवी दा रुद्ररूपा तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्यै स्वधा नमः।।३।।

अमुकगोत्रा अस्मत्प्रपितामही (परदादी) अमुकी देवी दा आदित्यरूपा तृप्यताम् इदं सतिलं जलं (गङ्गाजलं वा) तस्यै स्वधा नमः।।३।।

अमुकगोत्रा अस्मत्सापत्नमाता (सौतेली माँ) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः।।३।।

इसके बाद निम्नांकित नौ मन्त्रों को पढ़ते हुए दक्षिणामुख होकर पितृतीर्थ से जल गिराते रहे।

ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः। असुँ य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु।।

(यजु० १९।४९)

ॐ अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः। तेषां वय ँ् सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम।।

(यजु० १९।५०)

आ यन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः।
अस्मिन् यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्॥
(यजु० १९।५८)

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्। स्वधा स्थ तर्पयत मे पितॄन्॥ (यजु० २।३४)

पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः। अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम्॥ (यजु० १९।३६)

ये चेह पितरो ये च नेह याँश्च विद्म याँ२ उ च न प्रविद्म।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ ँ सुकृतं जुषस्व॥
(यजु० १९।६७)

ॐ मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ (यजु० १३।२७)

मधु नक्तमुतोषसो मधुमत्पार्थिव ँ रजः। मधु द्यौरस्तु नः पिता॥ (यजु० १३।२)

मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥ (यजु० १३।२९) ॐ मधु। मधु। मधु। तृप्यध्वम्। तृप्यध्वम्। तृप्यध्वम्।

फिर नीचे लिखे मन्त्र का पाठ करे—

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै। नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो वास आधत्त॥ (यजु० २।३२)

द्वितीय गोत्रतर्पण

इसके बाद द्वितीय गोत्र मातामह (नाना-नानी) आदि का दक्षिणामुख होकर पितृतीर्थ से तिलमिश्रित जल द्वारा तीन-तीन अञ्जलियाँ जल दें। यथा—

अमुकगोत्रः अस्मन्मातामहः (नाना) अऽमुकशर्मा वसुरूपस्तृप्याम् इदं सतिलं जलं (गङ्गाजलं वा) तस्मै स्वधा नमः।।३

अमुकगोत्रः अस्मत्प्रमातामहः (परनाना) अमुकशर्मा रुद्ररूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः।।३

अमुकगोत्रः अस्मद्वृद्धप्रमातामह (बूढ़े परनाना) अमुकशर्मा आदित्यरूपस्तृप्याम् इदं सतिलं जलं तस्मै स्वधा नमः।।३

अमुकगोत्रा अस्मन्मातामही (नानी) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः।।३

अमुकगोत्रा अस्मत्प्रमातामही (परनानी) अमुकी देवी दा रुद्ररूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः।।३

अमुकगोत्रा अस्मद्वृद्धप्रमातामही (बूढ़ी परनानी) अमुकी देवी दा आदित्यरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः।।३

पत्न्यादितर्पण

यहाँ भी पूर्वोक्त की भाँति निम्नलिखित वाक्यों को पढ़ते हुए दक्षिणा मुख होकर जल दें।

अमुकगोत्रा अस्मत्पत्नी (भार्या) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः।।१

अमुकगोत्रः अस्मत्सुतः (बेटा) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः।।३

अमुकगोत्रा अस्मत्कन्या (बेटी) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः।।१

अमुकगोत्रः अस्मत्पितृव्य (पिता के भाई) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः।।३

अमुकगोत्रः अस्मन्मातुलः (मामा) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रः अस्मद्भ्राता (अपना भाई) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रः अस्मत्सापत्नभ्राता (सौतेला भाई) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रा अस्मत्पितृभगिनी (बुआ) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः ।।३

अमुकगोत्रा अस्मन्मातृभगिनी (मौसी) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः ।।१

अमुकगोत्रा अस्मदात्मभगिनी (अपनी बहन) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः ।।१

अमुकगोत्रा अस्मत्सापत्नभगिनी (सौतेली बहन) अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः ।।१

अमुकगोत्रः अस्मच्छ्वशुरः (श्वसुर) अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रः अस्मद्गुरु अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रा अस्मदाचार्यपत्नी अमुकी देवी दा वसुरूपा तृप्यताम् इदं सतिलं जलं तस्यै स्वधा नमः ।।२

अमुकगोत्रः अस्मच्छिष्यः अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रः अस्मत्सखा अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

अमुकगोत्रः अस्मदाप्तपुरुषः अमुकशर्मा वसुरूपस्तृप्यताम् इदं सतिलं जलं तस्मै स्वधा नमः ।।३

इसके बाद सव्य तथा पूर्वाभिमुख हो नीचे लिखे श्लोकों को पढ़ते हुए जल गिरावे—

देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः॥
जलेचरा भूनिलया वाय्वाधाराश्च जन्तवः।
तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुनाखिलाः॥

इसके बाद अपसव्य होकर दक्षिणाभिमुख हो नीचे लिखे हुए श्लोकों को पढ़कर पितृतीर्थ जल गिरावे।

नरकेषु समस्तेषु यातनासु च ये स्थिताः।
तेषामाप्यायनायैतद्दीयते सलिलं मया॥
ये बान्धवाऽबान्धवाश्च येऽन्यजन्मनि बान्धवाः।
ते सर्वे तृप्तिमायान्तु ये चाऽस्मत्तोयकांक्षिणः॥
ये मे कुले लुप्तपिण्डाः पुत्र-दार-विवर्जिताः।
तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकम्॥
आब्रह्मस्तम्बपर्यन्तं देवर्षि-पितृ-मानवाः।
तृप्यन्तु पितरः सर्वे मातृ-माता-महादयः॥
अतीत-कुल-कोटीनां सप्तद्वीपनिवासिनाम्।
आब्रह्मभुवनाँल्लोकादिदमस्तु तिलोदकम्॥

वस्त्र-निष्पीडन

तत्पश्चात् वस्त्र को चार आवृत्ति लपेटकर जल में डुबावे और बाहर ले आकर निम्नांकित मन्त्र को पढ़ते हुए अपसव्यभाव से अपने बायें भाग में भूमि पर उस वस्त्र को निचोड़े।

ये के चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम्॥

भीष्म-तर्पण

दक्षिणाभिमुख हो पितृतर्पण के समान हाथ में कुशा धारण किये हुए ही बालब्रह्मचारी भक्तप्रवर भीष्म के लिये पितृतीर्थ से तिलमिश्रित जल के द्वारा तर्पण करें।

वैयाघ्रपदगोत्राय साङ्कृत्य-प्रवराय च।
गङ्गापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम्।।
अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे।

अर्घ्यदान

तदनन्तर सव्य होकर पूर्वाभिमुख हो शुद्ध जल से आचमन कर अर्घ्य दें।

ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठा सतश्च योनिमसतश्च वि वः।। (यजु. १३।३) **ॐ ब्रह्मणे नमः। ब्रह्माणं पूजयामि।।**

ॐ इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पाँ सुरे स्वाहा।। (यजु. ५।१५) **ॐ विष्णवे नमः। विष्णुं पूजयामि।।**

ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः।। (यजु. १६।१) **ॐ रुद्राय नमः। रुद्रं पूजयामि।।**

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।। (यजु. ३६।३) **ॐ सवित्रे नमः। सवितारं पूजयामि।।**

ॐ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नं चित्रश्रवस्तमम्।। (यजु. ११।६२) **ॐ मित्राय नमः। मित्रं पूजयामि।।**

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके।। (यजु. २१।१) **ॐ वरुणाय नमः। वरुणं पूजयामि।।**

सूर्योपस्थान

इसके बाद निम्नांकित मन्त्र पढ़कर सूर्य को प्रणाम एवं प्रार्थना करें–

ॐ अदृश्रमस्य केतवो वि रश्मयो जनाँ २ अनु। भ्राजन्तो अग्नयो यथा। उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय। सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठोऽहं मनुष्येषु भूयासम्।। हँ्सः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्।। (यजु. ८।४०, १०।२४)

इसके पश्चात् दिग्देवताओं को पूर्वादि क्रम से नमस्कार करें।

'ॐ इन्द्राय नमः' प्राच्यै।।

'ॐ अग्नये नमः' आग्नेय्यै।।

'ॐ यमाय नमः' दक्षिणायै।।

'ॐ निर्ऋतये नमः' नैर्ऋत्यै।।

'ॐ वरुणाय नमः' पश्चिमायै।।

'ॐ वायवे नमः' वायव्यै।।

'ॐ सोमाय नमः' उदीच्यै।।

'ॐ ईशानाय नमः' ऐशान्यै।।

'ॐ ब्रह्मणे नमः' ऊर्ध्वायै।।

'ॐ अनन्ताय नमः' अधरायै।।

इसके बाद जल में नमस्कार करें।

ॐ ब्रह्मणे नमः। ॐ अग्नये नमः। ॐ पृथिव्यै नमः। ॐ ओषधिभ्यो नमः। ॐ वाचे नमः। ॐ वाचस्पतये नमः। ॐ महद्भ्यो नमः। ॐ विष्णवे नमः। ॐ अद्भ्यो नमः। ॐ अपाम्पतये नमः। ॐ वरुणाय नमः।

मुखमार्जन

शुद्ध जल से मुँह धो ले—

ॐ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सँ शिवेन। त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्नो यद्विलिष्टम्। (यजु० २।२४)

विसर्जन

निम्नांकित मन्त्र पढ़कर देवताओं का विसर्जन करें।

ॐ देवा गातुविदो गातुं वित्त्वा गातुमित।
मनसस्पत इमं देव यज्ञँ स्वाहा वाते धाः।।

(यजु० ८।३१)

समर्पण

निम्नांकित वाक्य पढ़कर यह तर्पण-कर्म भगवान् को समर्पित करें।

अनेन यथाशक्तिकृतेन देवर्षिमनुष्यपितृतर्पणाख्येन कर्मणा भगवान् मम समस्तपितृस्वरूपी जनार्दनवासुदेवः प्रीयतां न मम।

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

।। ॐ तत्सद्ब्रह्मार्पणमस्तु।।

।। इति ।।

शिवपञ्चाक्षरस्तोत्रम्

नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागाय महेश्वराय।।
नित्याय शुद्धाय दिगम्बराय
तस्मै नकाराय नमः शिवाय।। १ ।।
मंदाकिनी-सलिल-चंदन-चर्चिताय
नंदीश्वर-प्रमथ-नाथ-महेश्वराय।।
मन्दारपुष्प-बहुपुष्प-सुपूजिताय
तस्मै मकाराय नमः शिवाय।। २ ।।
शिवाय गौरीवदनाब्जवृन्द-
सूर्याय दक्षाध्वर-नाशकाय।।
श्रीनीलकण्ठाय वृषभध्वजाय
तस्मै शिकाराय नमः शिवाय।। ३ ।।
वसिष्ठ-कुम्भोद्भव-गौतमार्य-
मुनीन्द्र-देवाऽर्चित-शेखराय।।
चन्द्रार्क-वैश्वानर-लोचनाय
तस्मै वकराय नमः शिवाय।। ४ ।।
यक्षस्वरूपाय जटाधराय
पिनाकहस्ताय सनातनाय।।
दिव्याय देवाय दिगम्बराय
तस्मै यकाराय नमः शिवाय।। ५ ।।

फलश्रुतिः—

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसन्निधौ।
शिवलोकमवाप्नोति शिवेन सह मोदते।। ६ ।।

●

॥ श्रीगणेशाय नमः॥

अथ प्रायश्चित प्रयोग

मङ्गलं भगवान् विष्णुः मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षः मङ्गलाय तनो हरिः॥

पवित्रीकरणम्

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥
ॐ पुण्डरीकाक्षः पुनातु, ॐ पुण्डरीकाक्षः पुनातु,
ॐ पुण्डरीकाक्षः पुनातु।

त्रिराचमनम्

ॐ केशवाय नमः,ॐ नारायणाय नमः, ॐ माधवाय नमः॥
ॐ गोविन्दाय नमः, इति हस्तौप्रक्षाल्यं हृषीकेशाय नमो नमः॥

आसनशुद्धिः

ॐ पृथ्वित्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम॥

पवित्रीधारणम्

ॐ पवित्रैस्थो वैष्णव्यौ सवितुर्वः॑प्प्रसव।
उत्त्पुनाम्यच्छिद्रेण पवित्रैण सूर्य्यस्य रश्मिभिः॥
तस्यं ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम॥

(इति पवित्रीधारणम्)

ततः शिखा बन्धनम्

ॐ मानस्तोकेतनये मानऽआयुषि मानो गोषुमानोऽ
अश्वेषुरीरिषः। मानो वीरान्नुद्र भामिनो वधीर्हविष्मन्तः
सदमित्वा हवामहे॥

तिलक धारणम्

ॐ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्व वेदाः। स्वस्ति नस्ताक्ष्यों ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ (हाथ धो लेवें)

प्राणानायम्य

ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः। सबुध्न्याऽउपमा अस्यविष्ठाः सतश्च योनिमसतश्चविवः॥

ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम।
समूढमस्यपाꣳ सुरे स्वाहा॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च। मयस्कराय च नमः शिवाय च शिवतराय च॥

(प्रायश्चित सङ्कल्प करने से पूर्व स्वस्तिवाचन कर लेंवे)

अथ प्रायश्चित सङ्कल्प

ॐ विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्याऽद्य श्रीब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे युगे कलियुगे कलिप्रथमचरणे जम्बूदीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे अमुकक्षेत्रे विक्रमशके बौद्धावतारे षष्ट्यब्दानां मध्ये अमुकनामसम्वत्सरे अमुकायने अमुकऋतौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते श्रीचन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथा-राशिस्थान-स्थितेषु सत्सु एवं ग्रहगुणगण-विशेषण-विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्माऽहं (वर्माऽहं गुप्तोऽहं वा) मम इह जन्मनि जन्मान्तरे वा बाल्ययौवन

वार्द्धवाक्यावस्थासु वाक् पाणिपाद पायूपस्थ श्रोत्रचक्षुर्जिह्वा घ्राणमनोभिः ज्ञाताज्ञात कामाकाम सकृद् सकृत् कायिक वाचिक मानसिक सांसर्गिकाणाम् आचारितानां समेषां पापानां ब्राह्मणनिन्दा गुरुनिन्दा माता-पितृनिन्दा देवनिन्दा तीर्थनिन्दा-वेदनिन्दा-शास्त्रनिन्दा मातापितृ ज्येष्ठभ्रातृ गुरुतिरस्कार मातृपितृ गुरुद्रोह-परद्रोह परनिन्दा आत्मस्तुति-रुपाणाम् अस्पृश्य स्पर्शन, अश्रव्य श्रवण अहिस्य हिंसन अवन्द्य। वन्द्यन अचिन्त्य चिन्तन अयाज्य याजन, अपूज्य पूजन, रुपाणाम् परमर्मोद्घाटन मिथ्यापवाद मिथ्या भाषण म्लेच्छ सम्भाषण, पतितसम्भाषण, परस्त्री सम्भाषण, परस्त्रीगमन, ब्रह्मद्वेष करण, ब्रह्मवृत्तिहरण, परवृत्तिहरण, हीन जातिसेवन, निषिद्धाचरण रुपाणाम्, शौचत्याग, सन्ध्योपासन त्याग, तर्पण, बलिवैश्वदेव, नित्यमोह त्याग, देवपूजन त्याग, स्वग्राम त्याग, स्वदेशत्याग, परिवार त्याग, कुलत्याग, स्वधर्मत्याग, सदाचार त्याग, शीलत्याग, गुरुत्याग, वेदत्याग, शास्त्रत्याग, आश्रमत्याग, रुपाणाम् अभक्ष्य भक्षण, अभोज्य भोजन, अचूष्य चूषण, अलेह्य लेहन, अपेयमान लशुन, पलाण्डु, गृञ्जन भोजन, उच्छिष्ट भोजन, दूषितान्न भोजन, निन्दितान्न भोजन, निषिद्ध परान्न भोजन, सकलीकरण, मलिनीकरण, अपात्रीकरण, जातिभ्रम, शंकर प्रकीर्ण कपातकानामेतत् कालपर्यन्तं सञ्चितानां गुरुलघु स्थूल, सूक्ष्म रुपाणां समेषां पापानां परिहारपूर्वकं यथावत्फल प्राप्त्यर्थं श्रीपरमेश्वर प्रीत्यर्थं स्वशरीर संशुद्धये देवब्राह्मण सन्निधौ करिष्यमाणम् अमुककर्माधिकार सिद्ध्यर्थं द्वादशाब्दं षडब्दं त्र्यब्दं वा सर्व प्रायश्चितं करिष्ये। तदङ्गत्वेन दशदानादि च यथा नाम गोत्रेभ्यः ब्राह्मणेभ्यः विभज्य दातुमहमुत्सृजे तथा

वपनं दन्तधावनम् पञ्चगव्यादि दशविधि स्नानानि च करिष्ये।।

मुण्डन मन्त्र

यानि कानि च पापानि ब्रह्महत्या समानि च।
केशानाश्रित्य तिष्ठन्ति तस्मात् केशान्वहाम्यहम्।।

दन्त धावन

बारह अंगुल के अपामार्गादि के दातून को तोड़ते समय अधोलिखित मन्त्र का उच्चारण करें—

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च।
ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते।।

दन्तधावन के पश्चात् चुपचाप मार्जनात्मक स्नान करें।

दशविधि स्नान

प्रथम भस्म स्नानम्–

ॐ नमस्ते रुद्रमन्यव उतोतऽ इषवे नमः। बाहुभ्यामुतते नमः।।

द्वितीय मृत्तिका स्नानम्–

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे स्वाहा।।

तृतीय गोमय स्नानम्–

ॐ मानस्तोकेतनये मानऽआयुषि मानो गोषुमानोऽ अश्वेषुरीरिषः। मानो व्वीरारन्रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्वा हवामहे।।

चतुर्थ पञ्चगव्य स्नानम्–

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। सभूमिꣳ सर्वतः स्पृत्वात्त्यतिष्ठद्दशाङ्गुलम्।।

पञ्चम गोरज स्नानम्-

ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्रयन्त्स्वः॥

षष्ठ धान्य स्नानम्-

ॐ धान्यमसि धिनुहि देवान् प्राणायत्वो दानायत्वा व्यानायत्वा। दीर्घामनु प्रसितिमायुषे धान्देवोवः सविता हिरण्यपाणिः प्रतिगृब्भ्णा त्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम् पयोऽसि॥

सप्तम फल स्नानम्-

ॐ याः फलिनीर्या ऽअफला ऽअपुष्पा याश्च पुष्पिणीः। बृहस्पति प्रसूतास्ता नो मुञ्चन्त्वहं हसः॥

अष्टम सर्वौषधि स्नानम्-

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तहं राजन्न्य पारयामसि॥

नवम कुशोदक स्नानम्-

ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुब्भ्याम् पूष्णो हस्ताब्भ्याम्॥

दशम हिरण्य स्नानम्-

ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥

पञ्चगव्य करणम्

(स्नानान्तर पञ्चगव्य प्राशन हेतु पञ्चगव्य तैयार कर लेंवे)
एक पात्र में अधोलिखित मन्त्रों द्वारा पञ्चगव्य मिला लेंवे।

गोमूत्र—

ॐ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तुत्वा॥

गोमय—

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम्॥

गोदुग्ध—

ॐ आप्यायस्वसमेतुते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे॥

गोदधि—

ॐ दधिक्राव्णो ऽअकारिषञ्जिष्णोरश्वस्यवाजिनः। सुरभिनो मुखाकरत्प्रण ऽआयूंषि तारिषत्॥

गोघृत—

ॐ तेजोऽसि शुक्रमस्यमृत मसि धाम। नामाऽसिप्प्रियन्देवा नामनाधृष्टन्देव यजनमसि॥

पञ्चगव्य मिश्रित करके पञ्चगव्य पात्र को बायें हाथ में लेकर दाहिने हाथ से ढककर अधोलिखित मन्त्र पढ़ें—

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके।
प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम।।

पञ्चगव्य प्राशन करके आचमन करें। करों को सम्पुटिकृत्य करके प्रार्थना करें—

गावोममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।
गावो मे हृदये सन्तु गवां मध्ये वशाम्यहम्।।

यज्ञसाधन भूतायाः विश्वस्याघौघनाशिनी।
विश्वरूपधरो देवः प्रीयतामनयागवा।।

इस प्रकार प्रार्थना करके **गोभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समपर्यमि।।**

हाथ में जल लें—**अनेन कर्मणा पापापहा महाविष्णुः प्रीयतां न मम।। श्री विष्णवे नमः। श्री विष्णवे नमः। श्री विष्णवे नमः।।**

विष्णुपूजन विधि

सङ्कल्प—**देशकालौ सङ्कीर्त्य अङ्गीकृत्य प्रायश्चिचदङ्गत्वेन विष्णु पूजन पूर्वकं विष्णु श्राद्धम् करिष्ये।। तत्रादौ निर्विघ्नता सिध्यर्थं गणेशाऽम्बिकयोः पूजनं करिष्ये।**

गणेश पूजन तथा भगवान् विष्णु का षोडशोपचार पूजन करें। विष्णु पूजन करके पञ्चभू संस्कार तथा अग्नि स्थापन करें। फिर कुशकण्डिका करके प्रायश्चित हवन करें।

प्रायश्चित हवन

आहुतयः।।

ॐ प्रजापतये स्वाहा - इदं प्रजापतये न मम।।

बिना बोले आहुति देवें। ततः—

ॐ इन्द्राय स्वाहा – इदं इन्द्राय न मम।।

ॐ अग्नये स्वाहा – इदं अग्नये न मम।।

ॐ सोमाय स्वाहा – इदं सोमाय न मम।।

ऊपर लिखित तीन आहुतियाँ घृत से देवें।

ततः अष्टोत्तरशताष्टविंशति वाऽज्याहुतीनाज्यस्त्समस्तभिः महाहव्याः हतिभिर्तो नमः।।

(क) ॐ भूः स्वाहा – इदमग्नये न मम।। (कुशा से आहुति दें।)

(ख) ॐ भुवः स्वाहा – इदं वायवे न मम।। घृत से ,, ,,)

(ग) ॐ स्वः स्वाहा – इदं सूर्याय न मम।।

(घ) ॐ भूर्भुवः स्वाहा – इदं प्रजापतये न मम।।

यह चार आहुतियाँ २८ या १०८ बार देना चाहिये।

इस प्रकार चार आहुतियाँ सात बार देने से २८ आहुतियाँ हो जायेंगी।

पञ्चगव्य आहुति

ॐ इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे दशस्या व्व्यस्कभ्ना रोदसी विष्णवेते दाधर्त्थ पृथिवी मभितो मयूखैः स्वाहा।। इदं पृथिव्यै इदं न मम।।

ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाꣳसुरे स्वाहा।। इदं विष्णवे इदं न मम।।

ॐ मानस्तोकेतनये मानऽआयुषि मानो गोषुमानोऽ अश्वेषुरीरिषः। मानो व्वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे।। इदं रुद्राय इदं न मम।।

ॐ शन्नो देवी रभिष्टय ऽआपो भवन्तु पीतये। शं य्यो रभिस्रवन्तु नः स्वाहा।। इदं अदभ्यो इदं न मम।।

ॐ अग्नये स्वाहा – इदं अग्नये न मम।।

ॐ सोमाय स्वाहा – इदं सोमाय न मम।।

ॐ तत्सवितुर्वरेण्यम् स्वाहा – इदं सवित्रे न मम।।

ॐ स्वाहा – इदं परमेष्ठिने न मम।।

पञ्चगव्य घी मिश्रित आहुति करें—

ॐ भूर्भुवः स्वः स्वाहा – इदम् प्रजापतये न मम।।

ॐ अग्नये स्वाहा – इदम् अग्नये न मम।।

ॐ अग्नये स्विष्टकृते स्वाहा–इदम् अग्नये स्विष्टकृते न मम।।

यजमान कहें — **विप्रव्रत ग्रहणं करिष्ये।।**

विप्र ब्राह्मण कहें — **कुरु कुरुष्व।।**

पञ्चगव्य का पुनः प्राशन करे।

घृत आहुति करें

ॐ भूः स्वाहा – इदम् अग्नये न मम।।
ॐ भुवः स्वाहा – इदं वायवे न मम।।
ॐ स्वः स्वाहा – इदं सूर्याय न मम।।
ॐ भूर्भुवः स्वः स्वाहा – इदं प्रजापतये न मम।।

इस प्रकार सात बार होम करके फिर ब्राह्मणान्वारब्ध होकर—

ॐ भूः स्वाहा – इदम् अग्नये न मम।।
ॐ भुवः स्वाहा – इदं वायवे न मम।।
ॐ स्वः स्वाहा – इदं सूर्याय न मम।।

अथ प्रायश्चित होम

ॐ त्वन्नो ऽअग्ने वरुणस्य विद्वान्न देवस्य हेडोऽअवयासि सीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषांᳪसि प्रमुमुग्ध्यस्मत्। (स्वाहा) इदमग्नि वरुणाभ्यां न मम।

ॐ सत्वन्नो ऽअग्ने वमो भवोती नेदिष्ठो अस्याऽ उषसो व्युष्टौ। अवयक्ष्वनो वरुणः रराणोवीहि मृडीकः सुहवोनऽएधि।। इदमग्नी वरुणाभ्यां न मम।

ॐ अयाश्चाग्ने स्यनभि शस्ती पाश्च सत्यमित्वमया असि। अया नो यज्ञं वहा स्ययानो धेहि भेषज ᳪ स्वाहा।। इदं अग्ने अयसे न मम।

ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिार्न्नोअद्य सवितोत विष्णुर्विश्श्वे मुञ्चन्तु मरूतः स्वर्क्काः। (स्वाहा) इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।।

ॐ उदुत्तमं व्वरुण पाशमस्म दवाधमं विमध्यम ँ श्रथाय। अथा व्वयमादित्य व्व्रते तवानाग सो अदितये स्याम।। (स्वाहा) इदं प्रजापतये न मम।।

ततः बर्हिहोमं स्वाहा – इससे बर्हिहोम करें।

इदं प्रजापतये न मम – यह भी बोल देवें

तदनन्तर संस्रवप्राशन या अवघ्राण करके दो आचमन करके अग्नि में 'स्वाहा' शब्द से पवित्री डालकर पूर्णपात्र दान देवें।

पूर्णपात्र दान

संकल्प–

प्रायश्चित होम कर्मणः साङ्गफल प्राप्तये साद्गुण्यार्थं अपूर्ण पूरणार्थं च इदं पूर्णपात्रं सद्रव्यं ब्रह्मणे तुभ्यं सम्प्रददे।।
इसके बाद अग्नि की प्रार्थना करें। फिर उत्तर पूजन करें।

प्रार्थना–

ॐ अग्नेनय सुपथा रायेऽअस्मान् विश्वानि देव व्वयुनानि व्विद्वान। युयोध्द्यस्मज्जुहुराण मेनोभूयिष्ठान्ते नमऽउक्तिं व्विधेम।।

श्रद्धा मेधां यशः प्रज्ञां, विद्यां पुष्टिं बलं श्रियम्।
तेजं आयुष्यं द्रव्यमारोग्यं, देहि मे हव्यवाहन।।

पीछे संकल्प में—

प्रायश्चित् यज्ञं विष्णु श्राद्धं संपत्तये ब्राह्मणचतुष्टाय आयान्नं पक्वान्नं वा दास्ये।। ऐसा बोलकर (चार) ब्राह्मणों को कच्चा या पक्का अन्न देवें। पश्चात् त्र्यायुषीकरण यज्ञ भस्म लगावें—

ॐ त्र्यायुषं जमदग्नेः (ललाटे)

कश्यपस्य त्र्यायुषम् – (ग्रीवायाम्)

यद्देवेषु त्र्यायुषम् – (हृदि)

फिर होम की दक्षिणा का सङ्कल्प करें—

प्रायश्चित होम कर्मणः साङ्गफल प्राप्तये साद्गुण्यार्थं च इमां दक्षिणामपि तुभ्यं सम्प्रददे। (ब्रह्म दक्षिणाऽचार्य दक्षिणा द्विगुणा) कृतस्य प्रायश्चित कर्मणः साद्गुण्यार्थं पञ्चदश ब्राह्मणान् यथोपङ्गेन भोजयिष्यामि अस्मिन् प्रायश्चित कर्मणे न्यूनातिरिक्तदोष परिहारार्थं भूयसीं दक्षिणामन्येभ्यो ब्राह्मणेभ्यो विभज्य दास्ये। ततोऽग्निं विसृजेत।।

अथ जलयात्रा विधिः

स्वस्तिक बनाये अष्टदल पर कलश रखें, प्रधान कलश बीच में रखें, सप्तमातृकाओं के लिये कपड़े बिछायें, कपड़े पर सात-सात अक्षतपुंज रखें। सिन्दूर का टीका लगायें (पुंज पर) सर्वप्रथम गौरी-गणेशपूजन करें–

सङ्कल्प–

ॐ जलयात्राङ्ग भूत याज्ञिक कार्य साङ्गता सिद्ध्यर्थे श्रीवरुण देवता प्रसन्नार्थं गणेश, जलमृत्तिका जीवमातृका, स्थलमातृका, सप्तसागर, योगिनी, क्षेत्रपाल, भूमि पूजनपूर्वकं नव वर्द्धनि कलशेषु वरुण पूजनं च अहं करिष्ये। कपड़े पर चावल की सात-सात ढेरी रखें।

प्रथम सात पुंज में क्रम से सप्त जलमातृका का आवाहन स्थापन करें। बायें हाथ में अक्षत लेकर दाहिने हाथ से एक-एक पुंज पर छोड़े।

सप्त जलमातृका

(१) ॐ भूर्भुवः स्वः मत्स्यै नमः मत्सीमावाहयामि स्थापयामि।।
(२) ॐ भूर्भुवः स्वः कूर्म्यै नमः कूर्मीमावाहयामि स्थापयामि।।
(३) ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीमावाहयामि स्थापयामि।।
(४) ॐ भूर्भुवः स्वः माण्डूक्यै नमः माण्डूकीमावाहयामि स्थापयामि।।
(५) ॐ भूर्भुवः स्वः मकर्यै नमः मकरीमावाहयामि स्थापयामि।।

(६) ॐ भूर्भुवः स्वः ग्राहक्यै नमः ग्राहकीमावाहयामि स्थापयामि।।
(७) ॐ भूर्भुवः स्वः कोचिक्यै नमः कोचकीमावाहयामि स्थापयामि।।

प्राण प्रतिष्ठा करके पूजन करे। पूजन के बाद प्रार्थना करें—

प्रार्थना—

मत्सी कूर्मी च वराही दर्दुरी मकरी तथा।
जलूकी तन्तुकी चैव सप्तैता जलमातरः।।

मत्सादि सप्तजलमातृभ्यो नमः, प्रार्थनापूर्वकं नमस्कारं समर्पयामि।

सप्तमातृका पूजनम्

(१) ॐ भूर्भुवः स्वः कुमार्यै नमः कुमारीमावाहयामि स्थापयामि।।
(२) ॐ भूर्भुवः स्वः धनदायै नमः धनदामावाहयामि स्थापयामि।।
(३) ॐ भूर्भुवः स्वः नन्दायै नमः नन्दामावाहयामि स्थापयामि।।
(४) ॐ भूर्भुवः स्वः विमलायै नमः विमलामावाहयामि स्थापयामि।।
(५) ॐ भूर्भुवः स्वः मङ्गलायै नमः मङ्गलामावाहयामि स्थापयामि।।
(६) ॐ भूर्भुवः स्वः अचलायै नमः अचलामावाहयामि स्थापयामि।।
(७) ॐ भूर्भुवः स्वः पद्मायै नमः पद्मामावाहयामि स्थापयामि।।

प्राण प्रतिष्ठा करके पूजन करे। पूजन के बाद प्रार्थना करें—

प्रार्थना—

कुमारीधनदानन्दा विमलामङ्गलाऽचला।
पद्माचेति सुविख्याताः सप्तैताः जीवमातरः।।

कुमार्यादि सप्तजीवमातृभ्यो नमः, प्रार्थनापूर्वकं नमस्कार समर्पयामि। अनया पूजया कुमार्यादि जीवमातृकाः प्रीयन्ताम्।।

सप्त स्थलमातृका पूजनम्—

(१) ॐ भूर्भुवः स्वःऊर्म्यै नमः ऊर्मीमावाहयामि स्थापयामि।।
(२) ॐ भूर्भुवः स्वः लक्ष्म्यै नमः लक्ष्मीमावाहयामि स्थापयामि।।
(३) ॐ भूर्भुवः स्वः महामायायै नमः महामायामावाहयामि स्थापयामि।।
(४) ॐ भूर्भुवः स्वः पानादेव्यै नमः पानादेवीमावाहयामि स्थापयामि।।

(५) ॐ भूर्भुवः स्वः वारुण्यै नमः वारुणीमावाहयामि स्थापयामि।।
(६) ॐ भूर्भुवः स्वः निर्मलायै नमः निर्मलामावाहयामि स्थापयामि।।
(७) ॐ भूर्भुवः स्वः गोधायै नमः गोधामावाहयामि स्थापयामि।।

प्राण प्रतिष्ठा करके पूजन करे। पूजन के बाद प्रार्थना करें—

प्रार्थना–

ऊर्मीलक्ष्मीः महामाया पानदेवी तथैव च।
वारुणी निर्मला गोधा सप्तैताः स्थलमातरः।।

ऊर्म्यादि सप्तस्थलमातृभ्यो नमः, प्रार्थनापूर्वकं नमस्कारं समर्पयामि। अनया पूजया ऊर्म्यादि जीवमातृकाः प्रीयन्ताम्।।

योगिनी पूजन–

ॐ योगेंयोगे तुवस्तरं व्वाजेंव्वाजे हवामहे। सखाय ऽइन्द्रमूतयें।।

सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

प्रार्थना–

ढुं ढुं ढुमकत ढुम्ब ढुम्ब वहनं भूमौ सदा यस्य सा।
क्षुं क्षुं क्षुमकत क्षुम्ब-क्षुम्ब घुँघरु कर्णौ सदा सर्वदा।।
रं रं रमकत रम्ब-रम्ब रक्तं कमलं तु हस्ते सदा।
चं चं चमकत चम्ब चम्ब कङ्कण दुर्गे सदा पाहि मां।।
कं कं कां कां हसन्ति प्रहसित वदने भक्षयन्ती कराली।
क्षुं क्षुं क्षां क्षां क्षरन्ति रिपुकुल दमनी खड्गं चक्रं शिरांसि।।
क्लीं क्लीं कालरात्रि भव भयहरिणी वज्रहस्तं धरन्तीम।
भक्तानां पालयन्ति सकल सुख करीं कालिकां त्वां नःपान्तु।।
त्रिशूलमसि चापेषु, धरणीं पद्मलोचनां।
ध्याये चतुर्भुजां दिव्यां, योगिनीं सिंह वाहिनीम्।।

दिव्यादि चतुःषष्टि योगिनीभ्यो नमः प्रार्थना पूर्वकं नमस्कारं समर्पयामि। अक्षत लेकर जल में छोड़ें जल मे उनकी पूजा करें।

अथ दशदिक्पाल पूजनम्

ॐ भूर्भुवः स्वः इन्द्राय नमः, इन्द्रमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः अग्नये नमः, अग्निमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः यमाय नमः, यममावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः निर्ऋतये नमः, निर्ऋतिमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः वरुणाय नमः, वरुणमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः वायवे नमः, वायुमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः सोमाय नमः, सोममावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः ईशानाय नमः, ईशानमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः ब्रह्मणे नमः, ब्रह्माणमावाहयामि स्थापयामि।।
ॐ भूर्भुवः स्वः अनन्ताय नमः, अनन्तमावाहयामि स्थापयामि।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमं तनो त्वरिष्टं य्यज्ञꣳ समिमं दधातु। विश्श्वेदेवास ऽइह मादयन्तामो ३ म्प्रतिष्ठ॥ ॐ भूर्भुवः स्वः इन्द्राद्यनन्तान्तदेवताः सुप्रतिष्ठिता वरदाः भवन्तु। षोडशोपचारैः सम्पूज्य प्रार्थयेत्॥

हस्ते जमादाय— **अनया पूजया दशदिक्पालाः प्रीयन्ताम्।।**

अथ क्षेत्रपाल पूजनम्

वायव्य कोण में त्रिकोण मण्डल पर क्षेत्रपाल और दश दिक्पाल पूजन करें—

ॐ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि।
मा त्वाहिꣳसीन्मा माहिꣳसीः॥

ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः, क्षेत्रपालमावाहयामि स्थापयामि॥

प्रार्थना—

कौलीरे चित्रकूटे हिमगिरि शिखरेकाल जालान्धरेवा।
सौराष्ट्रे सिन्धुदेशे मगधपुरवरे कौसलेवाकलिङ्गे।।
कर्णाटे कौङ्गणेवा भृगुषु पुरवरे कान्यकुब्जेस्थितेवा।
ते सर्वे यज्ञरक्षा करण कृतधियः पातुवः क्षेत्रपालम्।।
करकलित कपालः कुण्डलीदण्डपाणिः।
तरुणतिमिर नील व्याल यक्षोपवीती।।
क्रतुसमय सपर्याद् विघ्नविच्छेद हेतुः।
जयति बटुकनाथः सिद्धिदः साधकानाम्।।

प्रार्थनापूर्वकं नमस्कारं समर्पयामि।

बलिदानम्–

निम्नांकित मन्त्र से दीपक, उड़द, दधि, भात तथा पापड़ से बलि देवें—

क्षेत्रपाल महाबाहो, महाबल पराक्रम।
बलिं गृहाण देवेश, क्षेत्र रक्षण हेतवे।।

भो क्षेत्रपाल दिशं रक्ष बलि भक्ष मम सकुटुम्बस्य सपरिवारस्य आयुकर्ता, क्षेमकर्ता, तुष्टिकर्ता, पुष्टिकर्ता वरदो भव।।

सप्तसागर पूजन–

ॐ समुद्राद्रूर्मिर्म्मधुमाँ ऽउदार दुपा ६ शुना सममृतत्व मानद्। घृतस्य नाम गुह्यँष्वदस्ति जिह्वा देवानाममृतस्य नाभिः।।

ॐ भूर्भुवः स्वः लवणेक्षु सुरासर्पि दधिक्षीर जलयान सप्त सागरान् आवाहयामि स्थापयामि।।

ॐ अद्भ्यो नमः। ॐ पुष्करादितीर्थेभ्यो नमः।

ॐ तत्वां यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशंऽ समानऽनायुः प्रमोषीः॥

ऊपर लिखित मन्त्र से पूजन करें, फिर पेड़े की बलि देवें। जल में पञ्चामृत प्रक्षेप में तथा स्रुवा से द्वादश घृत आहुति दें।

जल पूजन–

ॐ अदभ्यः स्वाहा — इदमद्भ्यो न मम॥
ॐ उदकाय स्वाहा — इदमुदकाय न मम॥
ॐ तिष्ठन्तीभ्यः स्वाहा — इदं तिष्ठन्तीभ्यो न मम॥
ॐ स्त्रवन्तीभ्यः स्वाहा — इदं स्त्रवन्तीभ्यो न मम॥
ॐ कुप्याभ्यः स्वाहा — इदं कुपाभ्यो न मम॥
ॐ स्यन्दमानाभ्यः स्वाहा — इदं स्यन्दमानाभ्यो न मम॥
ॐ सुधाभ्यः स्वाहा — इदं सुधाभ्यो न मम॥
ॐ धार्याभ्यः स्वाहा — इदं धार्याभ्यो न मम॥
ॐ अर्णवाय स्वाहा — इदं अर्णवाय न मम॥
ॐ वाभ्र्यः स्वाहा — इदं वाभ्र्यो न मम॥
ॐ समुदाय स्वाहा — इदं समुदाय न मम॥
ॐ सरिराय स्वाहा — इदं सरिराय न मम॥

इदं सर्वं जलाधिपतये सपरिवाराय वरुणाय न मम। नीचे लिखे मन्त्र से तीन बार अर्घ्य देवें।

ॐ वरुणस्योत्तम्भनमसि वरुणस्यस्क्कम्भ-सर्ज्जनीस्त्थो वरुणस्यऽऋत सदन्न्यसि वरुणस्य-ऽऋतसदनमसि वरुणस्य ऋतसदनमासीद।

जल में फल डालें (मन्त्र द्वारा)। नव कलश स्थापन करें।

चौराहे पर भैरव का पूजन करें।

ॐ नहिस्प्पशमविंदन्नन्यमस्माद् वैश्वानरात्पुर एतारमग्नेः। एमैन मवृधन्नमृताऽअमर्त्यं व्वैश्वानरं क्षैत्त्रंजित्याय देवाः॥

बलिदानम् –

भगवन् क्षेत्रपाल भासुर त्रिनेत्र ज्वालामुख अवतर-अवतर, कपिल, पिङ्गल ऊर्ध्वकेश जिह्वाललन छिन्धि-छिन्धि, भिन्धि-भिन्धि, कुरु-कुरु, मुरु-मुरु, चल-चल, लं लः हां हीं हुँ हैं॥

ॐ भगवन् क्षेत्रपाल मम यज्ञं रक्ष बलि गृहाण-गृहाण स्वाहा। ॐ क्षेत्रपालाय नमः सदीपमाषभक्त बलिं समर्पयामि॥

प्रार्थना –

ॐ नमामि क्षेत्रपाल त्वां भूतप्रेत गणाधिप।
पूजां बलिं गृहाणान्नं सौम्यो भवतु सर्वदा॥
आयुरारोग्यदो भूयाः निर्विघ्नं कुरु सर्वदा।
मां विघ्नं मास्तु मे पापं मा सन्तु परिपन्थिनः॥
सौम्यो भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः॥

ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः प्रार्थना पूर्वकं नमस्कारं समर्पयामि। हस्ते जलमादाय – **अनया पूजया क्षेत्रपालः प्रीयताम्।**

अथ गणेशाम्बिकापूजनम्

मङ्गलं भगवान् विष्णुः मङ्गलं गरुडध्वजः।
मङ्गलं पुण्डरीकाक्षं मङ्गलाय तनो हरिः॥

पवित्रकरणम्—

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

त्रिराचमनम्—

ॐ केशवाय नमः। ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ गोविन्दाय नमः। इति प्रक्षालनं हृषीकेशाय नमो नमः॥

आसनशुद्धिः—

पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः।

ॐ पृथ्वि! त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

पवित्रीधारणम्—

ॐ पवित्रे स्थो व्वैष्णव्यौ सवितुर्व्वः प्प्रसऽव। उत्त्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः॥ तस्य ते पवित्रपते पवित्रपूतस्य यत् कामः पुने तच्छकेयम॥

शिखा बन्धनम्–

ॐ मानस्तोके तनये मानऽआयुषि मानो गोषुमानोऽअश्वेषुरीरिषः। मानो व्वीरान्रुद्र भामिनो व्वधीर्हविष्म्मन्तः सदमित्त्वाहवामहे॥

[illegible]

ॐ स्वस्ति न ऽइन्द्रो व्वृद्धश्श्रवाः स्वस्ति नः पूषा व्विश्व वेदाः। स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्प्पतिर्द्दधातु॥

प्राणायाम–ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचो व्वेन ऽआवः। स बुध्न्या ऽउपमा अस्य व्विष्ठाः सतश्च योनिमसतश्च विवः॥

ॐ इदं विष्णु र्विचक्रमे त्रेधानिदधे पदम। समूढमस्यपाᳫं सुरे स्वाहा॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च। मयस्कराय च नमः शिवाय च शिवतराय च॥

गुरूर्ब्रह्मा गुरूर्विष्णुः गुरूर्देवो महेश्वरः।
गुरूः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः।।

श्री गुरुचरण कमलेभ्यो नमः, सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि, हस्ते अक्षत पुष्पाणि गृहीत्वा शान्ति पाठं पठेयुः॥

स्वस्तिवाचन—

ॐ आनो भद्राः क्क्रतवो यन्तु व्विश्वतो ऽदब्धासो ऽअपरीतास ऽउद्भिदः। देवा नो यथा सदमिद्वृधे ऽअसन्नप्प्रायुवो रक्क्षितारो दिवे दिवे॥१॥

ॐ देवानां भद्रा सुमतिर्ऋजूयतां देवानाᳫं रातिरभि नो निवर्त्तताम् देवानाᳫं सक्ख्यमुपसेदिमा व्वयं देवा न ऽआयुः प्प्रतिरन्तु जीवसे॥२॥

ॐ तान्पूर्व्वया निविदा हूमहे व्वयं भगम्मित्र मदितिन्द क्षमस्त्रिधम्। अर्य्यमणं व्वरुणᳪ सोममश्विना सरस्वती नः सुभगा मयस्क्करत॥३॥

ॐ तन्नो व्वातो मयोभु व्वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः। तदग्रावाणः सोम सुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम्॥४॥

ॐ तमीशानञ्जगतस्तस्थुषस्पतिं धियञ्जिन्व मवसे हूमहे व्वयम्। पूषा नो यथा व्वेद सामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये॥५॥

ॐ स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥६॥

ॐ पृषदश्वा मरुतः पृश्निमातरः शुभं य्यावानो व्विदथेषु जग्मयः। अग्निर्जिह्वा मनवः सूर चक्षसो व्विश्वे नो देवा ऽअवसागमन्निह॥७॥

ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहि देवहितं य्यदायुः॥८॥

ॐ शतमिन्नु शरदो ऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्गन्तोः॥९॥

ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः। व्विश्वे देवा ऽअदितिः पञ्च जना ऽअदितिर्ज्जातमदितिर्ज्जनित्वम्॥१०॥

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व्व ँ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥११॥

ॐ यतो यतः समीहसे ततो नो ऽअभयङ्कुरु। शन्नः कुरु प्रजाभ्यो ऽभयन्नः पशुभ्यः॥१२॥

सुशान्तिर्भवतु॥

श्रीमन्महागणाधिपतये नमः। लक्ष्मीनारायणाभ्यां नमः। उमा-महेश्वराभ्यं नमः। वाणीहिरण्यगर्भाभ्यां नमः। शचीपुरन्दराभ्यां नमः। मातृपितृचरणकमलेभ्यो नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। स्थान देवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सर्वेभ्यो ब्राह्मणेभ्यो नमः। ॐ सिद्धिबुद्धिसहिताय श्रीमन्महागणाधिपतये नमः।

सुमुखश्चैक दन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
सङ्ग्रामे संकटे चैव विघ्नस्तस्य न जायते॥
शुक्लाम्बर धरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥
अभीप्सितार्थं सिद्ध्यर्थं पूजितो यः सुरासुरैः।
सर्वविघ्न हरस्तस्मै गणाधिपतये नमः॥
सर्वमङ्गलमाङ्गल्ये! शिवे! सर्वार्थसाधिके।
शरण्ये त्र्यम्बके! गौरि नारायणि नमोऽस्तु ते॥
सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव।
विद्याबलं देवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि।।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः।
येषामिन्दि वरश्यामो हृदयस्थो जनार्दनः।।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूति र्ध्रुवा नीतिर्मतिर्मम।।

अनन्याश्चियन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्।।

स्मृतेः सकलकल्याणं भाजनं यत्र जायते।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम्।।

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः।
देवा दिशन्तु नः सिद्धिं ब्रह्मेशान जनार्दनाः।।

विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्।।

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।
गणेशाम्बिकाभ्यां नमः।।

।। सङ्कल्पः ।।

ॐ विष्णुर्विष्णुर्विष्णुः स्वस्ति श्री मन्मुकुन्द सच्चिदानन्द-रूपस्य परब्रह्मणो निर्वाच्य मायया यथाशक्ति विजृम्भिता विद्यायोगात् कालकर्मस्वभावाविर्भूत महत्तोदिताहंकार त्रयोदभूतस्य वियदादि पञ्च केन्द्रिय देवता निर्मिताण्डकटाहे चतुर्दश लोकात्मके लीलयातन्तमध्यवर्ति भगवतः श्रीनारायणस्य

नाभिकमलोद्भूतस्य सकललोकस्य पितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धारणाय प्रजापति प्रार्थितस्य महापुरुषस्य श्री श्वेतवाराहवतारेण धृयमाणायामास्यां धरित्र्यां भूर्लोकसंज्ञितायां सप्तद्वीप मण्डितायां क्षीरोदादि समुद्रतद्वीज वलयीकृत लक्षयोजनविस्तृर्णेजम्बुद्वीपे स्वर्गादि सरिद्भिः पाविते निखिल जनपावन कर्तृभिः शौनकादि महामुनि निवास भूते नैमिष्यारण्यादि मोक्षसाधनभूते श्रीमद्भगवतो महापुरुषस्य विष्णोरर्ाज्ञया प्रवर्तमानस्य अद्य श्रीब्रह्मणोह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवश्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथम चरणे भूर्लोके भरतखण्डे भारतवर्षे आर्यावर्तान्तर्गते ब्रह्मावर्तैकदेशे पुण्यप्रदेशे (काश्यां-अविमुक्त वाराणसी क्षेत्रे महाश्मशाने गौरीमुखे त्रिकण्टक विराजिते भागीरथ्याः उत्तरवाहिन्याः गङ्गायाः वामे दिक्भागे) (अमुक) प्रान्ते (अमुक) मण्डलान्तर्गत (अमुक) पुण्यपवित्र ग्रामे (अमुक अयने) (अमुक) ॠतौ (अमुक) संवत्सरे (अमुक) मासे (अमुक) पक्षे (अमुक) तिथौ (अमुक) वासरे (अमुक) राशिस्थिते श्रीसूर्ये (अमुक) राशिस्थिते श्रीचन्द्रे (अमुक)राशिस्थिते श्रीदेवगुरौ शेषेषु ग्रहेषु यथा यथा राशिस्थान स्थितेषु सत्सु एवं ग्रहगुणगण विशेषण-विशिष्टायां शुभपुण्यकाले (अमुक) गोत्रः (अमुक) शर्मा, वर्मा, गुप्तोऽहं वा सपत्नीकोऽहं (अत्रागत्यानां सर्वेषां जनानां प्रतिनिधि भूतोऽहं अस्मिन् (अमुक) यज्ञे श्रुतिस्मृतिपुराणोक्त शास्त्रोक्त वेदोक्त तन्त्रोक्त पुण्यफल प्राप्त्यर्थं मम सकुटुम्बस्य सपरिवारस्य तथा च अन्येषां जनानां विशेषतः एतत् प्रान्तीयानां सर्वेषां स्त्री पुंसां च, नित्य कल्याण प्राप्त्यर्थं कायिक वाचिक

मानसिक सांसर्गिक चतुर्विध पापक्षय पूर्वकं आध्यात्मिक, आधिदैविक, आधिभौतिक, त्रिविध, तापोपशान्तिसकल दुःख शेष निवृत्ति पूर्वकं व्याधादि जरा मृत्यु रोगभय शोकाद्यपसर्ग निवृत्ति-पुरस्सरं, मम जन्म कुण्डल्यां प्रश्नकुण्डल्यां लग्न कुण्डल्यां गोचरे च तन्महादशायां अन्तर्दशायां प्रत्यन्तर्दशायां प्रतिप्रत्यन्तर्दशायां शूक्ष्मान्तर्दशायां केचिद्विरुद्ध चतुर्थाष्टम द्वादश स्थान स्थित क्रूर ग्रहास्तैः संसूचितं संसूचयिष्यमाणं, पुत्रपौत्रादिसन्तते-रविच्छिन्नाभिवृद्ध्यर्थं, आदित्यादिनवग्रहानुकुलता सिद्ध्यर्थं इन्द्रादिदशदिक्पालप्रसन्नता सिद्ध्यर्थं धर्मार्थकाममोक्ष चतुर्विध पुरुषार्थ सिद्ध्यर्थं अप्राप्तलक्ष्मीप्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरणार्थं सकलमनेप्सितकामना सिद्ध्यर्थं लोके वा राजद्वारे, सभायां, न्यायालये, उद्योगे, कृषिकार्ये, व्यापारे, समाजेऽपि तद्वारे वा सर्वत्र यशोविजय कीर्तिलाभादि प्राप्त्यर्थं, शत्रुपराजय सद्धिष्ट सकल्पोक्त कामना सिद्ध्यर्थं च इह जन्मनि जन्मान्तरे वा सकलदुरितोपशमनार्थं गृहे विपुल धन-धान्य ऐश्वर्यादि-अभिवृद्धिपूर्वकं गृहे सर्वेषां जनानां शरीरे उत्पन्न एवं उत्पत्स्यमाण समस्त रोग व्याधि कष्ट पीडा निवारणपूर्वकं शरीरे दीर्घायुष्यनैरुज्य कीर्तिलाभक्षेमस्थैर्य सद्धर्म, सद्बुद्धि सद्विद्या सद्विवेक सदाचारादि प्राप्त्यर्थं सनातन धर्मेस्मिन अतिशयश्रद्धाभक्तिसंवृद्ध्यर्थं, धार्मिकग्रन्थानां पुराणानां सर्वासां विद्यानां संवृद्ध्यर्थं विशेषतः स्वधर्मे सनातनधर्मे प्रीतिविवर्द्धनार्थम–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग्भवेत्॥

इति सदुद्देश्यसिद्धिद्वारा विश्वस्मिन् जगति सर्वविधशान्त्यर्थं धर्मग्लान्यधर्मधर्माभ्युत्थान निवृत्तिपूर्वकं धर्मसंस्थापनार्थं च पुण्यकालेऽस्मिन् सकलदुरितोपशमनार्थं दुर्भिक्ष, अतिवृष्टि, अनावृष्टि, विप्लव भूकम्प पशुरोग कृषिकार्ये च उत्पन्न समस्त बाधा निवारणार्थं निर्विघ्नतापूर्वक प्रचुर अन्न उत्पादनार्थं राजभय चौरभय सर्पभय शत्रुभय अग्निभय रोगभय यानपातनादिभय दुस्संगजन्याकस्मिकभय तथा नानागतभयनिवारणार्थं नवग्रह-जन्यपीड़ा शान्त्यर्थं उपस्थितानां समेषां जनानां कल्याणार्थं तथा डाकिनी-शाकिनी-भूत-प्रेत-पिशाच-वेतालादिभय निवारणार्थं विशेषतः जगन्नियन्ता अनन्तकोटि ब्रह्माण्डनायकस्य भगवतः सूर्यमण्डलावर्ति जगद्बीज पुरुषोत्तम वैकुण्ठाधिपतेः श्रीसीतारामयोः वा साम्बसदाशिवस्य वा लक्ष्मीनारायणयोः वा जगदम्बिकयोः अनुग्रह प्राप्त्यर्थं सग्रहमखं (शिवशक्ति) यागकर्म एभिर्द्विजकुलावतंसैः, शम-दमादि-निखिल-गुणगण-भरितैः, विद्वद्भिः सह अद्यारभ्य पूर्णाहुति पर्यन्तं करिष्ये।

तदङ्गत्वेन स्वस्तिपुण्याहवाचनं मातृकापूजनं, वसोर्धारा-पूजनमायुष्य मन्त्रजपं साङ्कल्पिकेन विधिना नान्दीश्राद्धमाचार्यादि वरणञ्च करिष्ये।

तथा च मण्डपप्रवेशपूर्वकं वास्तुपूजनं, मण्डपपूजनं, चतुःषष्टियोगिनीपूजनं क्षेत्रपालनवग्रहपूजनं असंख्यात् सर्वतोभद्रपूजनं च करिष्ये।

तत्रादौ निर्विघ्नतासंसिद्ध्यर्थं गणेशाम्बिकयोः पूजन महं करिष्ये।

अथ कर्मपात्र स्थापनम्

बायें हाथ में अक्षत-गन्ध-पुष्प लेकर दाहिने हाथ से प्रक्षेपण करें।

पूर्वे ऋग्वेदाय नमः।। दक्षिणे यजुर्वेदाय नमः।। पश्चिमे सामवेदाय नमः।। उत्तरे अथर्ववेदाय नमः।। मध्ये अपांपतये वरुणाय नमः।। सर्वोपचारार्थे गन्धाऽक्षतपुष्पाणि समर्पयामि।

जल पात्रोपरि अङ्कुशमुद्रया सर्वाणि तीर्थान्यावाह्य धेनुमुद्रया अमृतीकृत्य "**हुं**" इति कवचेनागुह्य मत्स्यमुद्रयाऽच्छाद्य "**वं वरुणाय नमः**" इति मन्त्रम् अष्टवारं जपेत्।।

ॐ तत्वा यामि ब्रह्मणा व्वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोद्ध्युरुशꣳस मान आयुः प्रमोषीः।। अपां पतये वरुणाय नमः।। अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि पूजयामि च।। कलशे वरुणाद्यावाहित देवताः सुप्रतिष्ठिताः वरदाः भवन्तु।।

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरी जलेऽस्मिन्सन्निधिं कुरु।।

इस मन्त्र से सभी सामग्रियों पर जल छिड़कें—

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
पुनन्तु व्विश्वा भूतानि जातवेदः पुनीहि मा।।

सूर्यार्घ्यम्—

एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर।।

कर्म साक्षिणे भास्कराय नमः। इदमर्घ्यं समर्पयामि।

ॐ आकृष्णेन रजसा व्वर्त्तमानो निवेशयन्न मृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।

सूर्याय नमः। पुष्पाञ्जलिं समर्पयामि।

दीप पूजनम्—

तीक्ष्णद्रंष्ट महाकाय कल्पान्त दहनोपम्।
भैरवाय नमस्तुभ्यंमनुज्ञा दातुमर्हसि।।

ॐ अग्नि ज्ज्योतिषा ज्ज्योतिष्मान्रुक्कमो व्वर्चसा व्वर्च्चस्वान्। सहस्रदाऽ असि सहस्रायत्वा।।

दीपस्थ देवतायै नमः। सर्वोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि। इति सम्पूज्य प्रार्थयेत्)।।

भो दीप देव रुपस्त्वं कर्म साक्षी ह्यविघ्नकृत्।
यावत् कर्म समाप्तिः स्यात् तावदत्र स्थिरो भव।।

घण्टा पूजनम्—

आगमार्थं तु देवानां गमनार्थं च रक्षसाम्।
घण्टानादं प्रकुर्वीत पश्चात् घण्टा प्रपूज्यते।।

गणपति ध्यानम्—

गजाननं भूतगणादि सेवितं कपित्थजम्बू फलचारुभक्षणम्।
उमासुतं शोकविनाशकारकं नमामि विघ्नेश्वरपादपङ्कजम्।।

गौरी ध्यानम्—

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणता स्मृताम्।।

गणेशाम्बिकाभ्यां नमः ध्यानार्थे अक्षतपुष्पाणि समर्पयामि।

गणपति आवाहन—

ॐ गणानान्त्वा। गणपतिँ हवामहे प्प्रियाणान्त्वा प्रियपतिँ हवामहे निधीनान्त्वा निधिपतिँ हवामहे व्वसोमम्। आहमजानिगर्ब्भधमा त्वमजासि गर्ब्भधम्।।

ॐ नमो गणेब्भ्यो। गणपति ब्भ्यश्चवो नमो नमो

व्व्रातेंब्भ्यो व्व्रातपति ब्भ्यश्चवो नमो नमो गृत्सेंब्भ्यो गृत्संपतिब्भ्यश्चवो नमो नमो विरूपेब्भ्यो व्विश्वरूपे ब्भ्यश्चवो नमो नमः॥

गौरी आवाहन–

ॐ आयं गौः पृश्निरक्क्रमीदसदन्मातरं पुरः पितरं च प्प्रयन्त्स्वः॥

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्श्वकः सुभद्रिद काङ्काम्पील वासिनीम्॥

प्रतिष्ठा–

ॐ मनो जूति ज्र्जुषता माज्ज्यस्य बृहस्पति र्य्यज्ञमिमं तनो त्वरिष्टं य्यज्ञं समिम न्दधातु। विश्वे देवा सऽ इह मादयन्ता मोउं प्रतिष्ठ॥

आसनम्–

ॐ पुरुष ऽएवेदं सर्व्वं य्यद्भूतं य्यच्च भाव्यम्। उता मृतत्त्वस्ये शानो यदन्नेनाति रोहति॥

ॐ नमोऽस्तु नील ग्रीवाय सहस्राक्षायमीढुषे। अथोयेऽ अस्यसत्वानो ऽहन्ते भ्यो ऽकर न्नमः॥

ॐ यातें रूद्र शिवा तनूर घोराऽपाप काशिनी। तयानस्तन्वा शन्त मया गिरिं शन्ताभिचा कशीहि॥

अनेकरत्न संयुक्तं नानामणि गणान्वितम्।
भावितं हेममयम् दिव्यमासनं प्रतिगृह्यताम॥१॥
अनेकरत्न संयुक्तं नानामणि गणान्वितम्।
कार्तस्वर भयं दिव्यम् आसनं प्रतिगृह्यताम्॥२॥

विचित्र रत्नचितं दिव्यास्तरण संयुतम्।
स्वर्णसिंहासनं चारू गृहीष्व सुर पूजनम्।।३।।

पाद्यम्–

ॐ एतावानस्य महिमा तो ज्ज्यायाँश्च पूरूषः। पादोऽस्य व्विश्वा भूतानि त्रिपा दस्या मृतन्दिवि॥

ॐ यामिषुं ङ्गिरिशन्त हस्ते विभर्ष्यस्तवे। शिवाङ्गि रित्रता ङ्कुरूमा हिं सीः पुरूषञ्जगत्॥

ॐ नमोऽस्तु नील ग्रीवाय सहस्राक्षयमीढुषें। अथोयेऽ अंस्यसत्वानो हन्ते भ्यो कर न्नमः॥

ॐ अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम्। श्रियं देवी मुपह्वये श्रीर्मादेवी जुषताम्॥

गङ्गोदकं निर्मलं च सर्व सौगन्ध संयुतम्।
पाद प्रक्षालनार्थाय दत्तं मे प्रतिगृह्यताम्।।१।।
सर्वतीर्थ समुद्भूतं पाद्यं गन्धा दिभिर्युतम्।
विघ्नराज गृहाणेदं भगवन्भक्त वत्सल।।२।।
पाद्यं चते मया दत्तं पुष्प गन्धसमन्वितम्।
गृहाण देव देवेश प्रसन्नो वरदो भव।।३।।
गणेशाम्बिकाभ्यां नमः पादयोः पाद्यं समर्पयामि।

अर्घ्यम्–

ॐ त्रिपा दूर्ध्वऽ उदैत्पुरूषः पादोऽस्येहाऽभवत्पुनः ततो व्विष्वङ् व्यक्क्रामत्साशनानशनेऽ अभि॥

ॐ शिवेन व्वचं सात्त्वा गिरि शाच्छा व्वदामसि। यथानः सर्व्व मिज्ज गंदयक्ष्मं सु मनाऽ असत्॥

ॐ गायत्री त्रिष्टुब्ज गत्य नुष्टु प्पङ्क्त्यासह। बृहत्युष्णिहा ककुप्सूचीभिः शम्म्यन्तुत्वा॥

ॐ कां सोस्मितां हिरण्य प्राकारा मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्येस्थितां पद्मवर्णां तामि होप ह्वये श्रियम्॥

ॐ धामन्ते व्विश्वम्भुवनम धिश्रित मन्तः समुद्रेत्हृद्युन्त रायुषि। अपा मनीके समिथे यऽ आभृतस्त मश्श्याम मधु मन्तन्तऽ ऊर्म्मिम्॥

निधीनां सर्वदेवानां त्वमऽर्घ्य गुणा ह्यसि।
सिंहो परिस्थिते देवि गृहाणार्घ्यं नमोऽस्तु ते॥१॥
तत्पुरूषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥२॥
गन्ध पुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया।
गृहाणार्घ्यं मयादत्तं प्रसन्नो वरदो भव॥३॥
गणेशाम्बिकाभ्यां नमः हस्तयोरर्घ्यं समर्पयामि।

आचमनम्—

ॐ त्र्यम्बकं य्यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय माऽमृतात्॥

ॐ इमम्मे। वरुणश्श्रुधीहवमध्याचमृडय॥ त्वामवस्युराचके॥

ॐ ततो विराडजायत व्विराजो ऽअधि पूरुषः। स जातो ऽअत्यरिच्च्यत पश्चाद्भूमिमथो पुरः॥

ॐ अध्यवोचदधिवक्ता प्प्रथमो दैव्यो भिषक्॥

अहीश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योऽधराचीः परासुव।

ॐ मरुत्वाँ२ऽइन्द्र॥ व्वृषभोरणायपिबासोमं-मनुष्ष्वधम्मदाय॥ आसिञ्चस्वजठरेमध्वऽऊर्म्मिन्त्वᳪ राजासिप्प्रतिपत्त्सुतानाम्॥ उपयामगृहीतोसीन्द्रायत्वा-मरूत्वतएषतेयोनिरिन्द्रायत्वामरुत्त्वते॥

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।

तां पद्मिनीमीह शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे॥

कर्पूरेण सुगन्धेन वासितह स्वादु शीतलम्।
तोयमाचमनीयार्थं गृहाण परमेश्वर।।
गणेशाम्बिकाभ्यां नमः आचमनीयं समर्पयामि।

स्नानम्—

ॐ तस्माद्यज्ञात्सर्वहुतᳪ सम्भृतं पृषदाज्ज्यम्।
पशूँस्ताँश्चक्रे व्वायव्यानारण्यां ग्ग्राम्याश्च ये ॥

ॐ आपो हिष्ठ्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे॥

ॐ व्वायो ये तें सहस्त्रिणो रथोसस्तेभिरागहि नियुत्वान्सोमपीतये॥

ॐ असौ यस्ताम्म्रो ऽअरुण ऽउत बब्भ्रुः सुमङ्गलः। ये चैनᳪ रुद्रा ऽअभितो दिक्षु श्रिताः सहस्त्रशोऽवैषाᳪ हेड ईमहे॥

ॐ देवस्यत्त्वा। सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्यां-म्पूष्णोहस्ताभ्याम्।

मन्दाकिन्यास्तु यद्वारि सर्व पापहरं शुभम्।
तदिदं कल्पितं देव स्नानार्थं प्रति गृह्यताम्।।

पयः स्नानम्—

ॐ पयः पृथिव्यां पय ऽओषधीषु पयोदिव्व्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।।

ॐ पयसोरूपँय्यद्यवादध्नोरूपङ्कर्कन्धूनि।। सोमस्यरूपं व्वाजिनꣳ सौम्यस्यरूपमामिक्षा।।

कामधेनु समुद्भूतं सर्वेषां जीवनं परम्।
पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्।।
गणेशाम्बिकाभ्यां नमः पयस्नानं समर्पयामि।

दधि स्नानम्—

ॐ दधिक्राव्णो ऽअकारिषञ्जिष्णोरश्वस्य व्वाजिनः। सुरभि नो मुखा करत्प्रण ऽआयुँषि तारिषत्।।

ॐ धानाः करम्भः सक्तवः परीवापः पयोदधि। सोमस्य रूपꣳ हविषऽआमिक्षाव्वाजिनम्मधु।।

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्।
दध्यानीतं मया देव। स्नानार्थं प्रतिगृह्यताम्।।
गणेशाम्बिकाभ्यां नमः दधि स्नानं समर्पयामि।

घृत स्नानम्—

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम। अनुष्वधमावह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यम्॥

ॐ घृतङ्घृतपावानः पिब्बतृव्वसांव्वसापावानः पिबतान्तरिक्षस्य हविरसिस्वाहा।

दिशः प्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्भ्यः स्वाहा॥

ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्प्रियंदेवानाम-नाधृष्टंदेव यजनमसि॥

ॐ घृतेनाञ्जन्त्संपथोदेवयानान्प्रजानन्वाज्ज्यप्येतुदेवान्। अनुत्वासप्तेप्प्रदिशः सचन्ताᳬ स्वधामस्मैयजमानायधेहि॥

ॐ घृतवतीभुवनानामभिश्रियोर्व्वीपृत्थ्वीमधुदुघे सुपेशसा। द्यावापृथिवीव्वरुणस्यधर्म्मणाव्विष्कभितेअजरे-भूरिरेतसा॥

> नवनीतसमुत्पन्नं सर्वसन्तोषकारकम।
> घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्।।
> गणेशाम्बिकाभ्यां नमः घृत स्नानं समर्पयामि।

मधु-स्नानम्—

ॐ मधुव्वाता ऽऋतायते मधु क्षरन्ति सिन्धवः। माद्धवीर्न्नः सन्त्वोषधीः। मधु नक्तमुतोषसो मधुमत्पार्थिवᳬ रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो व्वनस्पतिर्म्मधुमाँ ऽअस्तु सूर्य्यः। माध्दवीर्ग्गावो भवन्तु नः॥

ॐ स्वाहा॑म॒रूद्भि॑ः। परि॑श्श्रीयस्वदि॒वश्स॒ᳫं॒-स्पृर्श॑स्पपाहि॥ मधु॒मधु॒मधु॑।

पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु। तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।।

स्नानम्—

ॐ व्वरु॑णस्यो॒त्तम्भ॑नमसि॒व्वरु॑णस्य स्क्कम्भ॒सर्ज्जी॑-नीस्त्थो॒व्वरु॑णस्यऽ-ऋत॒सद॑न्यसि॒व्वरु॑णस्यऽऋत॒सद॑न-मसि॒ व्वरु॑णस्यऽऋत॒सद॑न॒मासी॑द।

ॐ द्रुपदादि॑वमुमुचा॒नश्‌ स्वि॒न्नश्‌ स्ना॒तोमला॑दिव। पूतम्पवि॒त्रेणे॒वाज्ज्य॒ मार्पः॑ शुन्धन्तु॒मैन॑सश्‌॥

गणेशाम्बिकाभ्यां नमः मधुस्नानं समर्पयामि।

शर्करा-स्नानम्—

ॐ अ॒पाᳫं रस॒मुद्द्व॑यस॒ ᳫं सूर्ये॒सन्तᳫं॑ स॒माहि॑तम्। अ॒पा॒ ᳫं रस॑स्ययोरस॒स्तंव्वो॑ गृह्णाम्म्यु॒त्त॒मर्मु॑पया॒ मर्गृ॑हीतो॒ सीन्द्रा॑यत्वा॒ जुष्टङ्गृह्णाम्म्ये॒षते॒ योनि॒ रिन्द्रा॑यत्त्वा॒ जुष्ट॑तमम्॥

ॐ स्वादुः पवस्वादि व्यासजन्नमने स्वादुरिन्द्राय सुहवीत तुमम्मने स्वादूर्मासस्त्रा यत्व रुपाय वायवे बृहस्पते मधुमा अक्षाब्भ्यः।

इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम्।
मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम्।।
अन्नानि मिष्टा नियथा भवन्ति तृप्तिं तथा देव गणा लभन्ते।
तां शर्करा देव शशि प्रभां तथा स्नानाय दत्तं मधुरं गृहाण।।

गणेशाम्बिकाभ्यां नमः शर्करा स्नानं समर्पयामि।

पञ्चामृत-स्नानम्—

ॐ पञ्चनद्यः सरस्वती मपि यन्ति सस्त्रोतसः। सरस्वती तु पञ्चधा सो देशे भवत्सरित्॥

ॐ आप्प्यायस्व समेतुतेव्विश्श्वतः सोमव्वृष्ण्ण्यम्। भवाव्वाजस्यसङ्गथे॥

ॐ ऊर्क्कच्चमे सूनृताचमे पयश्च्चमे रसश्च्चमे घृतञ्च मे मधुचमे सग्ग्धिश्च्चमे सपीतिश्च्चमे कृषिश्च्चमे व्वृष्टिश्च्चमे जैत्रञ्चमऽ औद्भिद्यञ्चमे यज्ञेन कल्पन्ताम्॥

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे।।
पञ्चामृतं मयानीतं पयो दधि घृतं मधु।
शर्करया समायुक्तं स्नानार्थं प्रतिगृह्यताम्।।

गणेशाम्बिकाभ्यां नमः पञ्चामृतस्नानं समर्पयामि।

गन्धोदक-स्नानम्—

ॐ अꣳशुनाते। ऽअꣳशुः पृच्च्यताम्परुषापरुः। गन्धस्ते सोमम वतु मदाय रसो अच्च्युतः॥

ॐ त्वाङ्गन्धर्व्वाऽअखनँस्त्वा मिन्द्रस्त्वाम्बृहस्पतिः। त्वामोषधे सोमो राजाव्विद्वान्यक्ष्मादमुच्च्यत्॥

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्क्षन्न्पुरुषञ्जातमग्ग्रतः। तेन देवाऽअयजन्त साद्ध्याऽऋषयश्च्चये॥

ॐ प्रमुञ्चधन्वनस्त्वमुभयो रात्त्क्न्योर्ज्ज्याम्। याश्च्चते हस्तऽइषवः पराताभगवोव्वप॥

गन्धर्व्वस्त्त्वा व्विश्श्वावसुः परिदधातुव्विश्श्वस्या-रिष्ट्यैयजमानस्य परिधिरस्यग्ग्निरिडऽईडितः॥ इन्द्रस्य बाहुरसिदक्षिणोव्विश्श्वस्यारिष्ट् यैयजमानस्य परिधिरस्यग्ग्नि रिडऽईडितः। मित्रा वरुणौत्त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा विश्श्वस्या रिष्ट्यै यजमानस्य परिधिरस्य ग्ग्निरिड ईडितः॥

नाना सुगन्धितं द्रव्यं चन्दनं रजनीयुतम्।
गन्धोदकं मया दत्तं स्नानार्थं प्रतिगृह्यताम्॥
मलयाचल सम्भूतं चन्दनेन विनिःसृतम्।
इदं गन्धोदकं स्नानं कुङ्कुमाक्तं च गृह्यताम॥

गणेशाम्बिकाभ्यां नमः गन्धोदकस्नानं समर्पयामि।

तीर्थोदक-स्नानम्—

ॐ ये तीर्त्थानि प्रचरन्ति सृकाहस्तानिषङ्गिणः। तेषां ॐ सहस्त्र योजनेऽव धन्न्वानितन्न्मसि॥

ॐ सप्प्तास्यासन्न्परिधयस्त्रिः सप्प्तसमिधः कृताः। देवायद्यज्ञन्तन्न्वानाऽअबध्नन्न्पुरुषम्प्पशुम्॥

गंगा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा।
कावेरी सरयू महेन्द्र तनया कर्मणवती वेदिका॥
क्षिप्रा वेत्रवती महासुर नदी ख्याता च या गण्डकी।
पूर्णा पुण्यजलैर्समुद्र सहिता स्नानं सदा मङ्गलम्॥
गङ्गा च यमुना चैव गोदावरी सरस्वती।
नर्मदा सिन्धु कावेरी स्नानार्थं प्रतिगृह्यताम्॥

गणेशाम्बिकाभ्यां नमः तीर्थोदकस्नानं समर्पयामि।

शुद्धोदक-स्नानम्—

ॐ शुद्धवालः सर्व्व शुद्धवालो मणि वाल स्तऽआश्विनाः श्येतः श्येताऽक्षोरुणस्ते रुद्राय पशु पतये कर्णायामाऽ अवलिप्ता रौद्रा नभो रुपाः पार्ज्जन्याः॥

ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणायचक्षसे॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननो घृतप्वः पुनन्तु। विश्वꣳ हिरिप्रम्प्रवहन्तिदेवी-रुदिदाभ्यः शुचिरा पूतऽएमि। दीक्षातपसोस्तनूरसिता त्वांशिवा ꣳ शग्ग्मामपरिदधे भद्रं व्वर्णम्पुष्यन्॥

ॐ शन्नो देवी रभिष्टयऽआपोभवन्तु पीतये। शंय्योरभिस्रवन्तुनः॥

ॐ असौयस्ताम्रोऽअरुणऽउत- बभ्रुः सुमङ्गलः ये चैन ꣳ रुद्राऽ अभितोदिक्षुश्रिताः सहस्रशोऽवैषा ꣳ हेडऽईमहे॥

ॐ वाचन्ते शुन्धामिप्प्राणन्तेशुन्धामिचक्षुस्ते शुन्धामिश्रोत्रन्ते शुन्धामि नाभिन्ते शुन्धामिमेढ्रन्ते शुन्धामि पायुन्ते शुन्धामिचरित्राँस्तेशुन्धामि॥

नमो हिरण्य गर्भाय हिरण्यकवचाय च।
नमो ब्रह्मस्वरूपाय स्नापयामि शुभैः जलैः॥

मन्दाकिन्यास्तु यद्वारि सर्व पाप हरं शुभम्।
तदिदं कल्पितं तुभ्यं स्नानार्थं प्रतिगृह्यताम्।।
गणेशाम्बिकाभ्यां नमः शुद्धोदकस्नानं समर्पयामि।

वस्त्रम्—

ॐ तस्माद्यज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे।
छन्दा ँ सिजज्ञिरेततस्माद्यजुस्तस्मादजायत॥

ॐ सुजातो ज्ज्योतिषा सह शर्म्म व्वरूथमासदत्स्वः
व्वासो ऽअग्ने व्विश्श्वरूप ँ संव्ययस्व व्विभावसो॥

ॐ ह ँ सः शुचिषद्वसुरन्तरिक्ष सद्धोताव्वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद् व्योमस दब्जागोजाऽऋतजाऽअद्रिजा-
ऽऋतम्बृहत॥

ॐ युवासुवासा परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः।
तं धीरासः कवयऽउन्नयन्ति स्वाध्यो मनसा देवयन्तः॥

ॐ असौयोऽवसर्प्पतिनीलग्ग्रीवो व्विलोहितः।
उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्टो मृडयाति नः॥

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मिराष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे।।
शीत-वातोष्ण संत्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्रमतः शान्तिं प्रयच्छ मे।।
सर्वभूताधिके सौम्ये लोकलज्जा निवारणे।
मयोपपादिते तुभ्यं गृह्येतां वाससी त्वया।।
गणेशाम्बिकाभ्यां नमः वस्त्रं समर्पयामि। वस्त्रान्ते आचमनीयं जलं समपर्यामि।

यज्ञोपवीतम्—

ॐ तस्मादश्वाऽअजायन्तये केचोभयादतः।
गावो हजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः॥

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्वि विसीमतः सुरुचो व्वेनऽआवः। स बुध्न्याऽउपमा अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः॥

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि॥

ॐ नमोऽस्तुनीलग्रीवाय सहस्राक्षाय मीढुषे।
अथोये ऽअस्य सत्त्वानो ऽहन्तेभ्यो ऽकरन्नमः॥

स्वर्णसूत्रमयं दिव्यं ब्रह्मणा निर्मितं पुरा।
उपवीतं मया दत्तं गृहाण परमेश्वर॥
नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं मया दत्तं गृहाण परमेश्वर॥

गणेशाम्बिकाभ्यां नमः यज्ञोपवीतं समर्पयामि तदन्ते द्विराचमनीयं जलं समर्पयामि।

उपवस्त्रम्—

ॐ सुजातो ज्ज्योतिषा सह शर्म्म व्वरुथमासदत्स्वः। व्वासोऽअग्ने व्विश्वरूप ँ संव्ययस्व व्विभावसो॥

ॐ उपास्मै गायतानरः पवमानायेन्दवे। अभिदेवाँ२ इयक्षते।

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम्। पशूँस्ताँश्चक्क्रेव्वायव्या नारण्णयाग्ग्राम्म्याश्च्चये।

ॐ असौयोऽव्वसर्प्पति नीलग्ग्रीवोविलोहितः। उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्युः सदृष्ट्टोमृडयातिनः।

ॐ व्वसोः पवित्त्रमसि शतधारं व्वसोः पवित्त्रमसि सहस्त्रधारम्। देवस्त्वा सविता पुनातु व्वसोः पवित्त्रेण शतधरेण सुप्प्वा कामधुक्षः॥

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे॥
शीतवातोष्ण संत्राणं लज्जाया रक्षणं परम्।
देहालङ्करणं वस्त्र मतः शान्तिं प्रयच्छ मे॥
उपवस्त्रं प्रयच्छामि देवाय परमात्मने।
भक्त्या समर्पितं देव प्रसीद परमेश्वर॥
गणेशाम्बिकाभ्यां नमः उपवस्त्रं समर्पयामि तदन्ते जलं समर्पयामि।

चन्दनम्—

ॐ त्वां गन्धर्व्वा ऽअखनँस्त्वामिन्द्रस्त्वां बृहस्प्पतिः त्वामोषधे सोमो राजा व्विद्वान्यक्ष्मादमुच्च्यत॥

ॐ तंय्यज्ञम्बर्हिषिप्प्रौक्क्षन् पुरुषञ्जात मग्ग्रतः॥
तेन देवाऽअयजन्त साध्याऽऋषयश्चये।

ॐ प्रमुञ्च धन्न्वनस्त्वमुभयोरात्क्न्योर्ज्ज्याम्॥
याश्च्च ते हस्तऽइषवः परातार्भगवोव्वप॥

ॐ तरणिर्व्विश्श्वदर्शतो ज्ज्योतिष्कृदसि सूर्य्य। व्विश्श्वमाभासिरोचनम्।

ॐ नमः श्श्वब्भ्यः श्श्वपतिब्भ्यश्श्चवो नमो नमो भवाय च रुद्राय च नमः शर्व्वायचपशुपतये च नमो

नीलग्रीवाय चशिति कण्ठाय च नमः॥

ॐ युञ्जन्तिब्रध्नमरुषञ्चरन्तम्परितस्त्थुषः॥
रोचन्तेरोचनादिवि॥

युञ्जन्त्यस्यकाम्म्या हरी विपक्क्षसारथैं। शोणा धृष्ण्णूनृवा हसा॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम्॥
श्री खण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्॥
सुगन्धं चन्दनं दिव्यं मयादत्तं तव प्रभो।
भक्त्या परमया शम्भो सुभगं कुरू मां भव॥

गणेशाम्बिकाभ्यां नमः चन्दनं समर्पयामि।

अक्षतम्—

ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽअधूषत। अस्तौषत स्वभानवो विप्रा नविष्ठया मती योजान्विन्द्र ते हरी॥

ॐ नमस्तक्षभ्योरथकारेभ्यश्श्चवो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्श्चवो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्श्चवो नमो नमः श्श्वनिभ्योमृगयुभ्य श्श्चवो नमो नमः॥

ॐ व्रीहयश्च्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्ल्वाश्च मे प्रियङ्गवश्च्च मेऽणवश्च्च मे श्यामाकाश्च्च मे नीवाराश्च्च मे गोधूमाश्च्च मे मसूराश्च्च मे यज्ञेन कल्प्पन्ताम्॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीय।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥

अक्षताश्च सुरश्रेष्ठाः कुङ्कुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर॥

अक्षतान् निर्मलान् शुद्धान् मुक्ताफलसमन्वितान्।
गृहाणेतान् महादेवि देहि मे निर्मलां धियम्॥

गणेशाम्बिकाभ्यां नमः अक्षतान् समर्पयामि।

पुष्पम्—

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पाᳬसुरे स्वाहा॥

ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः।
अश्वाऽइव सजित्वरीर्वीरुधः पारयिष्ण्वः॥

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखङ्किमस्यासीत्किं बाहु किमूरू पादा उच्येते॥

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
मनैनु बभ्रूणामहᳬशतन्धामानि सप्त च॥

ॐ नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कुल्याय च नमः शष्प्याय च फेन्याय च नमः॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीय।
पशूनाᳬरूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा॥

ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः॥
माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम॥
मन्दार परिजातादि पाटली केतकानि च।
जाती चम्पक पुष्पाणि गृहाणेमानि शोभने॥

गणेशाम्बिकाभ्यां नमः पुष्पं समर्पयामि।

पुष्पमाला—

ॐ ओषधीः प्रतिमोदध्वं पुष्पवतीः प्रसूवरीः।
अश्वा ऽइव सजित्त्वरीर्वीरुधः पारयिष्ण्वः॥

ॐ द्याम्मालेखीरन्तरिक्षम्मा हिंसीः पृथिव्या सम्भव।
अयंहि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाय॥
अतस्त्वन्देव वनस्पते शतवल्शो विरोह सहस्रवल्शा विवयं रुहेम॥

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले॥
पत्रं पुष्पं फलं तोयं रत्नानि विविधानि च।
गृहाणार्घ्यं मया दत्तं देहि मे वाञ्छितं फलम्॥
मन्दार पारिजातादि पाटली केतकानि च।
जाती चम्पक पुष्पाणि गृहाणेमानि शोभनम्॥
बन्धूककाञ्चन निभं रुचिराक्षमालां,
पाशाङ्कुशौ च वरदां निज बाहुदण्डैः।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्र-
मर्धाम्बिकेशमनिशं वपुराश्रयामि॥

गणेशाम्बिकाभ्यां नमः पुष्पमालां समर्पयामि।

दूर्वा—

ॐ काण्डात् काण्डात् प्ररोहन्ति परुषः परुषस्परि।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च॥

ॐ हिरण्यरूपा ऽउषसो विरोक ऽउभाविन्द्रा ऽउदिथः सूर्यश्च। आरोहतं वरुण मित्रगर्त्त ततश्चक्षाथा मदितिं दितिं च मित्रोऽसिवरुणोऽसि॥

ॐ या शतेन प्रतनोषिसहस्रेण विरोहसि।
तस्यास्ते देवीष्टके विधेम हविषावयम्॥

दूर्वाङ्कुरान् सुहरितानमृतान् मङ्गल प्रदान्।
आनीतास्त्व पूजार्थं गृहाण गणनायक॥

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आ वह॥

विष्णवादि सर्वदेवानां प्रियां सर्व सुशोभनाम्।
क्षीर सागर सम्भूते दूर्वां स्वीकुरु सर्वदा॥

विष्वादि सर्वदेवानां दुर्वेत्वं प्रीतिदा सदा।
क्षीर सागर सम्भूते वंश वृद्धि करी भव॥

दूर्वेध्यमृत सम्पन्ने शतमुलेशं तां कुरु।
शतं पातक संहन्त्री शतमायुष्यवर्धिनि॥

गणेशाम्बिकाभ्यां नमः दुर्वाङ्कुरान् समर्पयामि।

बिल्वपत्रम्—

ॐ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरुथिने च नम श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चा। हनन्याय च॥

ॐ शिवो भव प्रजाभ्यो मानुषी भ्यस्त्व मंङ्गिरः। माद्यावा पृथिवी ऽअभिशौंचीर्म्मान्तरिक्षम्मा व्वनस्प्पतीन्॥

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम्।
त्रिजन्म पाप संहारं बिल्व पत्रं शिवार्पणम्॥

त्रिशाखैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः।
शिव पूजां करिष्यामि बिल्व पत्रं शिवार्पणम्॥

शालग्रामशिलामेकां विप्राणां जातु अर्पयेत्।
सोमयज्ञ महापुण्यं बिल्व पत्रं शिवार्पणम्॥

दन्ति कोटि सहस्त्राणि वाजपेयशतानि च।
कोटि कन्या महादनं बिल्व पत्रं शिवार्पणम्॥

लक्ष्म्याः स्तनत उत्पन्नं महादेवस्य च प्रियम्।
बिल्व वृक्षं प्रयच्छामि बिल्व पत्रं शिवार्पणम्॥

दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनम्।
अघोर पाप संहारं बिल्व पत्रं शिवार्पणम्॥

मूलतो ब्रह्मरूपाय मध्यतो विष्णु रूपिणे।
अग्रतः शिवरुपाय बिल्व पत्रं शिवार्पणम्॥

गणेशाम्बिकाभ्यां नमः बिल्वपत्रं समर्पयामि।

शमीपत्रम्—

ॐ शन्नो देवीरभिष्ट्टयऽ आपो भवन्तु पीतये॥ शंय्यो रभिस्त्रवन्तुनः॥१॥

ॐ अग्निर्म्मूर्द्धा। दिवः ककुत्पतिः पृथिव्याऽअयम्॥ अपा ँ रेता ँ सिजिन्वति॥२॥

ॐ यतो यतः समीहसे ततो नो ऽअभयङ्कुरू। शन्नः कुरू प्रजाब्भ्योऽभयन्नः पशुब्भ्यः॥३॥

ॐ अमङ्गलानां शमनीं शमनीं दुष्कृतस्य च।
दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभाम्।।

गणेशाम्बिकाभ्यां नमः शमीपत्रं समर्पयामि।

धतूरा—

ॐ त्र्यम्बकं य्यजामहे सुगन्धिम्पुष्टि वर्द्धनम्।।
उर्व्वारुक मिव बन्धनान्मृत्यो र्म्मुक्षीय मामृतात्।।
त्र्यम्बकं य्यजामहे सुगन्धिम्पतिवेदनम्।।
उर्व्वारुकमिव बन्धना दितो मुक्षीय मामुतः।।१।।

ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च।।२।।

ॐ उदुत्यञ्जात वेंद सन्देवं व्वहन्ति केतवः।। दृशे विश्वाय सूर्य्यम्।।३।।

ॐ कार्षिरसि समुद्द्रस्य त्वाक्षित्त्या उन्नयामि।। समापोऽअद्भिर्ग्गमत समोषधीभिरोषधीः।।४।।

विजया—

ॐ व्विज्जयन्धनुः कपर्द्दिनो विशल्ल्यो बाण वाँ २।। ऽउत अनें शन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः।।१।।

ॐ यत्पुरुषं व्यदधुः कतिधाव्व्यकल्प्पयन्। मुखङ्किमस्या सीत्किम्बाहू किमूरू पादा उच्च्येते।।२।।

ॐ शिवोभव। पप्रजाब्भ्यो मानुषी ब्भ्यस्त्वमङ्गिरः।। माद्यावा पृथिवीऽअभिशौचीर्म्मान्तरिक्ष म्माव्वन-स्प्पतीन्।।३।।

तुलसी हेमरूपां च रत्न रूपां च मञ्जरीम्।
भव मोक्ष प्रदां तुभ्यं समर्पयामि हरिप्रियाम्॥

सिन्दूरम्—

ॐ सिन्धोरिव प्प्राद्ध्वने शूघनासो व्वातं प्रमियः पतयन्ति यह्वाः॥ घृतस्य धारा ऽअरुषो न व्वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः॥१॥

ॐ सन्नः सिन्धुरवभृथायोद्यतः समुद्द्रोब्भ्य वह्ह्रियमाणः सलिलः प्प्रप्लुतोययोरोजसास्कभिता रजा ॐ सि व्वीर्ब्भि भिर्व्वीरतं माशविष्ठा॥ यापत्यैतेऽअप्प्रतीता सहोभिर्व्विष्ष्णूऽअगन्न्वरूणा पूर्व्वहुतौ॥२॥

ॐ अहिरिवभोगैः पर्य्येति बाहुंज्यायां हेतिं प्परिबाधमानः। हस्तग्घ्नो व्विश्श्वा व्वयुनानि व्विद्वान्पुमान्पुमांॐ संप्परिपातु व्विश्वतः॥३॥

सिन्दूरं शोभनं रक्तं सौभाग्यं सुखवर्धनम्।
शुभदं कामदं चैव सिन्दूरं प्रतिगृह्यताम्॥४॥
सिन्दूरानि सुगन्धीनि द्रव्याणि विवधानि च।
मया दत्तानि लेपार्थं गृहाण परमेश्वरः॥५॥
सिन्दूरं रक्तवर्णं च सिन्दूर तिलकं प्रिये।
भक्त्या दत्तं मया देवि सिन्दूरं प्रतिगृह्यताम्॥६॥

गणेशाम्बिकाभ्यां नमः सिन्दूरं समर्पयामि।

नानापरिमल द्रव्याणि—

ॐ अहिंरिव भोगैः पर्य्येति बाहुंज्यायाहेतिं प्परिबाधमानः। हस्तघ्नोव्विश्श्वा व्वयुनानि व्विद्वान्पुमान्पुमाँ सं प्परिपातु व्विश्वतः॥

ॐ नाना हि वां देवहितं सदस्कृतं मा स सृक्षाथां परमे व्योमन्। सुरा त्वमसि शुष्मिणी सोम एष मा मा हिंसीः स्वां योनिमा विशन्ती॥

नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमम्।
अबीरनामकं चूर्णं गन्धं चारू प्रगृह्यताम्॥
अबीरं च गुलालं च चोवा चन्दनमेव च।
अबीरेणार्चितो देव अतः शान्तिं प्रयच्छमे॥

सुगन्धित द्रव्य—

ॐ अꣳशुना ते अꣳशुः पृच्यतां परुषा परूः।
गन्धस्ते सोममवतु मदाय रसो ऽअच्युतः॥
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारूकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

ॐ अहिंरिव भोगैः पर्य्येति बाहुंज्यायाहेतिं प्परिबाधमानः। हस्तघ्नोव्विश्श्वा व्वयुनानि व्विद्वान् पुमान पुमां सं प्परि पातु विश्वतः॥

ॐ गन्धर्व्वस्त्वाविश्श्वावसुः परिदधातु विश्श्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्गिनरिडईडितः। इन्द्रस्य बाहुरसिदक्षिणो व्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्गिनरिडईडितः। मित्त्राव्वरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा व्विश्श्वस्यारिष्ट्यै यजमानस्यपरिधिरस्यग्गिनरिडईडितः।

जननि चम्पकतैलमिदं पुरो मृगमदोऽयमयं पटवासकः।
सुरभिगन्धमिदं च चतुः समं सपदि सर्वमिदं प्रतिगृह्यताम्॥

तैलानि च सुगन्धीनि द्रव्याणि विविधानि च।
मया दत्तानि लेपार्थं गृहाण परमेश्वर॥
दिव्य गन्धसमायुक्तं मधुमरिमलाद्भुतम्।
गन्धद्रव्यमिदं भक्त्या दत्तं वै परिगृह्यताम्॥

गणेशाम्बिकाभ्यां नमः नाना परिमल द्रव्याणि समर्पयामि।

आभूषण—

ॐ हिरण्यरूपा उषसो व्विरोक उभाविन्द्रा उदिथः सूर्य्यश्च। आ रोहतं व्वरुण मित्र गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्रोऽसि व्वरुणोऽसि॥

ॐ स्वर्ण्ण घर्म्मः स्वाहा स्वर्ण्णार्कः स्वाहा स्वर्ण्ण शुक्रः स्वाहा स्वर्ण्ण ज्ज्योतिः स्वाहा स्वर्ण्ण सूर्य्यः स्वाहा॥

मातस्तवेमं मुकुटं हरिन्मणिप्रवालमुक्तामणिभिर्विराजितम्।
गारुत्मतैश्चाऽपि मनोहरं कृतं गृहाण मातः शिरसो विभूषणम्॥

धूपम्—

ॐ धूरसि धूर्व्व धूर्व्वन्तं धूर्व्व तं योऽस्मान् धूर्व्वति तं धूर्व्वयं व्वयं धूर्व्वामः। देवानामसि व्वह्नितम सस्नितमं पप्रितमंजुष्टतमं देवहूतमम्॥

ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरूतदस्य यद्वैश्यः पद्भ्याᳬ शूद्रोऽ अजायत॥

ॐ या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः तयास्मान्विश्वतस्त्व मयक्ष्मया परिभुज॥

ॐ नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमः॥

ॐ अश्श्वस्यत्त्वाव्वृष्ण्णः शक्क्नाधूपयामि देवयजने पृथिव्याः॥ मखयत्वाशीर्ष्णे॥ अश्श्वस्यत्वाव्वृष्ण्णः शक्नाधूपयामि देवयजने पृथिव्याः। मखायत्वामखस्यत्त्वा-शीर्ष्णे। अश्श्वस्यत्वाव्वृष्ण्ण शक्नाधूपयामिदेवयजनेपृथिव्या। मखायत्वामखस्यत्त्वा-शीर्ष्णे। मखायत्वामखस्यत्त्वाशीर्ष्णे॥

ॐ व्वसवस्त्वा धूपयन्तु गायत्रेणच्छन्द साङ्गिरस्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्या स्त्वाधूपयन्तु जागतेनच्छन्द साङ्गिरस्वादिद्वश्श्वेत्वा देवावैश्श्वा नराधूपयन्त्वानुष्टुभेनच्छन्द साङ्गिरस्व दिन्द्रस्त्वा धूपयतु व्वरूणस्त्वा धूपयतु व्विष्णुस्त्वा धूपयतु।

ॐ यः शुचिः प्रयतोभूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्॥
वनस्पतिरसोद्भूतो गन्धाढ्योगन्ध उत्तमः।
आघ्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यताम्॥

गणेशाम्बिकाभ्यां नमः नाना धूपमाघ्रापयामि।

दीपम्—

ॐ अग्निर्ज्ज्योति ज्ज्योतिरग्निः स्वाहा सूर्य्यो ज्ज्योतिर्ज्ज्योतिः सूर्य्यः स्वाहा। अग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा। ज्ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा॥

ॐ चन्द्रमा मनसोजातश्चक्षोः सूर्योऽअजायत। श्रोत्राद्वायुश्च-प्राणश्च मुखादग्निरजायत ॥

ॐ नमऽआशवे चाजिराय चनमः शीघ्र्याय च शीभ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥

ॐ अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्च्चसा वर्च्चस्वान्। सहस्रदाऽअसि सहस्रायत्वा ॥

ॐ शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च। शुक्रश्च ऽऋतपाश्चात्यंहाः ॥

ॐ परितेधन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो यऽइषुधिस्तवारेऽअस्मन्निधेहितम् ॥

ॐ स्वर्ण्ण घर्म्मः स्वाहा स्वर्णार्क्कः स्वाहा स्वर्ण्णशुक्रः स्वाहा स्वर्ण्णज्योतिः स्वाहा स्वर्ण्ण सूर्य्यः स्वाहा ॥

ॐ चन्द्रमाऽअप्प्स्वन्तरा सुपर्ण्णो धावते दिवि। रयिम्पिशङ्गम्बहुलम्पुरूस्पृहं हरिरेतिक निक्क्रदत् ॥

ॐ सरसिजनिलये सरोजहस्ते धवलतरांशुक गन्धमाल्यशोभे। भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे नि च देवीं मातरं श्रियं वासय मे कुले ॥

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां निरयाद् घोराद् दीपज्योतिर्नमोऽस्तु ते।।
दीपो ज्योतिः परं ब्रह्म दीपो ज्योतिर्जनार्दनः।
दीपो हरतु मे पापं पूजादीप नमोऽस्तु ते।।
शुभं करोतु कल्याणमारोग्यं सुखसम्पदाम्।
शत्रुबुद्धि विनाशं च दीपज्योतिर्नमोऽस्तु ते।।

गणेशाम्बिकाभ्यां नमः दीपम् दर्शयामि।

नैवेद्य—

ॐ नाभ्या ऽआसीदुन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ २ ऽअकल्पयन्।।
ॐ अवतत्त्य धनुष्ट्व ꣳ सहस्राक्ष्शतेषुधे।
निशीर्य्यशल्ल्यानाम्मुखा शिवोनं सुमना भव।।
ॐ नमो ज्ज्येष्ठायच कनिष्ठाय च नम पूर्वजाय।
चापरजाय च नमो मदध्यमाय चाप गल्भाय च।।
नमो जघन्न्याय च बुध्न्याय च।।
ॐ अन्नपतेन्नस्य नो देह्य नमीवस्यशुष्मिणः।
प्रप्रदातारन्तारिष ऊर्ज्जन्नोधेहिद्विपदे चतुष्पदे।।
ॐ स्वादिष्ठायामदिष्ठया पवस्वसोम धारया इन्द्रायपातवे सुतः।।
ॐ प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा।।

ॐ आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरण्यमयीं लक्ष्मी जातवेदो म आवह।।

ॐ शर्कराखण्ड खाद्यानि दधिक्षीर घृतानि च।
आहारं भक्ष्य भोज्यं च नैवेद्यं प्रतिगृह्यताम्।।
ॐ त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये।
गृहाण सुमुखो भूत्वा प्रसीद परमेश्वर।।
ॐ शर्करा घृत सयुक्तं मधुरं स्वादु चोत्तमम्।
उपहारं संयुक्तं नैवेद्यं प्रतिगृह्यताम्।।
गणेशाम्बिकाभ्यां नमः नैवेद्यं निवेदयामि।

करोद्वर्तन—

ॐ अ॒ꣳशुना॑ ते अ॒ꣳशुः पृच्यतां॒ परु॑षा॒ परूः॑।
ग॒न्धस्ते॒ सोम॑मवतु॒ मदा॑य॒ रसो॒ ऽअच्यु॑तः॥
ॐ सि॒ञ्चन्ति॒परि॑ षिञ्च॒न्त्युत्सि॑ञ्चन्तिपुनन्ति॑ च।
सुरा॑यै ब॒भ्र्वैमदे॑कि॒न्त्वोव॑दतिकि॒न्त्वः॥

चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम्।
करोद्वर्तनकं देव गृहाण परमेश्वर।।
नाना सुगन्धि द्रव्यं च चन्दनं रजनीयुतम्।
उद्वर्तनं मयादत्तं गृहाण परमेश्वर।।
करोद्वर्तनकं देवं सुगन्धैः परिवासितैः।
ईप्सितं मे वरं देहि परत्र च परां मतिम्।।
एलोशीर लवङ्गादि कर्पूर परिवासितम्।
प्राशनार्थे कृतं तोयं गृहाण गणनायक।।
शीतोदकैः पाणिमुखं पवित्रे प्रक्षाल्यलक्ष्मीश सुवर्णपात्रे।
मन्दारपुष्पायुत चन्दनेन हनूमदुद्वर्त्तनकं कुरुष्व।।
ॐ अ॒ꣳशुश्च॑मेर॒श्मिश्च॒मेऽदा॑भ्यश्च॒मेऽधि॑-
पतिश्च म॒ऽउपा॒ꣳशुश्च॑मेऽन्तर्या॒मश्च॑मऽऐन्द्रवा-

य॒वश्च्चमे मैत्रावरु॒णश्च्चमऽआश्श्विनश्च्चमेप्प्रति-प्र॒स्थानंश्च्चमेशुक्क्रश्च्चमेम॒न्थीच्चमे य॒ज्ञेन कल्पन्ताम्॥

गणेशाम्बिकाभ्यां नमः करोद्वर्तनार्थे चन्दनं निवेदयामि।

ऋतुफल—

ॐ याः फ॒लिनी॒र्य्याऽअफ॒लाऽअपुष्प्पा याश्श्च पुष्प्पिणीः बृह॒स्पति॑प्प्रसूता॒स्ता नो मुञ्चन्त्वꣳ हंसः॥

ॐ इ॒मा रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑क्षयद्वीराय॒ प्प्रभरामहे म॒तीः यथा॒ शमसंद् द्विप॒दे चतु॑ष्प्पदे॒ विश्वम्पु॒ष्ट्टङ्ग्रामेऽ अ॒स्मिन्ननातु॒रम्॥

ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरणमयीं लक्ष्मीं जातवेदो म आ वह॥
इदं फलं मया देव स्थापितं पुरतस्तव।
तेन मे सफला वाप्तिर्भवेज्जन्मनि जन्मनि॥
द्राक्षा-खर्जूर-कदली-पनसा-ऽऽम्र-कपितथकम्।
नारिकेलेषु-जम्ब्वादि-फलानि प्रतिगृह्यताम्॥

गणेशाम्बिकाभ्यां नमः ऋतुफलानि निवेदयामि।

ताम्बूल-पूंगीफल—

ॐ नम॑स्त॒ऽआयु॒धा॒यानातताय धृ॒ष्ष्णवे॑।
उ॒भाब्भ्या॑मुत ते॒ नमो॑ बा॒हुब्भ्या॒न्तव॒ धन्वने॥

ॐ यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत।
व्व॒स॒न्तो॒ऽस्यासी॒दाज्ज्यं॑ ग्री॒ष्ष्मऽइ॒ध्मः श॒रद्धविः॥

ॐ तां म ऽआवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योश्वान् विन्देयं पुरुषानहम्॥

ॐ उत स्मास्य द्रवतस्तुरण्यतः पर्णन्न व्वेरनुवाति प्रगर्द्धिनः। श्येनस्यैव ध्रजतोऽअङ्कसम्परिं दधिक्राव्र्णः सहोर्ज्जा तरित्रतः स्वाहा॥

ॐ पुर्णार्य च पर्ण्ण शदार्य च नम ऽउद्गुरमाणाय-चाभिग्घ्नते च नम ऽआखिदते च प्रखिदते च नम ऽइषुकृद्भ्यौधनुष्कृद्भ्यश्च वो नमोनमो वः किरिकेभ्यो देवाना ॐ हृदयेभ्यो नमो व्विचिन्वत्केभ्यो नमोव्विक्षिणत्केभ्योनम ऽआनिर्हतेभ्यः॥

ॐ इमारुद्रायतव सैकपद्दिनेक्षयद्वीरायप्रभरामहेमतीः। यथा शमसद्द्विपदे चतुष्पदे व्विश्वम्पुष्टङ्ग्रामेऽअस्मिन्नन्न-नातुरम्॥

ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः। देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम्॥

ॐ याः फलिनीर्या ऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पति प्रसूतास्ता नो मुञ्चन्त्वꣳ हसः॥

ॐ आर्द्रां यः करिणीं यष्टि सुवर्णा हेममालिनीम्।
सूर्यां हिरण्यमयीं लक्ष्मीं जातवेदो म आ वह॥

मुखे ते ताम्बूलं नयन युगले कज्जलं कला-ललाटे
काश्मीरं विलसति गलेमौक्तिकलता॥

स्फुरत् काञ्चीसाटी पृथुकटितटे हाटकमयी-भजामि
त्वां गौरीं नगपति किशोरीमविरताम्॥

पूगीफल महद्दिव्यं नागवल्लीदलैर्युतम्।
एलादिचूर्ण संयुक्तं ताम्बूलं प्रतिगृह्यताम्॥

नागवल्लीदलं चैव पूंगीफलं समन्वितम्।
कर्पूरेण समायुक्तं ताम्बूलं प्रतिगृह्यताम्।।

श्रीगणेशाम्बिकाभ्यां नमः ताम्बूलं समर्पयामि।

दक्षिणा—

ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रेभूतस्य जातः पतिरेक ऽआसीत्॥ सदाधारपृथिवीन्द्यामुते माङ्कस्मैदेवाय हविषाव्विधेम॥१॥

ॐ यद्दत्तँव्व्यत्परादानँव्व्यत्पूर्तंव्व्याश्च दक्क्षिणा तदग्निर्व्वैश्श्वकर्म्मणः स्वर्द्देवेषुनो दधत्॥२॥

ॐ हिरण्यरूपा ऽउषसो व्विरोक ऽउभाविन्द्रा ऽउदिथः सूर्य्यश्श्च। आरोहतं व्वरुण मित्त्र गर्त्तं ततश्श्चक्षाथामदितिं दितिं च मित्त्रोऽसि व्वरुणोऽसि॥३॥

ॐ स्वर्ण्णघर्म्मः स्वाहास्वर्ण्णार्क्कः स्वाहास्वर्ण्ण शुक्क्रः स्वाहास्वर्ण्णज्ज्योतिः स्वाहास्वर्ण्ण सूर्य्यः स्वाहा॥४॥

ॐ तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरूषानहम्।।

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसेः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे।।

ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्।।

दक्षिणा प्रेम सहिता यथा शक्ति समर्पिता।
अनन्त फल दामेनां गृहाण परमेश्वर।।

हिरण्यं गर्भ गर्भस्थं हेमबीजं विभावसोः।
दक्षिणा काञ्चनी देव स्थापिता मे तवाग्रतः।।

श्रीगणेशाम्बिकाभ्यां नमः दक्षिणा समर्पयामि।

आरार्तिक्यम्—

ॐ इदं ꣳ हुविः॥ प्रजननम्मेऽअस्तु दशवीरꣳ सर्व्वगण ꣳ स्वस्तयै॥ आत्मसनिंग्प्रजा सनिंपशु सनिं लोकसन्यंभयसनिं॥ अग्निः प्रजाम्बहुलाम्मे करोत्वन्नम्प योरेतो ऽअस्म्मा सुधत्त॥१॥

ॐ आ रात्रि पार्त्थिवꣳ रजः पितुरप्प्रायि धामभिः॥ दिवः सदा ꣳसि बृहती व्वि तिष्ठस ऽआ त्त्वेषं व्वर्त्तते तमः॥२॥

ॐ ये देवासो दिव्व्येका दशस्त्थ पृथिव्व्यामद्ध्येका दशस्त्थ॥ अप्प्सुक्षितोमहिनैका दशस्त्थते देवासो यज्ञमिमञ्जुषद्ध्वम्॥३॥

कदलीगर्भसम्भूतं कर्पूरं तु प्रदीपितम्।
आरार्तिकयमहं कुर्वे पश्य मे वरदो भव।।

चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम्।
आरार्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वर।।

कर्पूर गौरं करूणावतारं संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे भवं भवानी सहितं नमामि।।

श्रीगणेशाम्बिकाभ्यां नमः आरार्तिक्यं समर्पयामि।

मंत्र पुष्पाञ्जलिम्—

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः॥

ॐ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय महाराजाय नमः।।

ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायिै स्यात्, सार्वभौमः सार्वायुषान्तादा परार्धात्। पृथिव्यै समुद्रपर्यन्ताया ऽएकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्याऽवसन् गृहे। आविक्षितस्य कामप्रेर्विश्वे देवाः सभासद इति।।

ॐ व्विश्श्वतश्श्चक्षुरुत व्विश्श्वतोमुखो व्विश्श्वतो बाहुरुत व्विश्श्वतस्प्पात् सम्बाहुब्भ्यान्धमति सम्पतत्त्रै- द्यावाभूमी जनयन्देव ऽएकः।।

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात।।

सेवन्तिका-बकुल-चम्पक-पाटला-ऽब्जैः
पुन्नाग-जाति-करवीर-रसाल-पुष्पैः।
विल्व-प्रवाल-तुलसीदल-मञ्जरीभिः
त्वां पूजयामि जगदीदश्वरि! मे प्रसीद।।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्। करोति यद्यत् सकलं परस्मै नारायणायेति समर्पयेत्तत।।

श्रीगणेशाम्बिकाभ्यां नमः मन्त्रपुष्पाञ्जलिं समर्पयामि।

प्रदक्षिणा—

ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः तेषाᳬसहस्रयोजनेऽव धन्नवानि तन्मसि।

ॐ मानो॑ म॒हान्त॑मु॒त मानो॑ ऽअर्ब्भ॒कम्मान॒ ऽउक्ष॑न्त मु॒तमान॒ ऽउक्षि॒तम्। मानो॑ व्वधीः पि॒तर॒म्मोत मा॒तर॒म्मान॑ः प्रि॒यास्त॒न्वो॒ रुद्द्ररीरिषः॥

ॐ स॒प्तास्या॑ सन्नपरि॒धय॒स्त्रिः स॒प्तस॒मिधः॑ कृताः॥ दे॒वाय॒द्य॒ज्ञन्त॑ न्व॒ाना ऽअब॑ध्न॒न्पुरु॑षम्प॒शुम्॥

यानि कानि च पापानि ज्ञाता-ऽज्ञात कृतानि च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणा पदे पदे॥
पदे पदे या परिपूजकेभ्यः सद्योऽश्वमेधादि फलं ददाति।
तां सर्वपापक्षयहेतु भूतां प्रदक्षिणां ते परितः करोमि॥
यानि कानि च पापानि जन्मान्तर कृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे॥

श्रीगणेशाम्बिकाभ्यां नमः प्रदक्षिणां समर्पयामि।

विशेषार्घ्यम्—

रक्ष रक्ष गणाध्यक्ष! रक्ष त्रैलोक्यरक्षक।
भक्तानामभयं कर्ता त्राता भव भवार्णवात्॥
द्वैमातुर! कृपासिन्धो! षाण्मातुराग्रज प्रभो!।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥
अनेन सफलार्घ्येण सफलोऽस्तु सदा मम॥

प्रार्थना—

विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय
गौरीसुताय गणनाथ! नमो नमस्ते॥१॥

भक्तार्ति नाशनपराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय
भक्तप्रसन्नवरदाय नमो नमस्ते।।२।।
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः।
नमस्ते रूद्ररूपाय करि रूपाय ते नमः।।३।।
विश्वरूप-स्वरूपाय नमस्ते ब्रह्मचारिणे।
भक्तप्रियाय देवाय नमस्तुभ्यं विनायक।।४।।
लम्बोदर! नमस्तुभ्यं सततं मोदकप्रिय।
निर्विघ्नं कुरू मे देव! सर्वकार्येषु सर्वदा।।५।।
त्वां विघ्नशत्रुदलनेति च सुन्दरेति
भक्तप्रियेति सुखदेति फलप्रदेति।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति
तेभ्यो गणेश! वरदो भव नित्यमेव।।६।।
वन्दे देव गजाननं षडगुरूं वन्दे जगत्भूषणम।
वन्दे विघ्न विनायकं त्रिभुवनं वन्दे शुभ मङ्गलम्।।७।।
वन्दे ईश उमासुतं कविवरं वन्दे सुलम्बोदरम्।
वन्दे सिद्धि विनायकं शिवसुतं कुर्यात्सदा मङ्गलम्।।८।।
अलि मण्डल मण्डित गण्डतलम्
तिलकी कृत कोमल चन्द्रकरम्।
करिदारि विदारित बैरिबलम्
प्रणमामि गणाधिपतिं जटिलम्।।९।।

त्वं वैष्णवी शक्तिरनन्तवीर्या

विश्वस्य बीजं परमासि माया।

सम्मोहितं देवि समस्तमेतत्

त्वं वै प्रसन्ना भुवि मुक्तिहेतुः।।

गणेश पूजने कर्म यन्न्यूनमधिकं कृतम्।

तेन सर्वेण सर्वात्मा प्रसन्नोऽस्तु सदा मम।।

अनया पूजया गणेशाम्बिके प्रीयेतां न मम।।

।। इति गणेशाम्बिकयो पूजनम्।।

कलशस्थापनं पूजनम्

कुंकुम (रोली) से भूमि पर अष्टदल कमल बनाकर भूमि स्पर्श करें।

ॐ मही द्यौः पृथिवी च न ऽइमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः।।

अष्टदल कमल पर सप्तधान्य छींटे।

ॐ ओषधयः समवदन्त सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि।।

सप्तधान्य पर कलश स्थापित करें।

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्द्रयिः।।

कलश में जल भरें।

ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ-सर्ज्जनीस्त्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्यऽ-ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद।

ॐ त्वाङ्गन्धर्व्वाऽ अखनँस्त्वामिन्द्रस्त्वां बृहस्प्पतिः। त्वामोषधे सोमो राजा व्विद्वान्यक्ष्मादमुच्च्यत॥

कलश में सर्वोषधि डालें।

ॐ याऽओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगं पुरा। मनैनु बब्भ्रूणा महᳬ शतन्धामानि सप्त च॥

कलश में दूर्वा डालें।

ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषस्प्परि। एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च॥

कलश में पञ्चपल्लव डालें।

ॐ अश्श्वत्त्थे वो निषदनं पर्ण्णे वो व्वसतिष्कृता। गोभाज ऽइत्किलासथ यत्सनवथ पूरुषम्॥

कलश में कुश की पवित्री डालें।

ॐ पवित्रे स्थो व्वैष्ण्व्यौ सवितुर्व्वः प्रसव ऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। तस्य ते॥ पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्॥

कलश में सप्तमृत्तिका (सात जगह की मिट्टी) डालें।

ॐ स्योना पृथिवी नो भवान्नृक्षरा निवेशनी यच्छा नः शर्म्म सप्रथाः॥

कलश में सुपारी डालें।

ॐ याः फलिनीर्य्या ऽअफला ऽअपुष्प्पा याश्च पुष्प्पिणीः। बृहस्प्पति प्रसूतास्ता नो मुञ्चन्त्व ᳬ हसः॥

कलश में पञ्चरत्न डालें।

ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे॥

कलश में सुवर्ण (द्रव्य) डालें।

ॐ हिरण्यगर्भः समवर्त्तताग्ग्रे भूतस्य जातः पतिरेकऽआसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम्।

कलश में चारों ओर वस्त्र लपेट दें।

ॐ सुजातो ज्ज्योतिषा सह शर्म्म व्वरूथमासदत्स्वः व्वासोऽअग्ग्ने व्विश्वरूपꣳ संव्ययस्व व्विभावसो॥

कलश में पूर्ण पात्र रखें।

ॐ पूर्ण्णा दर्व्वि परापत सुपूर्ण्णा पुनरापत। व्वस्नेव व्विक्क्रीणावहा ऽइषमूर्ज्जꣳ शतक्क्रतो॥

कलश में लाल वस्त्र लपेटा हुआ नारियल रखें।

ॐ तत्वा यामि ब्ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्ब्भिः। अहेडमानो व्वरूणेह बोध्युरुशꣳ स मा न ऽआयुः प्प्रमोषीः॥

अस्मिन् कलशे वरूणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि स्थापयामि। ॐ अपां पतये वरूणाय नमः।

इसके बाद पञ्चोपचार पूजन करें। तीर्थों का आहवान करें।

कलाकला हि देवानां दानवानां कलाकलाः।
संगृह्य निर्मितो यस्मात् कलशस्तेन कथ्यतं॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥

कुक्षौ तु सागराः सप्त सप्तदीपा च मेदिनी।
अर्जुनी गोमती चैव चन्द्रभागा सरस्वती।।

कावेरी कृष्णवेणा च गङ्गा चैव महानदी।
तापी गोदावरी चैव माहेन्द्री नर्मदा तथा।।

नदाश्च विविधा जाता नद्यः सर्वास्तथापराः।
पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै।।

सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।।

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।
अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः।।

अत्र गायत्री सावित्री शान्तिः पुष्टि करी तथा।
आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पति र्य्यज्ञमिमं तनोत्वरिष्टं य्यज्ञ ꣳ समिमं दधातु । व्विश्वे देवास ऽइह मादयन्तामोइँप्प्रतिष्ठ । कलशे वरूणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु । ॐ वरूणाद्यावाहित देवताभ्यो नमः ।।

वरूणाद्यावाहित देवताओं का षोडशोपचार पूजन करें।

कलश प्रार्थना

देव दानव संवादे मथ्यमाने महोदधौ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्।।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिता।।

शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रूद्रा विश्वेदेवाः स पैतृकाः॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।
त्वत्प्रसादादिमं यज्ञं कर्तुं मीहे जलोद्भव॥
सान्निध्यं कुरू मे देव प्रसन्नो भव सर्वदा॥

नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥

घटे धान्या घाटे कनक कुलिसाद्याक्षतयुते
प्रपूर्णे श्री गङ्गाविमलयमुनानीर निकटे।
चतुर्वेदैः नित्यै सविधि सकलैःदेव दनुजैः
स्थिते श्री नीरीशं वरूणमधुनायामि शरणम्॥

हे पाश भूत वरूणनाथ जलेशदेव
दीने दया मयि विधेहि सदा सुदेव।
नातः परं किमपि प्रार्थयितव्य मस्ति
पुष्पाञ्जलिं ननु गृहाण सदा मदीयम्॥

पुण्याहवाचनम्

अवनिकृत जानुमण्डलः कमल-मुकुल सदृशमञ्जलिं शिरस्याधायाऽनन्तरं दक्षिणेन पाणिना स्वर्णपूर्ण कलशं धारयित्वा आशिषः प्रार्थयेत्।

पृथ्वी पर (वीरासन मुद्रा में) बैठकर कमल के सदृश अपनी अंजलि को सिर पर रखकर, दाहिने हाथ में सोने आदि के जलपूर्ण कलश को अपने सिर से स्पर्श कर यजमान अपने आशीर्वाद के लिए ब्राह्मणों से प्रार्थना करें।

यजमानः - दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च।
तेनाऽयुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु॥

विप्राः - **अस्तु दीर्घमायुः ।** (ब्राह्मण कहें)

यजमानः - **ॐ त्रीणि पुदा व्विचक्क्रमे व्विष्णुर्ग्गोपा ऽअदाब्भ्यः । अतो धर्म्माणि धारयन्॥**

तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ।

विप्राः - (ब्राह्मण कहें) **पुण्यं पुण्याहं दीर्घमायुरस्तु ।**

इसके बाद दो बार सिर से उस कलश का स्पर्श कर यथा स्थान रखें।

यजमानः - **ॐ शिवा आपः सन्तु ।** (यजमान ब्राह्मणों के साथ में जल दें)

विप्राः - (ब्राह्मण कहें) **सन्तु शिवा आपः ।**

यजमानः - **सौमनस्यमस्तु ।** (यजमान ब्राह्मणों के हाथ में पुष्प दें)

विप्राः - (ब्राह्मण कहें) **अस्तु सौमनस्यम् ।**

यजमानः - **अक्षतं चाऽरिष्टं चाऽस्तु ।** (यजमान ब्राह्मणों के हाथ में अक्षत दें)

विप्राः - (ब्राह्मण कहें) **अस्तवक्षतमरिष्टं च ।**

यजमानः - **गन्धाः पान्तु ।** (यजमान ब्राह्मणों को चन्दन दें)

विप्राः - (ब्राह्मण कहें) **सुमङ्गल्यं चाऽस्तु ।**

यजमानः - **अक्षताः पान्तु ।** (यजमान ब्राह्मणों के हाथ में अक्षत दें)

विप्राः - (ब्राह्मण कहें) **आयुष्यमस्तु ।**

यजमानः - **पुष्पाणि पान्तु ।** (यजमान ब्राह्मणों के हाथ में पुष्प दें)

विप्राः - (ब्राह्मण कहें) **सौश्रियमस्तु ।**

यजमानः - **सफलताम्बूलानि पान्तु ।** (यजमान ब्राह्मणों के हाथ में फल और ताम्बूल दें)

विप्राः - (ब्राह्मण कहें) **ऐश्वर्यमस्तु ।**

यजमानः - **दक्षिणाः पान्तु ।** (यजमान ब्राह्मणों के हाथ में दक्षिणा दें)

विप्राः - (ब्राह्मण कहें) **बहुदेयं चास्तु ।**

यजमानः - **पुनरत्राऽपः पान्तु ।** (यजमान ब्राह्मणों के हाथ में जल दें)

विप्राः - (ब्राह्मण कहें) **स्वर्चितमस्तु ।**

यजमानः - (यजमान कहें) **दीर्घमायुः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चाऽयुष्यं चाऽस्तु ।**

विप्राः - (ब्राह्मण कहे) **तथाऽस्तु ।**

यजमानः - (यजमान कहें) **यं कृत्वा सर्ववेद-यज्ञ-क्रियाकरण कर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग् - यजुः - सामा - ऽथर्वा - ऽशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ।**

विप्राः - (ब्राह्मण कहें) **वाच्यताम् ।**

करोतु स्वस्ति ते ब्रह्मा स्वस्ति चाऽपि द्विजातयः।
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा।।
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः।।
स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च।
स्वस्त्यस्त्वापादकेभ्यश्च सर्वेभ्यः स्वस्ति ते सदा।।
स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा।
करोतु स्वस्ति वेदादिर्नित्यं तव महामखे।।
लक्ष्मीररून्धती चैव कुरूतां स्वस्ति तेऽनघ।
असितो देवलश्चैव विश्वामित्रस्तथाऽङ्गिराः।।
वशिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा।
धाता विधाता लोकेशो दिशश्च सदिगीश्वराः।।

स्वस्ति तेऽद्य प्रयच्छन्तु कार्त्तिकेयश्च षण्मुखः।
विवस्वान् भगवान् स्वस्ति करोतु तव सर्वदा॥
दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः।
अधस्ताद् धरणीं चाऽसौ नागो धारयते हि यः॥
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु॥

ॐ द्रविणोदाः पिपीषति जुहोत प्प्रचतिष्ठत। नेष्ट्राद्दृतुभिरिष्ष्यत॥

ॐ सविता त्वा सवाना ᳪ सुवता मग्निर्ग्गृहपतीना ᳪ सोमो व्वनस्प्पतीनाम्। बृहस्प्पति व्वाचऽइन्द्रो-ज्ज्यैष्ठ्याय रूद्रः पशुब्भ्यो मित्त्रः सत्यो व्वरूणो धर्म्मपतीनाम्॥

ॐ न तद्रक्षा ᳪ सि न पिशाचास्तरन्ति देवानामोजः प्प्रथमज ᳪ ह्येतत्। यो बिभर्त्ति दाक्षायण ᳪ हिरण्य ᳪ स देवेषुकृणुते दीर्ग्घमायुः समनुष्ष्येषु कृणुते दीर्ग्घमायुः॥

ॐ उच्चा ते जातमन्धसो दिविसद्भूम्म्याददे। उग्र ᳪ शर्म्म महिश्श्रवः॥

ॐ उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ२॥ इयक्षते॥

यजमानः - (यजमान कहें)— व्रत-जप-नियम-तपः-स्वाध्याय-क्रतु-शम-दम-दया-दान-विशिष्टानां सर्वेषां ब्रह्मणानां मनः समाधीयताम्'।

विप्राः - (ब्राह्मण कहें) 'समाहितमनसः स्मः॥

यजमान : - (यजमान कहें) - 'प्रसीदन्तु भवन्तः'।

विप्राः - (ब्राह्मण कहें) - 'प्रसन्नाः स्मः'॥

इसके बाद यजमान बायें हाथ में अक्षत लेकर दाहिने से 'ॐ शान्ति रस्तु' से लेकर 'पुण्यं पुण्याहं वाचयिष्ये' तक वाक्य पढ़कर कलश पर दो-दो दाना अक्षत चढ़ावे। इन वाक्यों के मध्य 'ॐ अरिष्ट निरसन मस्तु' से लेकर 'तद्दूरे प्रतिहत मस्तु' तथा 'ॐ हताश्च ब्रह्मद्विष:' से 'ॐ शाम्यन्तू पद्रवा:' तक पढ़कर अलग-अलग कसोरे में अक्षत छोड़ें।

ॐ शान्तिरस्तु। ॐ पुष्टिरस्तु। ॐ तुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ अविघ्नमस्तु। ॐ आयुष्यमस्तु। ॐ आरोग्यमस्तु। ॐ शिवमस्तु। ॐ शिवं कर्माऽस्तु। ॐ कर्म समृद्धिरस्तु। ॐ धर्म समृद्धिरस्तु। ॐ वेद समृद्धिरस्तु। ॐ शास्त्रसमृद्धिरस्तु। ॐ धनधान्य समृद्धिरस्तु। ॐ इष्टसम्पदस्तु। (बहिः) ॐ अरिष्टनिरसनमस्तु । ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु। (अन्तः) ॐ यच्छ्रेयस्तदस्तु। ॐ उत्तरे कर्मणि निर्विघ्नमस्तु। ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु। ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम्। ॐ तिथि-करण-मूहुर्त-नक्षत्र-ग्रह-लग्न-सम्पदस्तु। ॐ तिथि-करण-मुहूर्त-नक्षत्र-ग्रह लग्नाधि-देवताः प्रीयन्ताम्। ॐ तिथि करणे-स मुहूर्ते स नक्षत्रे स ग्रहे स लग्ने साधि दैवते प्रीयेताम्। ॐ दुर्गापाञ्चाल्यौ प्रीयेताम्। ॐ अग्निपुरोगाः विश्वेदेवाः प्रीयन्ताम्। ॐ इन्द्रपुरोगाः मरूद्गणाः प्रीयन्ताम् । ॐ वसिष्ठ पुरोगाः ऋषिगणाः प्रीयन्ताम्। ॐ माहेश्वरी पुरोगा उमामातरः प्रीयन्ताम्। ॐ अरुन्धती पुरोगा एकपत्न्यः प्रीयन्ताम्। ॐ विष्णु पुरोगाः सर्वे देवाः प्रीयन्ताम्। ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्। ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्। ॐ श्री सरस्वत्यौ प्रीयेताम्। ॐ श्रद्धामेधे प्रीयेताम्। ॐ भगवती कात्यायनी प्रीयताम्। ॐ भगवती माहेश्वरी प्रीयताम्। ॐ भगवती ऋद्धिकरी प्रीयताम्। ॐ भगवती वृद्धिकारी

प्रीयताम्। ॐ भगवती पुष्टिकरी प्रीयताम्। ॐ भगवती तुष्टिकरी प्रीयताम्। ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्। ॐ सर्वाः कुलदेवताः प्रीयन्ताम्। ॐ सर्वाः ग्रामदेवताः प्रीयन्ताम्। ॐ सर्वा इष्टदेवताः प्रीयन्ताम्। (बहिः) ॐ हताश्च ब्रह्मद्विषः हताश्च परिपन्थिनः। ॐ हताश्च विघ्नकर्त्तारः। ॐ शत्रवः पराभवं यान्तु। ॐ शाम्यन्तु घोराणि। ॐ शाम्यन्तु पापानि। ॐ शाम्यन्त्वीतयः। ॐ शाम्यन्तूपद्रवाः। (अन्तः) ॐ शुभानि वर्धन्ताम्। ॐ शिवा आपः सन्तु। ॐ शिवा ऋतवः सन्तु। ॐ शिवा ओषधयः सन्तु। ॐ शिवा वनस्पतयः सन्तु। ॐ शिवा अतिथयः सन्तु। ॐ शिवा अग्नयः सन्तु। ॐ शिवा आहुतयः सन्तु। ॐ अहोरात्रे शिवे स्याताम्।

ॐ निकामे निकामे नः पर्ज्जन्यो व्वर्षतु फलवत्यो। न ऽओषधयः पच्च्यन्तां य्योगक्षेमो नः कल्प्पताम्॥

ॐ शुक्रा ऽङ्गारक-बुध-बृहस्पति-शनैश्चर-राहु-केतु सोम सहितादित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। ॐ भगवान् नारायणः प्रीयताम्। ॐ भगवान् पर्जन्यः प्रीयताम्। ॐ भगवान् स्वामी महासेनः प्रीयताम्। पुरोऽनुवाक्यया यत्पुण्यं तदस्तु याज्या-यत्पुण्यंतदस्तु वषटकारेणयत्पुण्यं तदस्तु। प्रातः सूर्योदये यत्पुण्यं तदस्तु। एतत्कल्याण युक्तं पुण्यं पुण्याहं वाचयिष्ये।

ब्राह्मणः - (ब्राह्मण कहें) वाच्यतामिति।

यजमानः - (यजमान कहें) -

ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम्।
वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः॥

भो ब्राह्मणाः मया क्रियमाणस्य अमुक याग कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।

विप्राः-(ब्राह्मण कहें) **ॐ पुण्याहं पुण्याहं पुण्याहम् ।**

यजमानः - (यजमान कहें) **ॐ अस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।**

विप्राः - (ब्राह्मण कहें) **ॐ पुण्याहं पुण्याहं पुण्याहम् ।**

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा॥

ॐ पृथिव्यामुद्धृतायां तु यत्कल्याणं पुरा कृतम्।
ऋषिभिः सिद्ध गन्धर्वै स्तत्कल्याणं ब्रुवन्तु नः।।

भो ब्राह्मणाः मया क्रियमाणस्य अमुक याग कर्मणः कल्याणं भवन्तो ब्रुवन्तु ।

यजमानः - (यजमान कहें)

विप्राः - (ब्राह्मण कहें) **ॐ कल्याणं कल्याणं कल्याणम् ।**

ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुप मादो नमतु ॥

यजमानः - (यजमान कहें)

ॐ सागरस्य तु ऋद्धिर्महालक्ष्म्यादिभिः कृता।
सम्पूर्णा सुप्रभावा च तामृद्धिं प्रब्रुवन्तु नः।।

भो ब्रह्मणाः मया क्रियमाणस्य अमुक याग कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ।

यजमानः-(ब्राह्मण कहें) **ॐ कर्मऋध्यताम् कर्मऋध्यताम् कर्मऋध्यताम् ।**

ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्या अध्यारुहामाविदाम देवान्त्स्वर्ज्योतिः॥

यजमानः - (यजमान कहें)

ॐ स्वस्तिस्तु या विनाशाख्या पुण्य कल्याण वृद्धिदा।
विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः।।

भो ब्राह्मणाः मया क्रियमाणस्य अमुक याग कर्मणः स्वस्ति भवन्तो ब्रुवन्तु ।

यजमानः - (ब्राह्मण कहें) ॐ आयुष्मते स्वस्ति-३

ॐ स्वस्ति न ऽइन्द्रो वृद्धश्श्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु।।

यजमानः - (यजमान कहें)

ॐ समुद्रमथनाज्जाता जगदानन्दकारिका।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः।।

भो ब्राह्मणाः मया क्रियमाणस्य अमुक याग कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु।।

यजमानः - (ब्राह्मण कहें) ॐ अस्तु श्रीः, अस्तु श्रीः, अस्तु श्रीः ।

ॐ श्रीश्श्च ते लक्ष्मीश्श्च पत्न्यावहोरात्त्रे पार्श्श्वे नक्षत्त्राणि रूपमश्श्विनौ व्यात्तम् । इष्णन्निषाणामुं म ऽइषाण सर्व्वलोकम्म ऽइषाण।।

यजमानः - (यजमान कहें)

ॐ मृकण्डसूनोरायुर्यद् ध्रुवलोमशयोस्तथा।
आयुषा तेन संयुक्ता जीवेम शरदः शतम्।।

विप्राः - (ब्राह्मण कहें) ॐ शतं जीवन्तु भवन्तः, शतं जीवन्तु भवन्तः, शतं जीवन्तु भवन्तः ।

ॐ शतमिन्नु शरदोऽअन्ति देवा यत्त्रा नश्श्चक्क्रा जरसन्तनूनाम् । पुत्त्रासो यत्त्र पितरो भवन्ति मा नो मध्ध्या रीरिषतायुर्ग्गन्तोः ।।

यजमानः - (यजमान कहें)

ॐ शिव-गौरी विवाहे या या श्रीरामे नृपात्मजे।
धनदस्य गृहेया श्रीरस्माकं साऽस्तु सद्मनि।।

विप्राः - (ब्राह्मण कहें) ॐ अस्तु श्रीः, ॐ अस्तु श्रीः, ॐ अस्तु श्रीः।

ॐ मनसः कामुमाकूतिं व्वाचः सत्यमशीय। पुशूनाᳫंरूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वहा॥

यजमानः - (यजमान कहें)

ॐ प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट्।
भगवाञ्छाश्वतो नित्यं नो वै रक्षन्तु सर्वतः।।

विप्राः - (ब्राह्मण कहें) ॐ भगवान् प्रजापतिः प्रीयताम्।

ॐ प्प्रजापते न त्वदेतान्यन्न्यो व्विश्श्वा रूपाणि परि ता बंभूव। यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्ष्य पितासावस्य पिता व्वयᳫं स्याम पतयो रयीणाᳫंस्वाहा॥

यजमानः-(यजमान कहें) आयुष्मते स्वस्तिमते यजमानाय दाशुषे।
श्रिये दत्ताषिशः सन्तु ऋत्विग्भिर्वेदपारगैः।।

विप्राः - (ब्राह्मणे कहें) ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति, ॐ आयुष्मते स्वस्ति।

ॐ प्रति पन्थामपद्महि स्वस्ति गामनेहसम् येन व्विश्श्वाः परि द्विषो व्वृणक्ति व्विन्दते व्वसु।

स्वस्तिवाचनसमृद्धिरस्तु।

संकल्प–

कृतस्य स्वस्तिवाचन कर्मणः समृद्ध्यर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्य इमां दक्षिणां विभज्य दातुमहमुत्सृजे ।

अभिषेकः

एकस्मिन् पात्रे वरूणोदकं गृहीत्वाऽविधुराश्चत्वारो ब्राह्मणाः दूर्वाऽम्रपल्लवैः सकुटुम्बं वामभागस्थितां पत्नीं यजमानं चाऽभिषिञ्चेयुः ।

तदनन्तर अविधुर (विवाहित, जिनकी पत्नी जीवित हो) ब्राह्मण हाथ में कलश के जल को किसी दूसरे पात्र में लेकर दूर्वा एवं आम्रपल्लव-सहित उस जल से (उत्तरमुख बैठे हुए या खड़े हुए) सपरिवार बायीं ओर पत्नी सहित यजमान के मस्तक पर मन्त्रों को पढ़ते हुए जल छिडकें ।

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ यतो यतः समीहसे ततो नो ऽअभयङ्कुरू । शन्नः कुरू प्प्रजाभ्योऽअभयन्नः पशुभ्यः ॥

षोडशमातृका पूजनम्

आग्नेय्यां प्रतिमास्वक्षत पुञ्जेषु वा प्राक्संस्थमुदक्संस्थं वा पीठोपरि मातृकास्थापनं कुर्यात् । तद्यथा—

(१) ॐ गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम । आहमजानि गर्ब्भधमा त्वमजासि गर्ब्भधम्॥ ॐ भूर्भुवः गणपतये नमः गणपतिमावाहयामि स्थापयामि ॥

(२) ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्प्रयन्त्स्वः। ॐ भूर्भुवः स्वः गौर्यै नमः गौरीमावाहयामि स्थापयामि ॥

(३) ॐ हिरण्णयरूपा ऽउषसो व्विरोकऽउभाविन्द्रा ऽउदिथः सूर्य्यश्च। आरोहतं व्वरुणमित्त्र गर्त्तं ततश्चक्षाथामदितिं दितिं च मित्त्रोऽसि व्वरुणोऽसि॥ ॐ भूर्भुवः स्वः पद्मायै नमः पद्मामावाहयामि स्थापयामि।

(४) ॐ निवेशनः सङ्गमनो व्वसूनां विश्वा रुपाभिचष्ट्टे शचीभिः। देव ऽइव सविता सत्यधर्म्मेन्द्रो न तस्त्थौ समरे पथीनाम्॥ ॐ भूर्भुवः स्वः शच्यै नमः शचीमावाहयामि स्थापयामि ।

(५) ॐ मेधां मे व्वरुणो ददातु मेधामग्निः प्प्रजापतिः । मेधामिन्द्रश्च व्वायुश्च मेधांधाताददातु मे स्वाहा॥ ॐ भूर्भुवः स्वः मेधायै नमः मेधामावहयामि स्थापयामि ।

(६) ॐ सविता त्त्वा सवानाꣳ सुवतामग्निर्ग्गृह पतीनाꣳ सोमो व्वनस्प्पतीनाम् । बृहस्प्पतिर्व्वाचऽइन्द्रो ज्ज्यैष्ठ्याय रुद्रः पशुब्भ्यो मित्त्रः सत्यो व्वरुणो धर्म्मपतीनाम् ॥ ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि ॥

(७) विज्ज्यन्धनुः कपर्दिनो व्विशल्यो बाणवाँ२॥ उत । अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः॥ ॐ भूर्भुवः स्वः विजयायै नमः विजयामावाहयामि स्थापयामि ॥

(८) बह्वीनां पिता बहुरस्य पुत्त्रश्चिश्चाकृणोति सम्मनावगत्य । इषुधिः सङ्काः पृतनाश्च सर्व्वाः पृष्ठे

निरुद्धो जयति प्रसूतः ॥ ॐ भूर्भुवः स्वः जयायै नमः जयामावाहयामि स्थापयामि ॥

(९) इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनां मरुतो यन्त्वग्रम् ॥ ॐ भूर्भुवः स्वः देवसेनायै नमः देवसेनामावाहयामि स्थापयामि ॥

(१०) ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ॥ ॐ भूर्भुवः स्वः स्वधायै नमः स्वाधामावाहयामि स्थापयामि ॥

(११) स्वाहा प्राणेभ्यः साधिपतिकेभ्यः पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा । दिवे स्वाहा सूर्याय स्वाहा ॥ ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहामावाहयामि स्थापयामि ॥

(१२) ॐ आपो ऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳ हि रिप्रं प्रवहन्ति देवी रुदिदाभ्यः शुचिरा पूत ऽएमि । दीक्षातपसोस्तनूरसितां त्वां शिवाꣳ शग्मां परिदधे भद्रं वर्णं पुष्यन् ॥ ॐ भूर्भुवः स्वः मातृभ्यो नमः मातृः आवाहयामि स्थापयामि ॥

(१३) रयिश्चमे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम्॥ ॐ भूर्भुवः स्वः लोकमातृभ्यो नमः लोकमातृः आवाहयामि स्थापयामि ॥

(१४) ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु । यस्मान्नऽऋते किञ्चनकर्म्मक्क्रियते तन्मेमनः शिवसङ्कल्प्पमस्तु ॥ ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि ॥

(१५) ॐ अग्नेन्न्यात्त्मनन्भिषजा तदश्विनात्त्मानमङ्गैः समधात्त्सरस्वती । इन्द्रस्य रूपᳬ शतमानमायुश्चन्द्रेण ज्ज्योतिरमृतन्दधानाᳬ ॥ ॐ भूर्भुवः स्वः पुष्ट्यै नमः पुष्टिमावाहयामि स्थापयामि।

(१६) ॐ जातवेदसे सुनवामसोममरातीयतो निर्दहातिवेदः। सनः पर्षदति दुर्गाणि विश्वा नावेवसिन्धुं दुरितात्यग्निः॥ ॐ भूर्भुवः स्वः तुष्ट्यै नमः तुष्टिमावाहयामि स्थापयामि।

(१७) ॐ प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा। श्रोत्त्राय स्वाहा व्वाचे स्वाहा मनसे स्वाहा॥ ॐ भुर्भूवः स्वः आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवतामावाहयामि स्थापयामि ॥

प्राणप्रतिष्ठापूर्वक सब का पूजन कर प्रार्थना करें।

प्रार्थना –

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
धृतिः पुष्टिस्तथा तुष्टिः आत्मनः कुलदेवताः।
गणेशेनाधिका ह्येता वृद्धौ पूज्यास्तु षोडश॥
आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम।
निर्विघ्नं सर्वकार्येषु कुरुध्वं स गणाधिपः॥

यथाशक्ति कृतार्चनेन गणेशपूर्वक षोडशमातरः प्रीयन्ताम् न मम।

वसोर्धारापूजनम्

आग्नेयां भितौ कुङ्कुमादिना बिन्दुकरणेनाऽलङ्करणं कृत्वाऽऽगामिमन्त्रं पठन् घृतेन सप्तधाराः प्राक्संस्था उदक्संस्था वा कुर्यात् ।

१. ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा॥ इति मन्त्रेण वसोर्धाराः कर्तव्या। "कामधुक्षः" इत्येतावता मन्त्रेण (धारामर्धभागेन) गुडेनैकीकरणम् प्रतिधारामेकैक-देवतामावाह्येत् ॥

२. ॐ मनसः काममाकूतिं व्वाचः सत्यमशीय पशूना ᳪ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा॥ ॐ भूर्भुवः स्वः श्रियै नमः श्रियमावाहयाभि स्थापयामि ।

३. श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं मऽइषाण सर्व्वलोकम्मऽइषाण ॥ ॐ भूर्भुवः स्वः लक्ष्म्यैः नमः लक्ष्मीमावाहयामि स्थापयामि ॥

४. ॐ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्ष-भिर्य्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ᳪ सस्तनूभिर्व्यशेमहि देवहितं य्यदायुः ॥ ॐ भूर्भुवः स्वः धृत्यै नमः धृतिमावाहयामि स्थापयामि ॥

५. ॐ मेधां मेव्वरुणो ददातु मेधामग्निः प्प्रजापतिः । मेधामिन्द्रश्च व्वायुश्च मेधां धाता ददातु मे स्वाहा॥ ॐ भूर्भुवः स्वः मेधायै नमः मेधामावाहयामि स्थापयामि ॥

६. प्राणाय स्वाहा ऽअपानाय स्वाहा व्यानाय स्वाहा । चक्षुषे स्वाहा श्रोत्राय स्वाहा ॥ वाचे स्वाहा

मनसे स्वाहा ॥ ॐ भूर्भुवः स्वः स्वाहायै नमः स्वाहामावाहयामि स्थापयामि ॥

७. ॐ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः पितरं च प्रयन्त्स्वः ॥ ॐ भूर्भुवः स्वः प्रज्ञायै नमः प्रज्ञामावाहयामि स्थापयामि ॥

८. पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवति। यज्ञं व्वष्टु धियावसुः। ॐ भूर्भुवः स्वः सरस्वत्यैनमः सरस्वतीमावाहयामि स्थापयामि ॥

प्राणप्रतिष्ठा कर सबका पूजन करके प्रार्थना करें।

प्रार्थना

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः।

यदङ्गत्वेन भो देव्यः! पूजिता विधिमार्गतः।
कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतुद्भवम् ।।

ॐ भूर्भुवः स्वः वसोर्धारा देवताभ्यो नमः प्रार्थना पूर्वकं नमस्कारान् समर्पयामि। अनया पूजया वसोर्धारा देवताः प्रीयन्तां न मम ॥

आयुष्यमन्त्र जपः

यदायुष्यं चिरं देवाः सप्त कल्पान्त जीविषु।
ददुस्तेनायुषा युक्ता जीवेम शरदः शतम् ।।

दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः।
अनन्तेनायुषा तेन जीवेम शरदः शतम् ।।

सत्यानि पञ्चभूतानि विनाशरहितानि च।
अविनाश्या युषा तद्वज्जीवेम शरदः शतम् ।।

ॐ आयुष्यं व्वर्च्चस्यꣳ रायस्पोष मौद्भिदम्। इदꣳहिरण्यं व्वर्च्चस्व ज्जैत्रायाविशता दुमाम् ॥

ॐ न तद्रक्षाᳬसि न पिशाचास्तरन्ति देवाना मोजः प्रथमजᳬ ह्येतत्। यो बिभर्त्ति दाक्षायणᳬ हिरण्यᳬ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥

ॐ यदाबध्नन् दाक्षायणा हिरण्यᳬ शतानी काय सुमनस्य मानाः तन्मऽआबध्नामि शत शारदाया युष्मान् जरदष्टिर्यथा सम्॥

अथ नान्दी[1] श्राद्धम्

1		
4	3	2

चित्र

पूर्व में किये हुए संकल्प के अनुसार नान्दीश्राद्ध करना चाहिए। पूर्व में विश्वेदेव के आसन के लिए उत्तराग्र कुशा रखें, तीन कुशासन दक्षिण से पूर्वाग्र रखें। जिसमें प्रथम आसन पर मातृ, पितामही और प्रपितामही तथा द्वितीय आसन पर पितृ, पितामह और प्रपितामह तथा तृतीय आसन पर सपत्नीक, मातामह, प्रमातामह और वृद्ध-प्रमातामह का आवाहन एवं पूजन करें।

पादप्रक्षालनम् – (चारों स्थान पर पैर धोने के लिये जल देवें) **ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः। ॐ मातृ पितामही प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः। ॐ पितृ पितामह प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं प्रादप्रक्षालनं वृद्धिः। ॐ मातामह प्रमातामह वृद्धप्रमाताभहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।**

१. अनस्मदवृद्धयशब्दानामरूपाणामगोत्रिणाम्।
अनाम्नामतिलाद्यैश्च नान्दीश्राद्धं च सव्यवत्॥

आसनदानम् – (चारों स्थानों पर कुशाओं का आसन देवें) **ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।। ॐ मातृ पितामही प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धेक्षणौ क्रियेतां तथा प्राप्नुवन्त्यो भवन्त्यः तथा प्राप्नुवामः। ॐ पितृ पितामह प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धे–क्षणौ क्रियेतां तथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः। ॐ मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इमे आसने वो नमो नमः, नान्दीश्राद्धेक्षणौ क्रियेतां तथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः।।**

गन्धादिदानम– (चारों स्थान पर गन्ध पुष्पादि देवें) **ॐ सत्यवसु-संज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्च नं (स्वाहा) सम्पद्यतां वृद्धिः। ॐ मातृ पितामही प्रपितामह्यः नान्दीमुख्यः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः । ॐ पितृ पितामह प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः । ॐ मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः ।।**

भोजननिष्क्रयदानम् – (चारों स्थान पर भोजन-निष्क्रय निमित्त दक्षिणा देवें) **ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्ता ऽऽमान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । ॐ मातृ पितामही प्रपितामह्यः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्ताऽऽमान्न निष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः । ॐ पितृ पितामह प्रपितामहाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्ताऽऽमान्न निष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ।**

ॐ मातामह-प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदं युग्म ब्राह्मण भोजन पर्याप्ताऽऽमान्न निष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ।।

स-क्षीरमवमुदकदानम् – (दूध, यव, जल में मिलाकर दाहिने हाथ में लेकर चारों स्थान पर पृथक्-पृथक् देवें) **ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दी मुखाः प्रीयन्ताम्। मातृ पितामही प्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम्। पितृ पितामह प्रपितामहाः नान्दीमुखाः प्रीयन्ताम्। मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः प्रीयन्ताम् ।।**

जलाऽक्षत-पुष्पप्रदानम् – (जल-अक्षत-पुष्प लेकर चारों स्थानों में चढ़ायें) **चतुर्थं स्थानेषु-शिवा आपः सन्तु इति जलम्। सौमनस्यमस्तु इति पुष्पम्। अक्षतं चाऽरिष्टं चाऽस्तु इत्यक्षतान् ।।**

जलधारादानम् - (चारों स्थानों पर अँगूठे की ओर से पूर्वाग्र जल की धारा देवें) **ॐ अघोराः पितरः सन्तु। इति पूर्वाग्रां जलधारां दद्यात्। इति सदाचारः।।**

आशीः प्रार्थना – (यजमान हाथ जोड़ कर प्रार्थना करे) **ॐ गोत्रन्नो वर्धताम् दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद् बहु देयं च नोऽस्तु। अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु।**

ब्राह्मणाः – **सन्त्वेताः सत्या आशिष इति।**

ततो दक्षिणादानम्– ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्यनान्दीश्राद्धस्य फलप्रतिष्ठा सिद्ध्यर्थं द्राक्षा-ऽऽमलक यव मूल निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे। ॐ मातृ पितामही प्रपितामह्यः नान्दी मुख्यः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थं द्राक्षाऽऽमलक यवमूल-

निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे। ॐ मातामह प्रमातामह वृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवः स्वः कृतस्य नान्दीश्राद्धस्य फल प्रतिष्ठा सिद्ध्यर्थं द्राक्षाऽऽमलक यवमूल-निष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।।

ॐ उपास्मै गायता नरः पवमाना येन्दवे । अभि देवाँ२ ॥ इयक्षते ।

ॐ इडामग्ग्ने पुरूदꣳ सꣳ सनिङ्गोः शश्वत्तमꣳ हवमानाय साध । स्यान्नः सूनुस्तनयो विजावाग्ग्ने सा ते सुमतिर्भूत्त्वस्मे ॥

यजमान कहे – **अनेन नान्दीश्राद्धं सम्पन्नम् ।**

ब्राह्मण कहे – **सुसम्पन्नम् ।**

विसर्जनम्

ॐ व्वाजे वाजेऽवत व्वाजिनो नो धनेषु व्विप्प्रा ऽअमृता ऽऋतज्ञाः अस्य मद्ध्वः पिबत मादयद्ध्वं तृप्ता यात पथिभिर्देवयानैः ॥

ॐ आ मा व्वाजस्य प्प्रसवो जगम्म्यादेमे द्यावापृथिवी व्विश्वरूपे । आ मा गन्तां पितरा मातरा च मा सोमो ऽअमृतत्त्वेन गम्म्यात् ॥

इन मंत्रों से विसर्जन करके—

यजमान कहे- **मयाऽऽचरिते साङ्कल्पिक नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनात् श्री गणेश प्रसादाच्च परिपूर्णोऽस्तु।**

अस्तु परिपूर्णः — ऐसा ब्राह्मण कहें ।

आचार्यादिवरणम्

इसके बाद यजमान आसन पर आचार्य को उत्तर मुँह बैठाकर चन्दन, अक्षत और पुष्पादि से पूजा करे ।

ॐ अमुक गोत्रोत्पन्नः अमुकप्रवरान्वित अमुकशर्माऽहम् अमुकगोत्रोत्पन्न ममुकप्रवरान्वितं शुक्लयजुर्वेदान्तर्गतवाज सनेयमाध्यन्दिनीय शाखाध्यायिन ममुक शर्माणं ब्राह्मणमस्मिन् अमुक याग कर्मणि एभिर्वरणद्रव्यैः आचार्यत्वेन त्वाम् वृणे ।।

ब्राह्मणः - **वृतोऽस्मि** ऐसा कहे ।

यजमान इस प्रार्थना श्लोक को पढ़े ।

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः ।
तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ।।

ब्रह्मवरणम् - यजमान हाथ में वरणद्रव्य ब्रह्मवरण के लिए ब्राह्मण के हाथ में दे दे ।

अस्मिन अमुक याग कर्मणि एभिर्वरणद्रव्यैरमुकगोत्र-ममुक-शर्माणं ब्राह्मणं ब्रह्मत्वेन त्वामहं वृणे ।

ब्राह्मण कहे - **वृतोऽस्मि ।**

यजमान इस श्लोक को पढ़कर ब्रह्माजी की प्रार्थना करे ।

यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः ।
तथा त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ।।

ऋत्विक्वरणम्

फिर यजमान ऋत्विक्वरण के निमित्त हाथ में जल, अक्षत और वरण सामग्री लेकर पाठ करने वाले प्रत्येक ब्राह्मणों के हाथ में दे दे ।

अस्मिन् अमुकयाग कर्मणि एभिर्वरण द्रव्यैरमुक गोत्रममुक शर्माणं ब्राह्मणं ऋत्विक्त्वेन त्वामहं वृणे ।

ब्राह्मणगण- **वृतोऽस्मि** - इस प्रकार कहें ।

यजमान इस श्लोक को पढ़कर प्रर्थना करे ।

भगवन् सर्वधर्मज्ञ! सर्व धर्म परायण ।
वितते मम यज्ञेऽस्मिन्नृत्विक् त्वं मे मखे भव ।।

ॐ व्व्रतेन॑ दी॒क्षामा॑प्नोति दी॒क्षया॑प्नोति॒ दक्षि॑णाम् । दक्षि॑णा श्र॒द्धा मा॑प्नोति श्र॒द्धया॑ स॒त्यमा॑प्यते ॥ ततो यजमानः करसम्पुटं कृत्वा सर्वान् प्रार्थयेत् ।

प्रार्थना

अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः ।
ग्रहध्यानरताः नित्यं प्रसन्नमनसः सदा ।।

अदुष्ट भाषणाः सन्तु मा सन्तु परनिन्दकाः ।
ममाऽपि नियमा ह्येते भवन्तु भवतामपि ।।

ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन् ।
यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः ।।

अस्मिन् कर्मणि ये विप्राः वृता गुरूमुखादयः ।
सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम् ।।

अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया ।
सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधि पूर्वकम् ।।

यथाविहितं कर्म कुरू (एकतन्त्रपक्षे कुरूत)

विप्रः - यथा स्थानं करवाणि (करवामः) ।।

मण्डप प्रवेशः

हाथ से पुष्प अक्षत लेकर पृथ्वी का ध्यान कर पूजन करें।

ॐ पृथ्वीं चतुर्भुजां शुक्लवर्णांकूर्म पृष्ठो परिस्थिताम्।
शंखपद्मधरां चक्र शूलं हस्तां धरां भजे।।

आगच्छ देवि कल्याणि वसुधे लोक धारिणि।
पृथ्वीत्वं ब्रह्मदत्तासि काश्यपेनाभि वन्दिता।।

ॐ भूम्यैः नमः (ऐसा बोलकर)

उध्दृतासि वराहेण कृष्णेन शतबाहुना।
दंष्ट्राग्रैर्लीलया देवि यज्ञार्थं प्रणमाम्यहम्।।
ब्रह्मणा निर्मिते देवि विष्णुना शङ्करेण च।
पार्वत्या चैव गायत्र्या स्कन्दवैश्रवणेन च।।
यमेन पूजिते देवि धर्मस्यविजिगीषया।
सौभाग्यं देहि पुत्रांश्च धनं रूपं च पूजिता।।
गृहाणार्घमिमं देवि सौभाग्यं च प्रयच्छ मे।।

ॐ भूम्यै नमः अर्घ्यंसमर्पयामि। ततो गन्धपुष्पधूपदीप नैवेद्यैः भूमिमर्चयेत् ।

दिग् रक्षणम्

बायें हाथ में पीली सरसों लेकर दाहिने हाथ से ढ़के। फिर इस मन्त्र को पढ़ें—

ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम्।
विष्णु रूद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम्।।
स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम्।
धरणीगर्भ सम्भूतं, शशिपुत्रं बृहस्पतिम्।।
दैत्याचार्यं नमस्कृत्य, सूर्यपुत्रं महाग्रहम्।
राहुं केतुं नमस्कृत्य, यज्ञारम्भे विशेषतः।।
शक्राद्या देवताः सर्वाः मुनींश्चैव तपोधनान्।
गर्ग मुनिं नमस्कृत्य, नारदं मुनिसत्तमम्।।
वशिष्ठं मुनिशार्दूलं, विश्वामित्रं च गोभिलम्।
व्यासं मुनिं नमस्कृत्य, सर्वशास्त्र विशारदम्।।
विद्याधिका ये मुनय आचार्याश्च तपोधनाः।
तान् सर्वान् प्रणमाम्येवं यज्ञरक्षा करान् सदा।।

पूर्वादि क्रम से दिशाओं में सरसों फेकें।

ॐ रक्षोहणं व्वलगहनं वैष्णवी मिदमहं तं व्वलगमुत्किरामि यं मे निष्ट्यो यममात्यो निचखानेदमहं तं व्वलगमुत्किरामि यं मे समानो यमसमानो निचखानेदमहं तं व्वलगमुत्किरामि यं मे स बन्धु र्य्यम सं बन्धुर्न्निचखानेद महन्तं बल गमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥

ॐ रक्षोहणोव्वो व्वलगहनः प्प्रोक्षामि व्वैष्णवान्न्रक्षोहणोवो व्वलगहनो वनयामि व्वैष्णवान्न्रक्षोहणो वो व्वलगहनो—वस्तृणामि वैष्णवान्न्रक्षोहणौवां व्वलगहना-ऽउपदधामि—व्वैष्णवीरक्षोहणौवां व्वलगहनौ-पर्य्यूहामिव्वैष्णवी—व्वैष्णवमसिव्वैष्णवास्त्थ ॥

ॐ रक्षसाम्भागोसिनिरस्तः रक्षऽइदमहः रक्षोभितिष्ठामीदमहः रक्षोवबाधऽइदमहः रक्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्प्रोर्णुवाथांव्वायोव्वेस्तोकानामग्निराज्ज्यस्यव्वेतु स्वाहा स्वाहाकृतेऽऊद्ध्र्वनभसम्मारुतङ्गच्छतम् ॥

ॐ रक्क्षोहाव्विश्वचर्षणि रभियोनिमयोहते। द्रोणेसधस्थमासदत्। ॐ कृणुष्व्वपाजः प्प्रसितिन्नपृत्थ्वीय्याहिराजेवामवाँ२ऽइभेन। तृष्व्वीमनुप्प्रसितिन्द्रूणानोस्तासिव्विध्यरक्षसस्तपिष्ठैः ॥

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।।

अपसर्पन्तु ते भूता ये भूता भूमि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्।
सर्वेषामविरोधेन पूजाकर्म समारभे।।
भूतानि राक्षसा वाऽपि येऽत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु यावत्कर्म करोम्यहम्।।
भूतप्रेतपिशाचाद्याः अपक्रामन्तु राक्षसाः।
स्थानादस्माद् ब्रजंत्वन्यत् स्वीकरोमि भुंवत्विमाम्।।

इन मन्त्रों से सरसों बिखेर देवें और बायें पैर तीन बार भूमि पर पटक कर (भूमि का ताड़न) करें। फिर—

दिग्रक्षण करने के बाद पञ्चगव्य मण्डप में छिड़के— **'आपोहिष्ठा०'** इत्यादि मन्त्रों से।

अथ वास्तुपीठपूजनम्

मण्डपनैर्ऋत्यकोणे चतुःषष्टिपूजनम् वास्तुमण्डलं रुचितं तत्समीपे प्राङ्मुखोदङ्मुखो वा उपविश्याऽऽचम्य प्राणानायम्य।

देशकालौ संकीर्त्य अमुक गोत्रः अमुकशर्माऽहं ड सनवग्रहमख-स प्रसाद स नन्दीश्वर शिवादि मूर्तीनां स्थिर प्राणप्रतिष्ठा कर्मणि. मण्डपाङ्गवास्तु पूजनं करिष्ये।

ततो वास्तु वेदी चतुषट्कोणेषु लोहशंकुर्चतुष्टयमाग्नेयादि प्रदक्षिणं क्रमेण रोपयेत्।

तत्र रोपणमन्त्रम् (कील गाडने का मंत्र)

ॐ विशन्तु भूतले नागा लोकपालश्च सर्वतः।
मण्डपेऽत्रावतिष्ठन्तु आयुर्वलकराः सदा।।

बलि देने का मंत्र—

इत्याग्नेय्याम् (अग्निकोण)

ॐ अग्निभ्योऽप्यथ सर्पेभ्यो ये चाऽन्ये तान्समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि पुण्य मोदनमुत्तमम्।।

नैर्ऋत्याम् (नैर्ऋत्यकोण)

ॐ नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां तान् समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि सर्वे गृह्णन्तु मन्त्रितम्।।

वायव्याम् (वायव्यकोण)

ॐ वायव्याधिपतिश्चैव वायव्यां ये च राक्षसाः।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्।।

इत्यैशान्याम् (ईशानकोण)

ॐ रुद्रेभ्यश्चैव सर्पेभ्यो ये चाऽन्ये तत्समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि गृह्णन्तु सततोत्सुकाः।।

इति मन्त्रेण तत् क्रमेण तत्पार्श्वे माषभक्त बलिं दद्यात् । ततो वास्तुपीठे कुंकुमादिना कनकशलकया रजत पुटकेन नवरेखा कार्या। प्रथमं प्रागन्ताः नवरेखा कार्याः—**ॐ द्यौः शान्ति--------- सामाशन्तिरेधि ।**

इनकी पूजा करे। पश्चात् वास्तुपीठ पर वस्त्र फैलाकर पश्चिम से पूर्वतक उदकसंस्था समा "नवरेखा पूजनम्" रेखाओं का आहवान करें।

आवाहन-स्थापन

१. ॐ भूर्भुवः स्वः लक्ष्म्यै नमः लक्ष्मीम् आवाहयामि स्थापयामि ।
२. ॐ भूर्भुवः स्वः यशोवत्यै नमः यशोवतीम् आवाहयामि स्थापयामि ।
३. ॐ भूर्भुवः स्वः कान्तायै नमः कान्तामावाहयामि स्थापयामि ।
४. ॐ भूर्भुवः स्वः सुप्रियायै नमः सुप्रियामावाहयामि स्थापयामि ।
५. ॐ भूर्भुवः स्वः विमलायै नमः विमलामावाहयामि स्थापयामि ।
६. ॐ भूर्भुवः स्वः शिवायै नमः शिवामावाहयामि स्थापयामि ।
७. ॐ भूर्भुवः स्वः सुभगायै नमः सुभगामावाहयामि स्थापयामि ।

८. ॐ भूर्भुवः स्वः सुमत्यै नमः सुमतिमावाहयामि स्थापयामि ।
९. ॐ भूर्भुवः स्वः इडायै नमः इडामावाहयामि स्थापयामि ।

तत उदगन्ता, नवरेखास्थापनम्

१. ॐ भूर्भुवः स्वः धान्यायै नमः धान्यामावाहयामि स्थापयामि ।
२. ॐ भूर्भुवः स्वः प्राणायै नमः प्राणामावाहयामि स्थापयामि ।
३. ॐ भूर्भुवः स्वः विशालायै नमः विशालामावाहयामि स्थापयामि ।
४. ॐ भूर्भुवः स्वः स्थिरायै नमः स्थिरामावाहयामि स्थापयामि ।
५. ॐ भूर्भुवः स्वः भद्रायै नमः भद्रामावाहयामि स्थापयामि ।
६. ॐ भूर्भुवः स्वः जयायै नमः जयामावाहयामि स्थापयामि ।
७. ॐ भूर्भुवः स्वः निशायै नमः निशामावाहयामि स्थापयामि ।
८. ॐ भूर्भुवः स्वः विरजायै नमः विरजामावाहयामि स्थापयामि ।
९. ॐ भूर्भुवः स्वः विभवायै नमः विभवामावाहयामि स्थापयामि ।

ॐ मनोजूति० से प्रतिष्ठापूर्वक, रेखाओं का पूजन करें। इसके अनन्तर शिख्यादि चौंसठ वास्तु देवताओं का आवाहन तथा स्थापन करें।

शिख्यादिवास्तुपूजनम्

ऐशानकोणदक्षिणार्धपदे (लाल)—

१. ॐ शिखिने नमः शिखिनमावाहयामि स्थापयामि ।

तद्दक्षिणे सार्धपदे (पीला)—

२. ॐ पर्जन्याय नमः पर्जन्यमावाहयामि स्थापयामि ।

तद्दक्षिणपदद्वये (पीला)—

३. ॐ जयन्ताय नमः जयन्तमावाहयामि स्थापयामि ।

तद्दक्षिणपदद्वये (पीला)

४. ॐ कुलिशायुधाय नमः कुलिशायुधमावाहयामि स्थापयामि ।

तद्दक्षिणपदद्वये (लाल)—

५. ॐ सूर्याय नमः सूर्यमावाहयामि स्थापयामि ।

तद्दक्षिणपदद्वये (सफेद)—

६. ॐ सत्याय नमः सत्यमावाहयामि स्थापयामि ।

तद्दक्षिणसार्द्ध पदे (काला)—

७. ॐ भृशाय नमः भृशमावाहयामि स्थापयामि ।

तद्दक्षिणाग्नेय पदार्धे (काला)—

८. ॐ आकाशाय नमः आकाशमावाहयामि स्थापयामि ।

तद्पश्चिमार्द्धे (धूम्र)—

९. ॐ वायवे नमः वायुमावाहयामि स्थापयामि ।

तद्पश्चिमे सार्द्धपदे (लाल)—

१०. ॐ पूष्णे नमः पूष्णमावाहयामि स्थापयामि ।

तद्पश्चिमपदद्वये दक्षिणपार्श्वे (सफेद)—

११. ॐ वितथाय नमः वितथमावाहयामि स्थापयामि ।

तद्पश्चिमपदद्वये दक्षिणपार्श्वे (पीत)—

१२. ॐ गृहक्षताय नमः गृहक्षतमावाहयामि स्थापयामि ।

तत्पश्चिमपदद्वये दक्षिणोरुभागे (काला)—

१३. ॐ यमाय नमः यममावाहयामि स्थापयामि ।

तत्पश्चिमे पदद्वये (लाल)—

१४. ॐ गन्धर्वाय नमः गन्धर्वमावाहयामि स्थापयामि ।

तत्पश्चिमे सार्द्धपदे (काला)—

१५. ॐ भृङ्गराजाय नमः भृङ्गराजमावाहयामि स्थापयामि ।

तत्पश्चिमे नैर्ऋत्य पदार्द्धे (पीला)—

१६. ॐ मृगाय नमः मृगमावाहयामि स्थापयामि ।

तदुत्तरार्धपदे (लाल)—

१७. ॐ पितृभ्यो नमः पितृनावाहयामि स्थापयामि ।

तदुत्तरे सार्द्धपदे (लाल)—

१८. ॐ दौवारिकाय नमः दौवारिकमावाहयामि स्थापयामि ।

तदुत्तर पदद्वये (सफेद)—

१९. ॐ सुग्रीवाय नमः सुग्रीवमावाहयामि स्थापयामि ।

तदुत्तर पदद्वये (लाल)—

२०. ॐ पुष्पदन्ताय नमः पुष्पदन्तमावाहयामि स्थापयामि ।

तदुत्तर पदद्वये (सफेद)—

२१. ॐ वरुणाय नमः वरुणमावाहयामि स्थापयामि ।

तदुत्तर पदद्वये (पीला)—

२२. ॐ असुराय नमः असुरमावाहयामि स्थापयामि ।

तदुत्तर सार्द्धपदे (काला)—

२३. ॐ शोषाय नमः शोषमावाहयामि स्थापयामि ।

तदुत्तरे वायव्यपदार्द्धे (पीला)—

२४. ॐ पापाय नमः पापमावाहयामि स्थापयामि ।

तत्प्राक् पदार्द्धे (लाल)—

२५. ॐ रोगाय नमः रोगमावाहयामि स्थापयामि ।

तत्प्राक् सार्द्धपदे (लाल)—

२६. ॐ अहये नमः अहिमावाहयामि स्थापयामि ।

तत्प्राक् पदद्वये (लाल)—

२७. ॐ मुख्याय नमः मुख्यमावाहयामि स्थापयामि ।

तत्प्राक् पदद्वये (काला)—

२८. ॐ भल्लाटाय नमः भल्लाटमावाहयामि स्थापयामि ।

तत्प्राक् पदद्वये (सफेद)—

२९. ॐ सोमाय नमः सोममावाहयामि स्थापयामि ।

तत्प्राक् पदद्वये (काला)—

३०. ॐ सर्पाय नमः सर्पमावाहयामि स्थापयामि ।

तत्प्राक् सार्द्धपदे (पीला)—

३१. ॐ अदित्यै नमः अदितिमावाहयामि स्थापयामि ।

तत्प्रागर्द्धपदे (पीला)—

३२. ॐ दित्यै नमः दितिमावाहयामि स्थापयामि।

मध्यपदेषु ईशानपदोत्तरार्द्धे (सफेद)—

३३. ॐ आपाय नमः आपमावाहयामि स्थापयामि।

आग्नेय पदोत्तरार्धे (सफेद)—

३४. ॐ सावित्राय नमः सावित्रमावाहयामि स्थापयामि।

नैर्ऋत्यपदोत्तरार्धे (काला)—

३५. ॐ जयाय नमः जयमावाहयामि स्थापयामि।

वायव्यपदोत्तरार्धे (लाल)—

३६. ॐ रुद्राय नमः रुद्रमावाहयामि स्थापयामि।

मध्येप्राक् पदद्वये (लाल)—

३७. ॐ अर्यम्णे नमः अर्यमणमावाहयामि स्थापयामि।

आग्नेयपदपूर्वार्द्धे (सफेद)—

३८. ॐ सवित्रे नमः सवितारमावाहयामि स्थापयामि।

तत्पश्चिम पदद्वये (लाल)—

३९. ॐ विवस्वते नमः विवस्वतमावाहयामि स्थापयामि।

नैर्ऋत्यपदपूर्वार्द्धे (लाल)—

४०. ॐ विबुधाधिपाय नमः विबुधाधिपमावाहयामि स्थापयामि।

तदुत्तरपदद्वये (सफेद)—

४१. ॐ मित्राय नमः मित्रमावाहयामि स्थापयामि।

तदुत्तरे वायव्यपदपश्चिमार्द्धे (लाल)—

४२. ॐ राजयक्ष्मणे नमः राजयक्ष्माणमावाहयामि स्थापयामि।

तत्प्राक् पदद्वये (लाल)—

४३. ॐ पृथ्वीधराय नमः पृथ्वीधरमावाहयामि स्थापयामि।

ईशानपद दक्षिणार्द्धे (लाल)—

४४. ॐ आपवत्साय नमः आपवत्समावाहयामि स्थापयामि।

ततो मध्यपदचतुष्टये (लाल)—

४५. ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि।

ततो मण्डलाद् बहिःईशान्यां (हरित)—

४६. ॐ चरक्यै नमः चरकीमावाहयामि स्थापयामि।

आग्नेय्यां (लाल)—

४७. ॐ विदार्यै नमः विदारीमावाहयामि स्थापयामि।

ततो मण्डलाद् बहिः नैर्ऋत्याम् (पीला)—

४८. ॐ पूतनायै नमः पूतनामावाहयामि स्थापयामि।

ततो मण्डलाद् बहिः वायव्याम् (काला)—

४९. ॐ पापराक्षस्यै नमः पापराक्षसीमावाहयामि स्थापयामि।

ततो मण्डलाद् बहिः पूर्वे (लाल)—

५०. ॐ स्कन्दाय नमः स्कन्दमावाहयामि स्थापयामि।

ततो मण्डलाद् बहिः दक्षिणे (काला)—

५१. ॐ अर्यमणे नमः अर्यमाणमावाहयामि स्थापयामि।

ततो मण्डलाद् बहिः पश्चिमे (लाल)—

५२. ॐ जृम्भकाय नमः जृम्भकमावाहयामि स्थापयामि।

ततो मण्डलाद् बहिरुत्तरे (पीला)—

५३. ॐ पिलिपिच्छाय नमः पिलिपिच्छमावाहयामि स्थापयामि।

ततः पूर्वे (पीला)—

५४. ॐ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि।

ततः आग्नेय्याम् (लाल)—

५५. ॐ अग्नये नमः अग्निमावाहयामि स्थापयामि।

ततो दक्षिणस्याम् (काला)—

५६. ॐ यमाय नमः यममावाहयामि स्थापयामि।

ततो दक्षिणस्याम् (नीला)—

५७. ॐ निर्ऋतये नमः निर्ऋतिमावाहयामि स्थापयामि।

ततः पश्चिमे (सफेद)—

५८. ॐ वरुणाय नमः वरुणमावाहयामि स्थापयामि।

ततः वायव्याम् (धूम्र)—

५९. ॐ वायवे नमः वायुमावाहयामि स्थापयामि।

ततः उत्तरे (पीला)—

६०. ॐ कुबेराय नमः कुबेरमावाहयामि स्थापयामि।

तत ऐशान्याम् (सफेद)—

६१. ॐ ईश्वराय नमः ईश्वरमावाहयामि स्थापयामि।

पूर्वेशानयोर्मध्ये (श्वेत)—

६२. ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि।

नैर्ऋत्यपश्चिमयोर्मध्ये (काला)—

६३. ॐ अनन्ताय नमः अनन्तमावाहयामि स्थापयामि।

वास्तुकलशोपरि (काला)—

६४. ॐ वास्तुपुरुषाय नमः वास्तुपुरुषमावाहयामि स्थापयामि।

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञ मिमं तनोत्वरिष्टं य्यज्ञꣳ समिमं दधातु। व्विश्वे देवा स इह मादयन्तामोꣳ म्प्रतिष्ठ॥

इस प्रकार प्राणप्रतिष्ठा कर पञ्चोपचार अथवा षोडशोपचार से पूजन करें।

वेदी के ऊपर कलशस्थापन विधि पूर्वक कलश स्थापित करके उसके ऊपर वास्तुपुरुष की स्वर्णमयी प्रतिमा अग्न्युत्तारण पूर्वक रखें॥

अग्न्युत्तारण विधिः

सङ्कल्प–

देशकालौ सङ्कीर्त्य अमुकगोत्रः अमुकशर्माऽहं अस्यौ वास्तु मूर्तौ अवद्यातादिदोषपरिहारार्थम् अग्न्युतारणं देवता सान्निध्यार्थं च प्राण प्रतिष्ठां करिष्ये।

आचार्य वास्तु इत्यादि मूर्ति में घी लगाकर आग से तपावें। फिर किसी पात्र में रखकर **ॐ समुद्रस्य त्वावकयाग्ने०**- से लेकर

अस्मभ्य गुग् शिवोभव पर्यन्त पढ़कर मन्त्रों से जलधारा दे फिर प्राणप्रतिष्ठा करे।

मूर्तिं पात्रे विधाय घृतेनाऽभ्यज्यतदुपरि जलधारां पातयेत् तत्र मन्त्राः।

ॐ समुद्रस्य त्वावकयाग्ने परि व्ययामसि–पावकोऽअस्मभ्यꣳ शिवो भव ॥१॥

ॐ हिमस्यत्वा जरायुणाग्ने परि व्ययामसि । पावकोऽअस्मभ्यꣳ शिवो भव ॥२॥

ॐ उपज्ज्मन्नुप वेतसेऽवतर नदीष्ष्वा । अग्ग्ने पित्तमपामसि मण्डूकिताभिरागहि सेमं नो यज्ञं पावकवर्ण्णꣳ शिवं कृधि॥३॥

ॐ अपामिदं न्ययनꣳ समुद्रस्य निवेशनम् । अन्न्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥४॥

ॐ अग्ग्ने पावक रोचिषा मन्द्रया देवजिह्वया । आ देवान्वक्षि यक्षि च ॥५॥

ॐ स नः पावक दीदिवोऽग्ग्ने देवाँ२॥ ऽइहावह । उप यज्ञꣳ हविश्श्च नः ॥६॥

ॐ पावकया यश्चितयन्त्या कृपाक्षामन्रुरुच उषसो न भानुना । तूर्व्वन्न यामन्नेतशस्य नू रण ऽआ यो घृणे न ततृषाणो अजरः ॥७॥

ॐ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्च्चिषे । अन्न्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥८॥

ॐ नृषदे व्वेडप्पसुषदे व्वेड्ड बर्हिषदे व्वेड्ड व्वनसदे व्वेद् स्वर्व्विदे व्वेद् ॥९॥

ॐ ये देवा देवानां यज्ञिया यज्ञियाना ᳪ संव्वत्सरीणमुपभागमासते । अहुतादो हविषो यज्ञे अस्मिमन्तस्वयं पिबन्तु मधुनो घृतस्य ॥१०॥

ॐ ये देवा देवेष्ष्वधि देवत्त्वमायन्न्ये ब्ब्रह्मणः पुरऽएतारो अस्य । येब्भ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्व्या अधि स्नुषु ॥११॥

ॐ प्राणदाऽअपानदा व्व्यानदा व्वर्च्चोदा व्वरिवोदाः। अन्न्यांस्ते ऽअस्म्मत्तपन्तु हेतयः पावको ऽअस्म्मब्भ्यᳪ शिवो भव ॥१२॥

इसके बाद स्वर्णमयी प्रतिमा को हाथ से स्पर्श करके इन बीज मन्त्रों को पढ़ें ।

ॐ आँ ह्रीं क्रों यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हँ सः सोऽहं अस्य वास्तु मूर्त्तेः प्राणा इहप्राणाः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं हं सः सोऽहम् अस्य वास्तु मूर्त्तेः जीव इहस्थितः ।। ॐ आं ह्रीं क्रों यं लं वं शं षं सं हं सः सोऽहं अस्य वास्तुमूर्तेः वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वा-घ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञᳪ समिमन्दधातु । विश्वे देवा स ऽइह मादयन्तामोऽम्प्रतिष्ठ ॥

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।

वास्तुपुरूष सुप्रतिष्ठितो वरदोभव। वास्तुमूर्तिं वस्त्रेण संप्रोक्ष्य पीठेसंस्थाप्य हस्ते अक्षतपुष्पाणि गृहीत्वाध्यायेत् –

आगच्छ भगवन्वास्तो सर्वदेवैरधिष्ठित।
भगवन्कुरू कल्याणं यज्ञेस्मिन्सन्निधो भव।।

ॐ नमो व्वात्त्याय चरेष्म्म्याय चनमो व्वास्तव्व्यायच व्वास्तुपायचनमः सोमाय च रूद्रायचनमस्ताम्म्राय चारूणायच ॥

पञ्चामृतेन संस्थाप्य कलशोपरि स्थापयेत्।

वास्तोष्पते प्रतिजानीह्यस्मान्स्वा वेशोऽअनमीवो भवा नः।
यत्वे महे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।।

ॐ भूर्भुवः स्वः वास्तुपुरुषमावाहयामि स्थापयामि।

ॐ वास्तोष्पतये नमः इति पञ्चोपचारैः षोडशोपचारैर्वा सम्पूज्य अर्घ्यं दद्यात्—

पूज्योऽसि त्रिषु लोकेषु यज्ञरक्षार्थ हेतवे।
तद्विनार्चनं सिध्यन्ति यज्ञदानान्यनेकशः।।

अयोने भगवन् भर्गललाट स्वेद सम्भव।
गृहाणार्घ्यं मया दत्तं वास्तोः स्वामिन् नमोऽस्तु ते।।

वास्तु के सभी देवताओं को खीर से बलि देवें।

पायसबलिः

ॐ शिखिने एष पायस बलिर्न मम
ॐ पर्जन्याय एष पायस बलिर्न मम
ॐ जयन्ताय एष पायस बलिर्न मम
ॐ कुलिशायुधाय एष पायस बलिर्न मम
ॐ सूर्याय एष पायस बलिर्न मम

ॐ सत्याय एष पायस बलिर्न मम

ॐ भृशाय एष पायस बलिर्न मम

ॐ आकाशाय एष पायस बलिर्न मम

ॐ वायवे एष पायस बलिर्न मम

ॐ पूष्णे एष पायस बलिर्न मम

ॐ वितथाय एष पायस बलिर्न मम

ॐ गृहक्षताय एष पायस बलिर्न मम

ॐ यमाय एष पायस बलिर्न मम

ॐ गन्धर्वाय एष पायस बलिर्न मम

ॐ भृङ्गराजाय एष पायस बलिर्न मम

ॐ मृगाय एष पायस बलिर्न मम

ॐ पितृभ्यो एष पायस बलिर्न मम

ॐ दौवारिकाय एष पायस बलिर्न मम

ॐ सुग्रीवाय एष पायस बलिर्न मम

ॐ पुष्पदन्ताय एष पायस बलिर्न मम

ॐ पृथ्वीधराय एष पायस बलिर्न मम

ॐ ब्रह्मणे एष पायस बलिर्न मम

ॐ वरूणाय एष पायस बलिर्न मम

ॐ असुराय एष पायस बलिर्न मम

ॐ शेषाय एष पायस बलिर्न मम

ॐ पापाय एष पायस बलिर्न मम

ॐ रोगाय एष पायस बलिर्न मम

ॐ अहये एष पायस बलिर्न मम

ॐ मुख्याय एष पायस बलिर्न मम

ॐ भल्लाटाय एष पायस बलिर्न मम

ॐ सोमाय एष पायस बलिर्न मम

ॐ नागाय एष पायस बलिर्न मम

ॐ अदितये एष पायस बलिर्न मम
ॐ दितये एष पायस बलिर्न मम
ॐ अद्भ्यो एष पायस बलिर्न मम
ॐ आपवत्साय एष पायस बलिर्न मम
ॐ अर्यमणे एष पायस बलिर्न मम
ॐ सवित्राय एष पायस बलिर्न मम
ॐ सावित्रे एष पायस बलिर्न मम
ॐ विवस्वते एष पायस बलिर्न मम
ॐ विबुधाधिपाय एष पायस बलिर्न मम
ॐ जयाय एष पायस बलिर्न मम
ॐ मित्राय एष पायस बलिर्न मम
ॐ राजयक्ष्मणे एष पायस बलिर्न मम
ॐ रूद्राय एष पायस बलिर्न मम

ततः चरक्यादिभ्यो दश दिक्पालेभ्यश्चदधि माष (उड़द) बलीन् दद्यात् ।

ॐ चरक्यै एष दधिमाष बलिर्न मम एवं क्रमेण सर्वेभ्यः ।

दधि-उड़द बलिदान दें ।

१. चरक्यै एष दधिमाष बलिर्न मम
२. विदार्यै एष दधिमाष बलिर्न मम
३. पूतनायै एष दधिमाष बलिर्न मम
४. पापराक्षस्यै एष दधिमाष बलिर्न मम
५. स्कन्दाय एष दधिमाष बलिर्न मम
६. अर्यमणे एष दधिमाष बलिर्न मम
७. जृम्भकाय एष दधिमाष बलिर्न मम
८. पिलिपिच्छाय एष दधिमाष बलिर्न मम
९. इन्द्राय एष दधिमाष बलिर्न मम
१०. अग्नये एष दधिमाष बलिर्न मम

१ १. यमाय एष दधिमाष बलिर्न मम
१ २. निर्ऋतये एष दधिमाष बलिर्न मम
१ ३. वरूणाय एष दधिमाष बलिर्न मम
१ ४. वायवे एष दधिमाष बलिर्न मम
१ ५. कुबेराय एष दधिमाष बलिर्न मम
१ ६. ईशानाय एष दधिमाष बलिर्न मम
१ ७. ब्रह्मणे एष दधिमाष बलिर्न मम
१ ८. अनन्ताय एष दधिमाष बलिर्न मम

ततः प्रधान वास्तुं बलिं दद्यात्

नाना पक्कान्नसंयुक्तं नाना गन्धसमन्वितम्।
बलिं गृहाण देवेश वास्तुदोषप्रणाशक।।

ॐ वास्तुपुरूषाय एष बलिर्न मम ।

प्रार्थना

मन्त्रहीनं क्रियाहीनं भक्ति श्रद्धा विवर्जितम्।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे।।
नमस्ते वास्तु देवेश सर्वदोष हरो भव।
शांति कुरू सुखं देहि सर्वान् कामान् प्रयच्छ मे।।

शिख्यादि कामे खलु वास्तु देवः
गृह्णन्ति पुष्पाञ्जलिमेति शीघ्रम्।
पीडाहारा भव्यकरा विशालाः
नमामि भूपाल न तत् पराश्च।।

इत्युक्ता वास्तु पुरूषाय नारिकेलरसं-सुवर्णं समर्प्य प्रणमेत् । ततः पावमानेन रक्षोहनेन च सूक्तेन त्रिसूत्र्या मण्डपं वेष्टयेत् ।। (पवमान और रक्षोहन सूक्त पढ़ते हुए मण्डप को त्रिसूत्री से लपेटें)।

अथ रक्षोघ्नसूक्तम्

ॐ कृणुष्व पाजः प्रसितिन्नपृथ्वीं याहि राजेवामवाँ २ ऽइभेन तृष्वी मनुप्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥

ॐ तव भ्रमास ऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः । तपूंष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः ॥

ॐ प्रति स्पशो विसृज तूर्णितमो भवा पायुर्विशो ऽअस्या ऽअदब्धः । यो नो दूरे ऽअघशंसो यो ऽअन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥

ॐ उदग्ने तिष्ठ प्रत्या तनुष्व न्यमित्राँ २ ऽओषतात्तिग्महेते । यो नो ऽअरातिं समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम् ॥

ॐ ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने अवस्थिरा तनुहि यातु जूनाञ्जामिमजामिम्प्रमृणीहि शत्रून् अग्नेष्ट्वा तेजसा सादयामि ॥

पवमानसूक्तम्

ॐ पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ॥ पवित्रेण शतायुषा पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥

ॐ अग्न ऽआयूंषि । पवस ऽआसुवोर्जमिषञ्चनः । आरे बाधस्व दुच्छुनाम् ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसाधियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहिमा ॥

ॐ पवित्रेण पुनीहि। माशुक्रेणदेव दीद्यत्। अग्नेक्रत्वा क्रतूँ ऽरनु ॥

ॐ यत्ते पवित्र मर्चिष्यग्ग्ने व्वितत मन्तरा। ब्रह्मतेन पुनातुमा।

ॐ पवमानः सोऽअद्यनः पवित्रेण व्विचर्षणिः। यः पोता सपुनातुमा ॥

ॐ उभाभ्यान्देव सवितः पवित्रेण सवेनच। माम्पुनीहि विश्वतः ॥

ॐ वैश्वदेवी पुनती। देव्या गाद्यस्यामिमा बह्व्यस्तन्वो व्वीत पृष्ठाः। तयामदन्तः सधमादेषुव्वयꣳ स्याम पतयोरयीणाम् ॥

इति पवमान सूक्तम् वास्तु पूजनम् द्वितीय दिन कृत्यं च समाप्तम् ॥

अथ मण्डपपूजनम्

१. ब्रह्मा

निम्न सङ्कल्प करे—

देशकालौ संकीर्त्य— अमुकगोत्रः अमुक शर्माऽहं (सपत्नीकोऽहं) अमुकयागाङ्ग भूतं मण्डप देवानां स्थापनं पूजनं करिष्ये।

इति सङ्कल्प्य रक्तवर्णं मध्यवेदीशानस्तम्भे (नन्दायै)—

एह्येहि विपेन्द्र पितामहेश हंसादिरूढ त्रिदशैकवन्द्य।
श्वेतोत्पलाभासकुशाम्बुहस्त गृहाण पूजां भगवन्नमस्ते ॥
हंस पृष्ठसमारूढ देवतागणपूजित।
ईशानकोणस्थितं स्तम्भमलङ्कुरु जगत्पते ॥

ॐ ब्रह्मयज्ञानं प्रथमम्पुरस्ताद् द्विसीमतः सुरुचो-व्वेनऽआवः स बुद्ध्न्या ऽउपमा अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ॥

ॐ ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ।

ॐ सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि ।

ॐ वास्तुदेवतायै नमः वास्तुदेवतामावाहयामि स्थापयामि ।

ॐ ब्राह्म्यै नमः ब्राह्मीमावाहयामि स्थापयामि ।

ॐ गंगायै नमः गंगामावाहयामि स्थापयामि ।

ब्रह्माद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत-पुष्पाणि समर्पयामि ।

इस प्रकार पूजन कर प्रार्थना करे—

कृष्णाजिनाम्बरधर पद्मासन चतुर्भुज ।
जटाधार जगद्धातः प्रसीद कमलोद्भव ।।

नमस्कार–

वेदाधाराय वेदाय यज्ञगम्याय सूरये।
कमण्डल्वक्षमालास्त्रुक्स्त्रुवहस्ताय ते नमः।।

स्तम्भमालभेत्–

ॐ ऊर्द्ध्वऽऊषुणऽऊतयेतिष्ठादेवो न सविता ऊर्द्ध्वो व्वाजस्यसनितायदञ्जिभिर्व्वाघदिर्भिर्व्विह्वयामहे ॥

स्तम्भशिरसि–

ॐ नागमात्रे नमः।

शाखाबन्धनम्–

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः पितरञ्चप्रयन्त्स्वः।।

अनुमन्त्रणम्–

ॐ यतो यतः समीहसे ततो नोऽअभयङ्कुरू। शन्नः कुरु प्प्रजाब्भ्योभयन्नः पशुब्भ्यः॥

अनेन कृतार्चनेन ब्रह्माद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

२. विष्णु

आग्नेयस्तम्भे (वसुदायै) कृष्णवर्णं विष्णुं पूजयेत् —

आवाहयेतं गरुडोपरि स्थितं रमार्धदेहं सुरराजवन्दितम्।
कंशान्तकं चक्रगदाब्जहस्तं भजामि देवं वसुदेवसूनुम्॥
पद्मनाभ हृषीकेशं कंसचाणूरमर्दन।
आगच्छ भगवन्विष्णो स्तम्भेऽस्मिन्सन्निधो भव॥

ॐ इदं व्विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाᳪ सुरे स्वाहा॥

ॐ विष्णवे नमः विष्णुमावाहयामि स्थापयामि।

ॐ लक्ष्म्यै नमः लक्ष्मीमावाहयामि स्थापयामि।

ॐ नन्दायै नमः नन्दामावाहयामि स्थापयामि।

ॐ आदित्यायै नमः आदित्यामावाहयामि स्थापयामि।

ॐ वैष्णव्यै नमः वैष्णवीमावाहयामि स्थापयामि।

विष्ण्वाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत-पुष्पाणि समर्पयामि॥

इस प्रकार पूजन कर नमस्कार करे।

ॐ नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम।
नमस्ते सर्वलोकात्मन् विष्णवे ते नमो नमः॥
देवदेव जगन्नाथ विष्णो यज्ञपते विभो।
पाहि दुःखाम्बुधेरस्मान्भक्तानुग्रहकारक॥

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऽऊषुणं०।**

स्तम्भशिरसि – ॐ नागमात्रे नमः०।

शाखाबन्धनम् – ॐ आयङ्गौः०।

अनुमन्त्रणम् – ॐ यतोयतः०।

ॐ अनेन कृतार्चनेन विष्ण्वाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

३. शंकर (भद्रायै) श्वेतं शंकरं पूजयेत्

नैर्ऋत्य स्तम्भे (भद्रायै) श्वेतं शकरं पूजयेत्

एह्येहि गौरीश पिनाकपाण शशांकमौले वृषभाधिरूढ।
देवादिदेवेश महेश नित्यं गृहाण पूजां भगवन्नमस्ते ।।

गंगाधर महादेव पार्वती प्राण वल्लभ।
आगच्छ भगवन्नीश स्तम्भेऽस्मिन्सन्निधोभव ।।

ॐ नमः शम्भवाय च मयो भवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

ॐ गौर्ये नमः गौरीमावाहयामि स्थापयामि।
ॐ माहेश्वर्यै नमः माहेश्वरीमावाहयामि स्थापयामि।
ॐ शोभनायै नमः शोभनामावाहयामि स्थापयामि।
ॐ भद्रायै नमः भद्रामावाहयामि स्थापयामि।
ॐ शंकराय नमः शंकरमावाहयामि स्थापयामि।

रुद्राद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

इस प्रकार पूजन कर नमस्कार करे—

वृषवाहनाय देवाय पार्वतीपतये नमः।
वरदायार्द्धकायाय नमश्चन्द्रार्द्धमौलिने ।।
पञ्चवक्त्र वृषारूढ त्रिलोचन सदाशिव।
चन्द्रमौले महादेव मम स्वस्तिकरो भव ।।

स्तम्भमालभेत् – ॐ ऊर्द्ध्व ऽऊषुण०।

स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**

शाखाबन्धनम् – **ॐ आयङ्गौ०।**

अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन रुद्राद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

४. इन्द्र

वायव्यस्तम्भे— (अदित्यै) पीतस्तम्भं इन्द्रं पूजयेत्—

ॐ ऐह्येहि वृत्रघ्न गजाधिरूढ सहस्त्रनेत्र त्रिदशैकराज।
शचीपते शक्र सुरेश नित्यं गृहाण पूजां भगवन्नमस्ते।।

शचीपते महाबाहो सर्वाभरणभूषित।
आगच्छ भगवन्निन्द्र स्तम्भेऽस्मिन्सन्निधो भव।।

ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम्।
ह्वयामि शक्क्रम्पुरहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥

ॐ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि
ॐ इन्द्राण्यै नमः इन्द्राणीमावाहयामि स्थापयामि।
ॐ आनन्दायै नमः आनन्दामावाहयामि स्थापयामि।
ॐ विभूत्यै नमः विभूतिमावाहयामि स्थापयामि।

ॐ इन्द्राद्यावाहितस्तम्भाधिष्ठातृदेवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

पुरन्दर नमस्तेऽस्तु वज्रहस्तनमोऽस्तु ते।
शचीपते नमस्तुभ्यं नमस्ते मेघवाहन।।
देवराज गजारूढ पुरन्दर शतक्रतो।
वज्रहस्त महाबाहो वाञ्छितार्थप्रदो भव।।

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऽऊषुण०।**

स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**

शाखाबन्धनम् – ॐ आयङ्गौ१०।

अनुमन्त्रणम् – ॐ यतो यतः०।

ॐ अनेन कृतार्चनेन इन्द्राद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

५. सूर्य

ततो बाह्ये मण्डपे ईशानकोणे (भूत्यै) रक्तस्तम्भे सूर्यम्—

आवाहयेतं द्विभुजं दिनेशं सप्ताश्ववाहं द्युमणिं ग्रहेशम्।
सिन्दूरवर्णं प्रतिभावभासं भजामि सूर्यं कुलवृद्धिहेतोः ।।

पद्मनाभ महाबाहो सप्तश्वेताश्ववाहन।
आगच्छ भगवन्भानो स्तम्भेऽस्मिन्सन्निधो भव ।।

ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च।
हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥

ॐ सूर्याय नमः सूर्यमावाहयामि स्थापयामि।
ॐ सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि।
ॐ मंगलायै नमः मंगलामावाहयामि स्थापयामि।

ॐ सूर्याद्यावाहितस्तम्भाधिष्ठातृदेवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

ॐ नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरिञ्चिनारायण शङ्करात्मने ।।

पद्महस्तरथारूढ पद्मासनसुमङ्गल।
क्षमां कुरु दयालो त्वं ग्रहराज नमोऽस्तु ते ।।

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऊषुणं०।**

स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**

शाखाबन्धनम् – **ॐ आयङ्गौ१०।**

अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन सूर्याद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम ।

६. गणेश

ईशानपूर्वयोरन्तराले (सरवस्यै) श्वेतस्तम्भे गणेशम्—

ॐ आवाहयेतं गणराजदेवं रक्तोत्पलाभासमशेषवन्द्यम् ।
विघ्नान्तकं विघ्नहरं गणेशं भजामि रौद्रं सहितं च सिद्ध्यया ।।

लम्बोदर महाकाय गजवक्त्र चतुर्भुज ।
आगच्छ गणनाथस्त्वं स्तम्भेऽस्मिन्सन्निधो भव ।।

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्प्रियपतिꣳ हवामहे निधिनान्त्वा निधिपतिꣳ हवामहे व्वसो मम । आहमजानि गर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥

ॐ गणपतये नमः गणपतिमावाहयामि स्थापयामि।
ॐ विघ्नहारिण्यै नमः विघ्नहारिणीमावाहयामि स्थापयामि।
ॐ जयायै नमः जयामावाहयामि स्थापयामि।

ॐ गणपत्याद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ।

पूजन कर नमस्कार करे—

नमस्ते ब्रह्मरुपाय विष्णुरुपाय ते नमः ।
नमस्ते रुद्ररुपाय करिरुपाय ते नमः ।।
लम्बोदर महाकाय सततं मोदकप्रिय ।
गौरीसुत गणेश त्वं विघ्नराज प्रसीद मे ।।

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऽऊषुण०।**
स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**
शाखाबन्धनम् – **ॐ आयङ्गौः०।**
अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन गणेशाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

७. यम

पूर्वाग्नेययोरन्तरालस्तम्भे— (पूर्वसन्ध्यायै) कृष्णवर्णस्तम्भेयमम्—

एह्येहि दण्डायुध धर्मराज कालाञ्जनाभास विशालनेत्र।
विशालवक्षस्थलरुद्ररुप गृहाण पूजां भगवन्नमस्ते।।
चित्रगुप्तादि संयुक्त दण्डमुद्गरधारक।
आगच्छ भगवन्धर्म सप्तमस्तम्भमाविश।।

ॐ यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे। देवस्त्वा सवितामद्ध्वा नक्तु पृथिव्याः सꣳ स्पृशस्पाहि। अर्च्चिरसि शोचिरसि तपोऽसि।

ॐ यमाय नमः यममावाहयामि स्थापयामि।
ॐ अञ्जन्यै नमः अञ्जनीमावाहयामि स्थापयामि।
ॐ क्रूरायै नमः क्रूरामावाहयामि स्थापयामि।
ॐ नियन्त्रै नमः नियन्त्रीमावाहयामि स्थापयामि।

ॐ यमाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

ईषत्पीन नमस्तेऽस्तु दण्डहस्त नमोऽस्तु ते।
महिषस्य नमस्तेऽस्तु धर्मराज नमोऽस्तु ते।।
धर्मराज महाकाय दक्षिणाधिपते यम।
रक्तेक्षण महाबाहो मम पीडां निवारय।।

स्तम्भमालभेत् – ॐ ऊर्द्ध्व ऽऊषुणः०।
स्तम्भशिरसि – ॐ नागमात्रे नमः०।
शाखाबन्धनम् – ॐ आयङ्गौः०।
अनुमन्त्रणम् – ॐ यतो यतः०।

ॐ अनेन कृतार्चनेन यमाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम ।

८. नागदेवता

बाह्याग्नेयकोणस्तम्भे— (मध्यसंध्यायै.) कृष्णवर्णस्तम्भे—

एह्येहि नागेन्द्र धराधरेश सर्वामरैर्वन्दितपादपद्म।
नानाफणामण्डलराजमान गृहाण पूजां भगवन्नमस्ते।।

आशीविषसमोपेत नागकन्या विराजित।
आगच्छ नागराजेन्द्र स्तम्भेऽस्मिन्सन्निधो भव।।

ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
ये ऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः ॥

ॐ नागराजाय नमः नागराजमावाहयामि स्थापयामि।
ॐ धरायै नमः धरामावाहयामि स्थापयामि।
ॐ पद्मायै नमः पद्मामावाहयामि स्थापयामि।
ॐ महापद्मायै नमः महापद्मामावाहयामि स्थापयामि।

ॐ नागाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ।

पूजन कर नमस्कार करे—

नमः खेटक हस्तेभ्यस्त्रिभोगेभ्यो नमो नमः ।
नमो भीषण देवेभ्यः खड्गधृग्भ्यो नमो नमः ।।
खड्ग खेट धराः सर्पाः फणामण्डलमण्डिताः ।
एकभोगाः साक्षसूत्रा वरदाः सन्तु मे सदा ।।

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऽऊषुण०।**
स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**
शाखाबन्धनम् – **ॐ आयङ्गौ०।**
अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन नागाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

९. **स्कन्दाय**

अग्निर्दक्षिणयोरन्तरालस्तम्भे (पश्चिमसन्ध्यायै) श्वेतस्तम्भे स्कन्दम्—

आवाहयामि देवेशं षण्मुखं कृत्तिकासुतम्।
रुद्रतेजसमुत्पन्नं देवसेना समन्वितम्॥
मयूर वाहनं शक्तिं पाणि वै ब्रह्मचारिणम्।
आगच्छ भगवन् स्कन्द स्तम्भेऽस्मिन्सन्निधो भव॥

ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवापुरीषात् श्येनस्य पक्षा हरिणस्य बाहुऽउपस्तुत्यम्महि जातन्तेऽअर्वन्।

ॐ स्कन्दाय नमः स्कन्दमावाहयामि स्थापयामि।
ॐ जयायै नमः जयामावाहयामि स्थापयामि।
ॐ शक्तये नमः शक्तिमावाहयामि स्थापयामि।

ॐ स्कन्दाद्यावाहितस्तम्भाधिष्ठात् देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

नमः स्कन्दायदेवाय घण्टाकुक्कुटधारिणे।
पिनाकशक्तिहस्ताय षण्मुखाय च ते नमः॥
मयूरवाहनस्कन्द गौरा सुत षडानन।
कार्तिकेयमहाबाहो दयां कुरु दयानिधे॥

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऊषुण०।**

स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**

शाखाबन्धनम् – **ॐ आयङ्गौः०।**

अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन स्कन्दाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम ।

१०. वायु

दक्षिणनैर्ऋत्ययोर्मध्ये— धूम्रस्तम्भे वायुम—

आवाहयामि देवेशं भूतानां देहधारिणम् ।
सर्वाधारं महावेगं मृगवाहनमीश्वरम् ।।
ध्वजहस्तं गन्धवहं त्रैलोक्यान्तरचारिणाम् ।
आगच्छ भगवन् वायो स्तम्भेऽस्मिन्सन्निधो भव ।।

ॐ तवँव्वाय वृहस्प्पते त्वष्ट्टुर्ज्जामातरद्भुत । अवा ऽँ स्यावृणीमहे ।

ॐ वायवे नमः वायुमावाहयामि स्थापयामि।
ॐ वायव्यै नमः वायवीमावाहयामि स्थापयामि।
ॐ गायत्र्यै नमः गायत्रीमावाहयामि स्थापयामि।
ॐ मध्यमसन्ध्यायै नमः मध्यमसन्ध्यामावाहयामि स्थापयामि।

ॐ वायवाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि ।

पूजन कर नमस्कार करे—

नमो धरणीपृष्ठस्थ समीरण नमोऽस्तु ते ।
धूम्रवर्णनमस्तेऽस्तु शीघ्रगामिन्नमोऽस्तु ते ।।
धावन्धरणि पृष्ठस्थ ध्वजहस्त समीरण ।
दण्डदस्त मृगारूढ वरं देहि वरप्रद ।।

स्तम्भमालभेत् – ॐ ऊर्द्ध्व ऽऊषुण०।
स्तम्भशिरसि – ॐ नागमात्रे नमः०।
शाखाबन्धनम् – ॐ आयङ्गौ१०।
अनुमन्त्रणम् – ॐ व्रातो' यत६०।

ॐ अनेन कृतार्चनेन वायवाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

११. सोम

नैर्ऋत्य बाह्यस्तम्भे पीतस्तम्भे सोमम्—

आवाहयामि देवेशं शशांकं रजनीपतिम्।
क्षीरोदधिसमुद्भूतं हरमौलिविभूषणम्।
सुधाकरं द्विजाधीशं त्रैलोक्यप्रीतकारकम्।
औषध्याप्यायनकरं सोमं कन्दर्पवर्धनम्।
आगच्छ भगवन्सोम स्तम्भेऽस्मिन्सन्निधोभव।

ॐ आप्प्यायस्व समेतुते व्विश्श्वतः सोम व्वृष्ण्यम्॥ भवाव्वाजस्य सङ्गथे॥

ॐ सोमाय नमः सोममावाहयामि स्थापयामि।
ॐ सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि।
ॐ अमृतकलायै नमः अमृतकलामावाहयामि स्थापयामि।
ॐ विजयायै नमः विजयामावाहयामि स्थापयामि।

ॐ सोमाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

अत्रिपुत्र नमस्तेऽस्तु नमस्ते शशिलाञ्छन।
श्वेताम्बर नमस्तेऽस्तु ताराधिप नमोऽस्तुते॥
अत्रिपुत्र निशानाथ द्विजराज सुधाकर।
सोमत्वं सौम्यभावेन ग्रहपीडां निराकुरु॥

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऽऊषुण०।**
स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**
शाखाबन्धनम् – **ॐ आयङ्गौः०।**
अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन सोमाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

१२. वरुण

नैर्ऋत्यपश्चिमयोर्मध्ये— श्वेतस्तम्भे वरुणम् —

आवाहयामि देवेशं सलिलस्याधिपं प्रभुम्।
शंखपाशधरं सौम्यं वरुणं यादसां पतिम्।
कुम्भीरथसमारुढं मणिरत्नसमन्वितम्।
आगच्छ देव वरुण स्तम्भेऽस्मिन्सन्निधो भव।

इमम्मे व्वरुण श्श्रुधीहवमद्या च मृडय। त्वा मवस्युराचके।

ॐ वरुणाय नमः वरुणमावाहयामि स्थापयामि।
ॐ वारुण्यै नमः वारुणामावाहयामि स्थापयामि।
ॐ पाशधारिण्यै नमः पाशधारिणामावाहयामि स्थापयामि।
ॐ बृहत्यै नमः बृहत्यामावाहयामि स्थापयामि।

ॐ वरुणाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

वरुणाय नमस्तेऽस्तु नमः स्फटिकदीप्तये।
नमस्ते श्वेतहाराय जलेशाय नमो नमः॥
शङ्खस्फटिकवर्णाभ श्वेतहाराम्बरावृत।
पाशहस्त महाबाहो दयां कुरु दयानिधे॥

स्तम्भमालभेत् – **ॐ ऊर्द्ध्व ऊषुणः०।**
स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**
शाखाबन्धनम् – **ॐ आयङ्गौः०।**
अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन वरुणाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

१३. अष्टवसु

पश्चिमवायव्यान्तराले श्वेतस्तम्भे अष्टवसून्—

आवाहयामि देवेशान्वसूनष्टौ महाबलान्।
सौम्यमूर्तिधरान्देवान्दिव्यायुधकरान्वितान्।
शुद्धस्फटिकसंकाशान्नानावस्त्रविराजितान्।
अश्वारूढान्दिव्यवस्त्रान् सर्वालङ्कारभूषितान्।
आवाहयामि स्तम्भेऽस्मिन्वसूनष्टौ सुखावहान्।

ॐ व्वसुभ्यस्त्वा रुद्रेभ्यस्त्वा दित्येभ्यस्त्वा- सञ्जानाथान्द्यावापृथिवी मित्रावरुणौत्वा व्वृष्ट्यावताम्। व्यन्तु व्वयोक्तᳪ रिहाणाम्मरुताम्पृषतीर्ग्गच्छव्वशापृश्निर्- भूत्वादिवङ्गच्छ ततो नो व्वृष्टिमावह चक्षुष्पाऽअग्ग्रेऽसि चक्षुर्म्मे पाहि ॥

ॐ अष्टवसुभ्यो नमः अष्टवसुनामावाहयामि स्थापयामि।
ॐ अदितये नमः अदितिमावाहयामि स्थापयामि।
ॐ अणिमायै नमः अणिमामावाहयामि स्थापयामि।
ॐ भूत्यै नमः भूतिमावाहयामि स्थापयामि।
ॐ गरिमायै नमः गरिमामावाहयामि स्थापयामि।

ॐ अष्टवसुवाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

नमस्करोमि देवेशान्नानावस्त्र विराजितान्।
शुद्धस्फटिकसंकाशान्दिव्यायुधधरान्वसून्।
दिव्यवस्त्रा दिव्यदेहाः पुष्पमालाविभूषिताः।
वसवोऽष्टौ महाभागा वरदाः सन्तु मे सदा।।

स्तम्भमालभेत् - ॐ ऊर्द्ध्वं ऽऊषुणo।
स्तम्भशिरसि - ॐ नागमात्रे नमःo।
शाखाबन्धनम् - ॐ आयङ्गौ?o।
अनुमन्त्रणम् - ॐ यतो यतःo।

ॐ अनेन कृतार्चनेन अष्टवसुवाद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

१४. धनदाय

वायव्यकोणे पीतस्तम्भे धनदं—

आवाहयामि देवेशं धनदं यक्ष पूजितम्।
महाबलं दिव्यदेहं नरयानगतं विभुम्।
दिव्यमालाम्बरधरं गदाहस्तं महाभुजम्।
आगच्छ यक्षराज त्वं यज्ञेऽस्मिन्सन्निधो भव।

ॐ सोमो धेनु ँ सोमोऽअर्व्वन्तमाशुꣳ सोमो व्वीरङ्कर्म्मण्ण्यन्ददाति। सादन्न्यं व्विदत्थ्य ꣳ सभेयम्पितृ श्श्रवणं य्योददाशदस्म्मै ॥

ॐ धनदाय नमः धनदमावाहयामि स्थापयामि।
ॐ अदित्यायै नमः अदित्यमावाहयामि स्थापयामि।
ॐ लघिमायै नमः लघिमामावाहयामि स्थापयामि।

ॐ धनदाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

यक्षराजनमस्तेऽस्तु नमस्ते नरयानग।
पीताम्बर नमस्तेऽस्तु गदापाणेनमोऽस्तुते॥
दिव्यदेह धनाध्यक्ष पीताम्बर गदाधर।
उत्तरेश महाबाहो वाञ्छितार्थफलप्रद॥

स्तम्भमालभेत् - **ॐ ऊर्द्ध्व ऽऊषुण०।**

स्तम्भशिरसि - **ॐ नागमात्रे नमः०।**

शाखाबन्धनम् - **ॐ आयङ्गौ०।**

अनुमन्त्रणम् - **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन धनदाद्यावाहितस्तम्भाधिष्ठातृ देवता: प्रीयन्तां न मम।

१५. गुरु

उत्तरवायव्ययोः पीतस्तम्भे गुरुम् —

आवाहयामि देवेशं गुरुम् त्रिदशपूजितम्।
हेमगोरोचनावर्णं पीनस्कन्धं सुवक्षसम्।
शङ्खं च कलशं चैव पाणिभ्यामिहबिभ्रतम्।

ॐ बृहस्पते ऽअति यदर्य्यो ऽअर्हाद्द्युमद्विभाति क्रतु-मज्जनेषु यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणन्धेहि चित्रम्॥

ॐ बृहस्पतये नमः बृहस्पतिमावाहयामि स्थापयामि।
ॐ पौर्णमास्यै नमः पौर्णमासीमावाहयामि स्थापयामि।
ॐ सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि।

ॐ गुर्वाद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

ब्रह्मपुत्र नमस्तेऽस्तु पीतध्वज नमोऽस्तुते।
त्रिदशार्चित देवेश सिन्धूद्भव नमोऽस्तुते॥
पूजितोऽसि मया शक्त्या दण्डहस्तबृहस्पते।
क्रूरग्रहाभिभूतस्य शान्ति देवगुरो कुरु॥

स्तम्भमालभेत् - **ॐ ऊर्द्ध्व ऽऊषुण०।**

स्तम्भशिरसि – ॐ नागमात्रे नमः०।

शाखाबन्धनम् – ॐ आयङ्गौः०।

अनुमन्त्रणम् – ॐ यतो यतः०।

ॐ अनेन कृतार्चनेन गुरुद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

१६. विश्वकर्मा

उत्तरेशानयोरन्तरे रक्तस्तम्भे विश्वकर्माणम्—

आवाहयामि देवेशं विश्वकर्माणमीश्वरम्।
मूर्तामूर्तकरं देवं सर्वकर्तारमीश्वरम्।
त्रैलोक्यसूत्रकर्तारं द्विभुजं विश्वदर्शितम्।
आगच्छ विश्वकर्मस्त्वं स्तम्भेऽस्मिन्सन्निधो भव।

ॐ विश्श्वकर्म्मन्हविषा व्वर्द्धनेनत्रातारमिन्द्र मकृणोरवद्ध्यम्। तस्म्मै व्विशः सर्मनमन्त-पूर्व्वी रयमुग्ग्रो व्विहव्यो यथासत्॥

ॐ विश्वकर्मणे नमः विश्वकर्माणमावाहयामि स्थापयामि।
ॐ सिनीवाल्यै नमः सिनीवालीमावाहयामि स्थापयामि।
ॐ सावित्र्यै नमः सावित्रीमावाहयामि स्थापयामि।
ॐ वास्तुदेवताभ्यो नमः वास्तुदेवता आवाहयामि स्थापयामि।

ॐ विश्वकर्माद्यावाहितस्तम्भाधिष्ठातृ देवताभ्यो नमः सकलोपचारार्थे गन्धाक्षत पुष्पाणि समर्पयामि।

पूजन कर नमस्कार करे—

नमामि विश्वकर्माणं द्विभुजं सर्वदशिनम्।
त्रैलोक्य सूत्रकर्तारं महाबलपराक्रमम्॥
प्रसीद विश्वकर्मस्त्वं शिल्पशास्त्रविशारद।
सदण्डपाणे द्विभुजस्तेजो मूर्ति प्रतापवान्॥

स्तम्भमालभेत् – **ॐ ऊर्द्ध्वं ऽऊषुणं०।**

स्तम्भशिरसि – **ॐ नागमात्रे नमः०।**

शाखाबन्धनम् – **ॐ आयङ्गौः०।**

अनुमन्त्रणम् – **ॐ यतो यतः०।**

ॐ अनेन कृतार्चनेन विश्वकर्माद्यावाहितस्तम्भाधिष्ठातृ देवताः प्रीयन्तां न मम।

एतावत्कर्म मण्डपान्तः स्थित्वा कर्तव्यमिति प्रतिष्ठासारिणी इति मण्डपे षोडशस्तम्भपूजा रुद्रकल्पद्रुमप्रतिष्ठाभास्कराद्युक्ता। स्तम्भशिरसि बलिकासु— ॐ नागमात्रे नमः।

सर्वेषां नागराजानां पातालतलवासिनाम्।
नागमातर आयान्तु भवन्तु सगणाः स्थिरा॥

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः। पितरञ्च प्प्रयन्त्स्वः॥

पूजन कर नमस्कार करे—

नमोऽस्तु बलिकावन्द्य सुदृढत्वं सुभाप्तिदम्।
एनं महामण्डपन्तु रक्ष-रक्ष निरन्तरम्॥

ॐ यतो यतः समीहसे ततो नोऽअभयङ्कुरु। शन्नः कुरु प्प्रजाब्भ्योभयन्नः पशुब्भ्यः॥

निम्न श्लोक से प्रार्थना करे—

शेषादिनागराजनाः समस्ता मम मण्डपे।
पूजाङ्गृह्णन्तु सततं प्रसीदन्तु ममोपरि॥

इस वैदिक मन्त्र व श्लोक का उच्चारण कर भूमि का स्पर्श करे—

ॐ भूरसि भूमिरस्यदितिरसि व्विश्वधाया व्विश्वस्य भुवनस्यधर्त्री पृथिवीं य्यच्छ पृथिवीन्दृ ह पृथिवीम्मा हि सीः॥

भूमिर्भूमिमदगान्माता यथा मातरमप्यगात् ।
भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् ।।

पुष्पाञ्जलि लेकर इस श्लोक का उच्चारण करे—

नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ।।

ॐ नृसिंह उग रुप ज्वलज्वल प्रज्वलप्रज्वल स्वाहा ।।

ॐ नमः शिवाय (अष्टवारं जपेत्) आठ बार पढें— उपरांत पुष्पाञ्जलि मण्डप में फेकें ।

तोरणपूजनम्

अब प्रचलित सम्प्रदाय के अनुसार अग्निपुराणोक्त तोरणपूजा लिखते हैं— अग्नि पुराणोक्त कलशद्वय स्थापन वर्जित है, कलश एक ही होना चाहिए जैसा कि प्रतिष्ठा रत्नमाला में निरर्देश है। (पूर्व में पीपल की लकड़ी)।

(१) पूर्व तोरण (प्रार्थना)

आयाहि वज्रसंघात पूर्वद्वार कृताधिप।
ऋग्वेदाधिपते तुभ्यं सुशोभन नमोऽस्तु ते।।
प्राचीं तु दिशमाश्रित्य सुदृढोनाम तोरणः।
महावीर्यो महाकाय इन्द्रायुध समप्रभः।।
एह्येहि ऋग्वेदाधिष्ठित इन्द्रदेवत्यशान्त अश्वत्थ।
सुदृढतोरण एनं यज्ञं रक्ष सर्वविघ्नान्निवारय।।

ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् । ॐ स्योना पृथिवीतिवा–

ॐ सुदृढतोरणाय नमः सुदृढतोरणमावाहयामि स्थापयामि ।

ॐ त्रिशूलश‍ृङ्गेषुशंखादिषु नमः त्रिशूलश‍ृङ्गेषुशंखा-मावाहयामि स्थापयामि ।

ॐ इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि ।

ॐ धात्रे नमः धातारमावाहयामि स्थापयामि ।

ॐ भगाय नमः भगमावाहयामि स्थापयामि ।

इत्यादिनाबाह्य तोरणशाखयोः सम्पूज्य प्रार्थयेत्—

यथा मेरुगिरेः श‍ृङ्गे देवानामालयः सदा ।
तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव ।।

तत्र कलश विधिना कलशं प्रतिष्ठाप्य कलशोपरि—इस प्रकार कलश विधि द्वारा कलश स्थापन कर कलश के ऊपर आवाह्न करे—

ॐ ध्रुवाय नमः ध्रुवमावाहयामि स्थापयामि ।

ॐ अध्वराय नमः अध्वरमावाहयामि स्थापयामि ।

इति वसुद्वयमावह्य तत्रैव नन्दिने नमः।

ॐ महाकालाय नमः महाकालमावाहयामि स्थापयामि ।

पुनस्तत्रैव—

ॐ धात्रे नमः धातारमावाहयामि स्थापयामि ।

ॐ विधात्रे नमः विधातारमावाहयामि स्थापयामि ।

ॐ द्वारश्रियै नमः द्वारश्रियमावाहयामि स्थापयामि ।

ॐ गणेशाय नमः गणेशमावाहयामि स्थापयामि ।

इत्यूर्ध्वम् । वास्तु पुरुषाय नमः–वास्तुमीत्यध आवाह्य पुनर्द्वारशाखयोः-भूर्लोकाय नमः भूर्लोकमावाहयामि। भुवर्लोकायनमः भुवर्लोकमावाहयामि। तत्रैव–आदित्याय नमः। ॐ मध्ये–मेधां पतये नमः ।

(२) दक्षिण तोरण

इस प्रकार पूजन कर दक्षिण की ओर जाकर आचमन करके मौली बन्धन करें।

औदुम्बरं च विकटं याम्येतोरणमुत्तमम् ।
रक्षार्थञ्चैव बध्नामि कर्मण्यस्मिन्सुखायनः ।।

ॐ इषे त्त्वोर्ज्जेत्वा व्वायवस्त्थ देवोवः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मणऽआप्प्यायदध्वमग्घ्न्या- ऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽ ईशत माघशं ६ सोध्ध्रुवाऽ अस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्य पशून्पाहि ।

ॐ सुभद्रतोरणाय नमः सुभद्रतोरणामावाहयामि स्थापयामि।
ॐ विकटतोरणाय नमः विकटतोरणमावाहयामि स्थापयामि।

इति सम्पूज्य तत्र त्रिशूलशृङ्गेषु प्रादक्षिण्येन —

ॐ सूर्यपूषाभ्यां० सूर्यपूषाणौ०। मध्ये– ॐ मित्राय नमः। ॐ वरुणाङ्गारकाभ्यां नमः ०।।

पूजन कर प्रार्थना करे—

यथामेरुगिरेः शृङ्गं देवानामालयः सदा ।
तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव ।।

तत्र पूर्व विधिना कलश संस्थाप्य कलशोपरि— **ॐ पर्जन्याय० मः। ॐ अशोकाय०। मध्ये– ॐ धरायै०।**

(३) पश्चिम तोरण

इस प्रकार पूजन कर पश्चिम की ओर जाकर आचमन कर मौली न्धन करे—

प्लाक्षं च पश्चिमे भीमं तोरणं स्वर्णसन्निभम्।
रक्षार्थञ्चैव बध्नामि कर्मण्यस्मिन्सुखानयः।।

ॐ अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि।।

ॐ सुभीमतोरणाय नमः सुभीमतोरणमा०।

ॐ सुकर्मतोरणाय नमः सुकर्मतोरणमा०।

इति सम्पूज्य तत्र त्रिशूलशृङ्गेषु प्रादक्षिण्येन—

ॐ अर्यमणशुक्राभ्यां नमः अर्यमणशुक्रौ०।

मध्ये- ॐ अंशवे नमः अंशुम्०। ॐ विवस्वद्बुधाभ्यां०। ॐ विवस्वद्बुधौ०।

इस प्रकार पून कर प्रार्थना करे—

यथा मेरूगिरे शृङ्गे देवानामालयः सदा।
तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव।।

तत्रैकं कलशं संस्थाप्य कलशोपरि— **ॐ अनिलाय०।**

ॐ अनलाय०। मध्ये-ॐ वाक्पतते नमः। ॐ वाक्पतिमा०।

(४) उत्तर तोरण

इस प्रकार पूजन कर उत्तर की ओर जाकर आचमन कर मौली बन्धन करे—

न्यग्रोधतोरणमिव उत्तरे च शशिप्रभम्।
रक्षार्थञ्चैव बध्नानि कर्मण्यस्मिन्सुशोभितम्।।

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तुनः।। सुहोत्रतोरणाय०।

इति सम्पूज्य—तत्र त्रिशूलशृङ्गेषु प्रादक्षिण्येन—

ॐ त्वष्ट्रासोमाभ्यां०। ॐ सवितृकेतुभ्यां। ॐ विष्णुशनिभ्यां नमः।।

इस प्रकार पूजन कर प्रार्थना करें—

यथा मेरुगिरेः शृङ्गे देवानामालयः सदा।
तथा त्वं मम यज्ञेऽस्मिन्देवाधिष्ठानको भव।।

तत्र एकं कलशं संस्थाप्य कलशोपरि— **ॐ प्रत्यूषाय०। ॐ प्रभासाय०। मध्ये–विघ्नेशाय०।** इति सम्पूज्य प्रार्थयेत्–

तोणाधिष्ठिता देवाः पूजिता भक्तिमार्गतः।
ते सर्वे मम यज्ञेऽस्मिन् रक्षां कुर्वन्तु वः सदा।।

इति तोरणपूजा।

अथ मण्डपस्यद्वारदेवतापूजनम्

दशदिक्पाल पूजन बलिदानम्

पूर्वद्वार पर जाकर आचमन प्राणायाम कर निम्न सङ्कल्प करे। मण्डप द्वार पूजन करके तब दशदिक्पाल का पूजन कर बलिदान दें—

पूर्वेगत्वा आचम्य प्राणानायम्य ततो देशकालौ सङ्कीर्त्य अस्मिन् अमुकयाग कर्मणि पूर्वादि द्वारपूजां करिष्ये। इति सङ्कल्प्य—

आयाहि वज्रसंघात पूर्वद्वार कृपाधिप।
ऋग्वेदाधिपते तुभ्यं सुशोभन नमोऽस्तु ते।।

उपर्युक्त श्लोक का उच्चारण कर दो कलशों को दरवाजे के दोनों तरफ स्थापित करे—

प्रथमदक्षिणकलशोपरि — **ॐ प्रशान्ताय०।**
द्वितीयोत्तरवामकलशोपरि—**ॐ शिशिराय०।**
ततो मध्ये तृतीय प्रथम
स्थापित कलशोपरि — **ॐ ऐरावताय०।**

इति गन्धादिना सम्पूज्य प्रार्थयेत्—इस प्रकार पूजन कर प्रार्थना करे—

सवस्त्रं सजलं गन्धं पुष्पपल्लवसंयुतम्।
सरत्नं स्थापयाम्येव द्वारेऽस्मिन्कलशद्वयम्।।

ॐ द्वारश्रियै नमः— **इति ऊर्ध्वम्।**
अधः — **देहल्यै नमः।**
दक्षिणशाखायाम् — **ॐ गणेशाय नमः।**
वामशाखायाम् — **ॐ स्कन्दाय नमः।**
द्वारकलशयोः — **ॐ गङ्गायै नमः।**
ॐ यमुनायै नमः।

इस प्रकार पूजन कर ऋग्वेद का पूजन करे— इति सम्पूज्य ऋग्वेदिनौ पूजयामि—**ॐ अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ।**

ब्राह्मण पूजन–

कर्मनिष्ठाःतपोयुक्ताब्राह्मणावेदपारगाः ।
जपार्थं चैव सूक्तानां यज्ञे भवत ऋत्विजौ।।

१. इन्द्रः

मध्य कलशोपरि—

एह्येहि सर्वामरसिद्धिसोध्यैरभिष्टुतो वज्रधरामरेश।
संवीज्यमानोऽप्सरसा गणेन रक्षाध्वरन्नो भगवन्नमस्ते।।

ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम्।
ह्वयामिशक्क्रंपुरुहूत मिन्द्र ँ स्वस्ति नो मघवा धात्विन्द्रः।।

इन्द्राय नमः इन्द्रमावाहयामि स्थापयामि ।

इति सम्पूज्य पीतध्वजपताकामालभ्य जपेत् - (पीली झण्डी)

ॐ आशुः शिशानो वृषभो नभीमो घनाघनः क्षोभणश्चर्षणीनाम्।
सङ्क्रन्दनो निमिषऽएकवीरः शत ँ सेनाऽअजयत्साकमिन्द्रः।।

इमां पताकां पीतां च ध्वजं पीतं सुशोभनम्।
आलभामि सुरेशाय शचीप्रीत्यै नमो नमः।।

ध्वजपताकायोर्मध्ये–**ॐ हेतुकाराय नमः। ॐ क्षेत्रपालाय नमः**

इस प्रकार पूजन कर प्रार्थना करे—

इन्द्रः सुरपतिः श्रेष्ठो वज्रहस्तोमहाबलः।
शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः।।

ततोबलिदानम् –

माषभक्तवलिं देव गृहाणेन्द्र शचीपते।
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव।।

ॐ नमो भगवते इन्द्राय सकलसुराणामधिपतये सवाहनाय सपरिवारायसशक्तिकाय तत्पार्षदेभ्यः सर्वेभ्यः भूतेभ्यः इमं सदीपदधिभाषभक्तबलिं समर्पयामि।

प्रार्थना –

भो इन्द्र स्वां दिशं रक्ष बलिं भक्ष मम सुकुटुम्बस्य सपरिवारस्य गृहे आयुः कर्त्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता अरोग्यकर्ता वरदोभव।

हाथ में जल लेकर–**अनेन बलिदानेन इन्द्रः प्रीयतां न मम।**

२. अग्नि

अग्निकोण में जाकर पूर्व की तरह आचमन प्राणायाम कर पूजन करे—

अग्निकोणमागत्य पूर्वप्रकारेण संस्थाप्य आचम्य कलशोपरि–

ॐ पुण्डरीकाय नमः। ॐ अमृताय नमः।

ॐ एह्येहि सर्वामरहव्यवाह मुनिप्रवर्यैरभितोऽभिजुष्ट।
तेजोवता लोकगणेन सार्द्ध ममाध्वरं पाहि कवे नमस्ते।।

ॐ सप्तार्चिषं च बिभ्राणमक्षमालां कमण्डलुम्।
ज्वालमालाकुलं रक्तं शक्तिहस्तमजासनम्।।

त्वन्नोऽअग्ने तव देव पायुभिर्म्मघोनो रक्ष तन्वश्च वन्द्य त्राता तोकस्य तनये गवामस्य निमेषꣳ रक्षमाणस्तव व्व्रते।।

अग्नये नमः अग्निमावाहयामि स्थापयामि ।

इति सम्पूज्य ध्वजपताकामालभ्य – (लाल झण्डी)

इस प्रकार पूजन कर ध्वज पताका का पूजन करे —

पताकामग्नये रक्तां गन्धमाल्यादिभूषिताम्।
स्वाहायुक्त देवाय ह्यालभामि हविर्भुजे।।

ॐ अग्निन्दूतं पुरोदधे हव्यवाहमुप ब्रुवे । देवाँ २ आसादयादिह।।

ध्वजपताकयो : ॐ कुमुदाय नमः। ॐ क्षेत्रपालाय नमः।।

पूजन कर नमस्कार करे —

आग्नेय पुरूषो रक्तः सर्वदेवमयोत्ययः।
धूम्रकेतुरजोऽध्यक्षस्तस्मै नित्यं नमो नमः।।

ततो बलिदानम् –

इमं माष बलिं देव गृहाणाग्ने हुताशन।
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव।।

अग्नेय साङ्गाय सपरिवाराय सशक्तिकाय इमं सदीपदधिमाषभक्त बलिं समर्पयामि ।

प्रार्थना— भो अग्ने स्वां दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्य सपरिवारस्य गृहे आयुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव।

हस्ते जलं गृहीत्वा– अनेन बलिदानेन अग्निः साङ्गः सपरिवारः सशक्तिकः प्रीयतां न मम ।

३. यम

दक्षिणे गत्वा आचम्य द्वारकलशौ स्थापयेत् - सम्पूज्य नमस्कुर्यात्। इस प्रकार दक्षिण की ओर जाकर आचमन एवं **प्राणायाम कर दो कलशो को दोनों तरफ स्थापित करें।**

ॐ नमस्ते धर्मराजाय त्रेतायुगाधिपाय च।
यजुर्वेदादिदेवाय सुभद्रं द्वार दक्षिणे।।

ततः कलशोपरि–ॐ पर्जन्याय नमः, ॐ अशोकाय नमः।

मध्यकलशे – ॐ वामनाख्यदिग्गजाय नमः।

इस प्रकार पूजन कर प्रार्थना करे—

सवस्त्रं सजलं गन्धं पुष्पपल्लवसंयुतम्।
सरत्नं स्थापयाम्येव द्वारेऽस्मिन्कलशद्वयम्।।

ततो द्वारोर्ध्वे – ॐ द्वारश्रियै नमः
अधः – ॐ देहल्यै नमः
द्वारशाखयोः – ॐ पुष्पदन्ताय नमः। ॐ कपर्दिने नमः।
द्वारकलशयोः – ॐ गोदावर्यै नमः। ॐ कृष्णायै नमः।

इस प्रकार पूजन कर प्रार्थना करे—

वैवस्वतः महादेव नमस्ते धर्मसाक्षिक।
शिवाज्ञयाऽपिहितो देव दिशं रक्ष भवानिह।।

यजुर्वेद का पूजन करे — ततो यजुर्वेदिनौ पूजयेत् —

ॐ इषे त्वोर्ज्जेत्वा वायवस्थ देवो वः सविता प्रार्प्पयतु श्रेष्ठतमाय कर्म्मणऽआप्प्यायद्ध्वमग्न्याऽइन्द्रायभागं प्रजावती रनमीवाऽअयक्ष्मा मावस्तेनऽईशत माघशंऽ सोध्रुवाऽअस्मिन्गोपतौस्यात बह्वीर्य्यजमानस्य पशून्पाहि ।

इस प्रकार यजुर्वेद का पूजन कर यम का पूजन कर बलिदान देवे।
ततो मध्यकलशोपरि (यम)—

एह्योहि वैवस्वत धर्मराज सर्वामरैरर्चित धर्ममूर्ते।
शुभाशुभानन्दशुचामधीश शिवाय नः पाहि मखं नमस्ते।।

ॐ यमाय त्वाङ्गिरस्वतेपितृमते स्वाहा। स्वाहा घर्म्माय स्वाहा घर्म्मः पित्रे ॥

यमाय नमः यमं साङ्गं सपरिवारमावाहयामि स्थापयामि। इति सम्पूज्य ध्वजपताका मालभ्य—

कृष्णवर्णां पताकांच कृष्णवर्णध्वजं तथा।
अन्तकायालभामीह क्रतुकर्मणि साक्षिणे।।

ॐ यमाय त्वा ०

इमां पताकां रम्यां च ध्वजं माल्यादिभूषितम्।
यमदेव गृहाण त्वं प्रसीद करुणाकर।।

ध्वज पताका का पूजन कर प्रार्थना करें—

यमस्तु महिषारुढो दण्डहस्तो महाबलः।
धर्मसाक्षी विशुद्धात्मा तस्मै नित्यं नमो नमः।।

प्रार्थना कर बलिदान देवे—

इमं माष बलिं देव गृहाणान्तक वै यम।
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव।।

ॐ यमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप दधिमाषभक्त बलिं समर्पयामि।

प्रार्थना— भो यम बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता शान्तिकर्ता तुष्टिकर्ता पुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव।

हस्ते जलं गृहीत्वा— अनेन बलिदानेन यमः साङ्गः सपरिवारः सायुधः सशक्तिः प्रीयतां न मम।

४. नैर्ऋत्य

नैर्ऋत्य कोण में जाकर आचमन एवं प्राणायाम कर कलश स्थापित करे। नैर्ऋत्ये गत्वा कलशं संस्थाप्य—

निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनम्।
आवाहयामि यज्ञेऽस्मिन्पूजेयं प्रतिगृह्यताम्।।

कलशोपरि– ॐ कुमुदाय नमः। ॐ दुर्जायाय नमः।

इति सम्पूज्य कलशे— इस प्रकार पूजन कर कलश में नैर्ऋत्य का पूजन करे।

एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसङ्घैः।
ममाध्वरं पाहि पिशाचनाथ लोकेश्वर त्वं भगवन्नमस्ते।।

ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्त्यामन्विहि तस्करस्य। अन्यमस्मदिच्छ सा तऽ इत्या नमो देवि निर्ऋते तुभ्यमस्तु। निर्ऋतिं सपरिवारं सायुधं आवाहयामि स्थापयामि।

इस प्रकार पूजन कर ध्वज पताका का पूजन करे (नीले रंग की झण्डी)— **ध्वजपताकामालभ्य पताकानिर्ऋतिश्चैव नीलवर्ण ध्वजं तथा। पिशाचगणनाथाय आलभामि ममाध्वरे।**

ॐ असुन्वतम्........० — सम्पूज्य ध्वजपताकयोः। ॐ कुमुदाय नमः। ॐ क्षेत्रपालाय नमः।

पूजन कर प्रार्थना करे—

सर्वप्रेताधिपो देवो निर्ऋतिर्नील विग्रहः।
करे खड्गधारो नित्यं निर्ऋतये नमो नमः।।

ततो बलिदानम् — इमं माषबलिं यक्षो गृहाण निर्ऋतेप्रभो । यज्ञ संरक्षणार्थाय प्रसन्नो वरदो भव ।।

निर्ऋतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप दधिमाषभक्तबलिं समर्पयामि ।।

प्रार्थना— भो निर्ऋते बलिं गृहाण मम सकुटुम्बस्य आयुः सपरिवारस्यः कर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता वरदो भव।

हस्ते जलं गृहीत्वा—अनेन बलिदानेन निर्ऋतिः साङ्गः सपरिवारः सायुधः सशक्तिकः प्रीयतां न मम।

५. वरुण

पश्चिम में जाकर आचमन एवं प्राणायाम करे तब कलश स्थापित कर पूजन कर नमस्कार करें—

नमोस्तुकामरूपाय पश्चिमद्वारश्रिताय च।
सामवेदाधिपस्त्वं हि नाम्ना कल्याणकारक।।

कलशोपरि — ॐ भूतसञ्जीवनाय०। ॐ अमृताय०।

मध्यकलशे — ॐ अनन्ताख्यदिग्गजाय०।

द्वारोर्ध्वम् — ॐ द्वारश्रियै नमः ।

अधः — ॐ देहल्यै नमः ।

द्वारशाखयोः — ॐ नन्दिन्यै० । चण्डायै नमः ।

द्वारकलशयोः — ॐ रेवायै० । ॐ ताप्यै० ।

इति सम्पूज्य सामवेदिनौ पूजयेत् — **ॐ अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बहिर्षि ।**

इति सम्पूज्य मध्य कलशे—

एह्येहि यादोगणवारिधीनां गणेन पर्जन्य सहाप्सरोभिः।
विद्याधरेन्द्रामरगीयमान पाहि त्वमस्नाभगवन्नमस्ते।।

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहबोध्युरुशꣳस मान ऽआयुः प्रमोषीः॥

वरुणं साङ्गं सपरिवारम् आवाहयामि। वरुणाय साङ्गाय सपरिवाराय नमः। इति सम्पूज्य ध्वजपताकामालभ्य—(सफेद झण्डी)—

श्वेतवर्णां पताकां च ध्वजं श्वेतमयं शुभम्।
वरुणाय जलेशाय ह्यालभामि सुखाप्तये।।

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय। अथा वयमादित्य व्रते तवानागसोऽअदितये स्याम॥

इस प्रकार पूजन कर प्रार्थना करे—

पाशहस्तस्तु वरुणः साम्भसाम्पतिरीश्वर।
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव।।

ततो बलिदानम् — वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपदधिमाषभक्तबलिं समर्पयामि ॥

प्रार्थना — भो वरुण बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदोभव।

जलं गृहीत्वा — अनेन बलिदानेन नमो भगवते सकलजलानामधिपतये न मम।

६. वायु

वायवे गत्वा आचम्य कलशं प्रतिष्ठाप्य कलशे— वायुकोण में जाकर आचमन कर कलश स्थापित कर पूजन करें—

ॐ पुष्पदन्ताय नमः। ॐ सिद्धार्थाय नमः। इति गन्धादिभिः सम्पूज्य कलशोपरि—

एह्येहि यज्ञे मम रक्षणार्थं मृगाधिरुढः सह सिद्धसङ्घैः।
प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते॥

ॐ आनो॑ नि॒युद्भिः॑ श॒तिनी॑भिरध्व॒रꣳ स॒ह॒स्रिणी॑भि॒रुप॑याहि य॒ज्ञम्। वाय्यो॑ऽअ॒स्मिन्त्सव॑ने मादयस्व यूयं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ वायवे नमः वायु०।

सम्पूज्य ध्वजपताकामालभ्य—

पताकां वायवे धूम्रां धूमवर्णध्वजं तथा।
आलभाम्यनुरुपाय प्राणदाय हिताय च॥

ॐ वाया॒ ये ते॑ सह॒स्रिणो रथा॑स॒स्ते भि॒रागहि। नि॒युत्वा॒न्त्सोम॑पीतये।

इति सम्पूज्य प्रार्थयेत् —

अनाकारो महौजाश्च सर्वगन्धवहः प्रभुः।
तस्मै पूज्याय जगतो वायवेऽहं नमामि च॥

ततो बलिदानम् —

ॐ माषभक्त बलिं वायो मया दत्तं गृहाण प्रभो।
यज्ञ संरक्षणार्थाय प्रसन्नो वरदो भव॥

वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं दधिमाषभक्तबलिं समर्पयामि।

भो वायु साङ्गः सपरिवारः सायुधः सशक्तिकः मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता वरदो भव।

अनेन बलिदानेन नमो भगवते वायवे सकलप्राणानामधिपतये प्रीयतां न मम।

७. सोम

उत्तर की ओर जाकर आचमन कर द्वारकलश स्थापित कर पूजन करें—

नमस्ते दिव्यरुपत्वमथर्वाधिपते प्रभो।
कालावधिपनिर्नाम्ना मङ्गलञ्चोत्तरानन॥

कलशोपरि — ॐ धनदाय नमः। ॐ श्रीप्रदाय नमः।

मध्य कलशे — ॐ सार्वभौमदिग्गजाय नमः।

इति सम्पूज्य द्वारोर्ध्वम् — ॐ द्वारश्रियै नमः।

अधः — ॐ देहल्यै नमः।

द्वारशाखयोः — महाकालाय नमः।

द्वारशाखयोः — भृङ्गिणे नमः।

द्वारकलशयोः — ॐ नर्मदायै नमः। ॐ ताप्यै नमः।

इति सम्पूज्य अथर्ववेदिनौ पूजयेत्—**ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शंय्योरभिस्त्रवन्तु नः॥**

मध्ये कलशे —

एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्धम्॥
सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते॥

ॐ व्वय ꣳ सोम व्व्रते तव मनस्तनूषु बिब्भ्रतः। प्रजावन्तः सचेमहि॥ सोमाय नमः सोममा०।

इति सम्पूज्य ध्वजपताकामालभ्य (हरी झण्डी)—

हरितवर्णां पताकां च हरिद्वर्णमयं ध्वजम्॥
कुबेराय लभाम्येव पूजये च सदार्थिना॥

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे ॥

सम्पूज्य प्रार्थना– गौरोपमपुमान्स्थूलः सर्वौषधिरसादयः। नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः।।

ततो बलिदानम् — इमं माषभक्तबलिं देव गृहाण त्वं धनप्रद। यज्ञसरक्षणार्थाय प्रसन्नो वरदो भव।

सोमाय साङ्गाय सपरिवारय सायुधाय इमं सदीप-दधिमाषभक्त बलिं समर्पयामि।

प्रार्थना — भो सोम बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयु:कर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ।।

जलं गृहीत्वा — अनेन बलिदानेन नमो भगवते सोमाय सकलकोशाधि-पतये प्रीयतां न मम।

८. ईशान

ईशान कोण में जाकर आचमन कर कलश स्थापित करे— ईशानेगत्वा आचम्य कलशं संस्थाप्य।

कलशे— **ॐ सुप्रतीकाय नमः। ॐ मंगलाय नमः।** इति सम्पूज्य पुनः—

कलशोपरि—

एह्येहि विश्वेश्वर नस्त्रिशूलकपालखट्वाङ्गधरेण सार्धम्। लोकेश भूतेश्वर यज्ञसिध्यै गृहाण पूजां भगवन्नमस्ते।।

ॐ तमीशानञ्जगतस्तस्थुषस्प्पतिन्धियञ्जिन्वमवसे हूमहे वयम्। पूषा नो यथा व्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये। ईशानाय नमः ईशानमा०।

इति सम्पूज्य ध्वजपताकामालभ्य— (सफेद झण्डी)

ईशानाय ध्वजं श्वेतं पताकां गन्धभूषिताम्।
आलभामि महेशाय वृषारूढाय शूलिने।।

ॐ तमीशानञ्जगतस्त — इस प्रकार पूजन कर प्रार्थना करे—

सर्वाधिपो महादेवः ईशानः शुक्ल ईश्वरः।
शूलपाणिर्विरुपाक्षः तस्मै नित्यं नमो नमः।।

ततो बलिदानम् —

इमं माषबलिं देव गृहाणेशानशङ्कर।
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव।।

ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप-दधिमाषभक्तबलिं समर्पयामि।

भो ईशान बलिं गृहाण मम सकुटुम्बस्य सपरिवारस्य आयुःकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदोभव।

हस्ते जलं गृहीत्वा — अनेन बलिदानेन ईशानः साङ्गः सपरिवारः सायुधः सशक्तिकः प्रीयतां न मम।

९. ब्रह्मा

ईशानेन्द्रयोर्मध्ये गत्वा आचम्य कलशं प्रतिष्ठाप्य कलशोपरि— (ईशान और पूर्व के मध्य में स्थित ब्रह्मा का पूजन कर बलिदान दे—)

एह्येहि विष्णवाधिपते सुरेन्द्र लोकेन सार्द्धंपितृदेवताभिः।
सर्वस्य धातास्यमितप्रभावो विशाध्वरत्रः सततं शिवाय।।

ॐ अस्म्मेरुद्रा मेहना पर्व्वतासोव्वृत्रहत्त्ये भरहूतौ सजोषाः। यः शꣳसंते स्तुवते धायिवज्र ऽइन्द्र ज्येष्ठा ऽअस्म्माँ२ ऽअवन्तु देवाः॥ ब्रह्मणे नमः ब्रह्माणं०।

इति सम्पूज्य ध्वज पताकामालम्भ्य—

पद्मवर्णां पताकां च पद्मवर्णं ध्वजं तथा।
आलभामि सुरेशाय ब्रह्मणेऽनन्तशक्तये।।

ॐ ब्रह्मंयज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन ऽआवः। स बुध्न्याऽउपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥

पूजन कर प्रार्थना करें—

पद्मयोनिश्चतुमूर्त्ति वेदव्यासपितामहः।
यज्ञाध्यक्षश्चतुर्वक्रस्तस्मै नित्यं नमो नमः।।

ततो बलिदानम् —

इमं माषबलिं ब्रह्मन् गृहाण कमलासन।
यज्ञसंरक्षणार्थाय प्रसन्नो वरदो भव।।

ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप-दधिमाषभक्त बलिं समर्पयामि ।

प्रार्थना–**भो ब्रह्मन् मम सकुटुम्बकस्य सपरिवास्यायुः कर्ता शान्ति कर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वर दो भव ।**

हस्ते जलं गृहीत्वा — **अनेन बलिदानेन नमो भगवते ब्रह्मणे सकलवेद-शास्त्रतत्वज्ञानाधिपतये प्रीयतां न मम ।**

१०. अनन्त

नैर्ऋत्यपश्चिमयोर्मध्ये गत्वा आचम्य कलशं प्रतिष्ठाप्य वरुणाय नमः सम्पूज्य पुनः कलशोपरि — (नैर्ऋत्य कोण और पश्चिम के मध्य में अनन्त का पूजन कर बलिदान देवें ।)

एह्येहि पातालधरामरेन्द्र नागाङ्गकिन्नरगीयमान।
यज्ञोरगेन्द्रामरलोक सङ्घैरनन्त रक्षाध्वरमस्मदीयम्।।

ॐ स्योना पृथिवि नो भवान्नृक्षरा निवेशनी ॥
यच्छा नः शर्म्म सप्रथाः ।

अनन्ताय नमः अनन्तमावाहयामि०। इति सम्पूज्य ध्वज-पताकामालम्भ — (पीली या काली झण्डी)

ॐ मेघवर्णां पताकां च मेघवर्णं ध्वजन्तथा।
आलभामि ह्यनन्ताय धरिणीधारिणे नमः।।

ॐ नमोऽस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ।
येऽ अन्तरिक्षे ये दिवितेभ्यः सर्प्पेभ्यो नमः ॥

इति सम्पूज्य प्रार्थयेत् –

घनवर्णां पताकेमां ध्वजं गन्धविभूषितम् ।
स्थापयामि प्रसन्नाय अनन्ताय नमो नमः ।।

ततो बलिदानम् –

इमं माषबलिं शेष गृहाणानन्तपन्नग।
यज्ञसंरक्षणर्थाय प्रसन्नो वरदो भव।।

अन्ताय सांगाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीप-दधिभाषभक्तबलिं समर्पयामि ।

प्रार्थना — **भो अनन्त बलिं गृहाण मम सकुटुम्बस्य सपरिवास्यायुः कर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता क्षेमकर्ता आरोग्यकर्ता वरदो भव ।**

हस्ते जलं गृहीत्वा –

अनेन बलिदानेन अनन्तः प्रीयतां न मम ।

अथमहाध्वजपूजनं मण्डपमध्ये

ॐ इन्द्रस्य व्वृष्णो व्वरुणस्य राज्ञऽआदित्यानाम्मरुतार्ठ०शर्द्धऽउग्ग्रम्। महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्त्थात् ॥

इति षोडशहस्तवंशे महाध्वजं विचित्रवर्णं प्रान्तः किंकिण्यादियुतं त्रिहस्तविस्तृतं सप्तहस्तदीर्घं वा पञ्चहस्तविस्तृत दशहस्तदीर्घं संस्थाप्य।

ॐ ब्ब्रह्म यज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो व्वेन ऽआवः। स बुध्न्या ऽउपमा ऽअस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः॥

सम्पूज्य मण्डपषोडशस्तम्भेषु– ॐ सर्वेभ्यो देवेभ्यो नमः । **वंशेषु–** ॐ किन्नरेभ्यो नमः । **पृष्ठे–** ॐ पन्नगेभ्यो नमः।।

मण्डपाद्बहिः प्राच्यामुपलिप्त भूमावुपविश्य सम्पूज्य आलभेत् —

इमं विचित्रवर्णन्तु महाध्वजविनिर्मितम।
महाध्वजञ्चालभामि महेन्द्राय सुप्रीतये।।

ॐ ब्ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेन ऽआवः। स बुध्न्या ऽउपमाऽ अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवः ॥

अमुमहाध्वजं चित्तं सर्वविघ्नविनाशकम्।
महामण्डपमध्येतु स्थापयामि सुरार्चने।।

ॐ इन्द्रस्य व्वृष्णो व्वरुणस्य राज्ञ ऽआदित्यानाम्मरुतार्ठ० शर्द्ध ऽउग्ग्रम्। महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥

अनया पूजया इन्द्रः प्रीयतां न मम ॥

ततो मण्डपषोडशलिकासु –

ॐ सर्वेभ्यो नमः मण्डपपृष्ठैः - ॐ पन्नगेभ्यो नमः २ तत्राष्टदलं विलिख्य तत्राष्टदलेषु ।।

ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो। विश्वरूपेभ्यश्च वो नमो नमः ॥

सम्पूज्य प्रार्थयेत् –

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मविष्णुशिवैः सार्द्धरक्षां कुर्वन्तु तानि वै।।
देवदानवगन्धर्वा यक्षराक्षस पन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च।।
सर्वे ममाध्वरं रक्षां प्रकुर्वन्तु मुदान्विताः।
ब्रह्मा विष्णुश्च क्षेत्रपालो गणैः सह।।
रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः।।

इति पठित्वाऽक्षतपुञ्जेषु पूर्वादिक्रमेण–

१. त्रैलोक्यस्थेभ्यः स्थावरेभ्यो नमः त्रैलोक्यस्थावारानावाहयामि।
२. त्रैलोक्यस्थेभ्यश्चरेभ्यो नमः त्रैलोक्यस्थरेभ्यश्चरानावाहयामि।
३. ॐ ब्रह्मणे नमः ब्रह्मणमावाहयामि।
४. ॐ विष्णवे नमः विष्णुमावाहयामि।
५. ॐ शिवाय नमः शिवमावाहयामि।
६. ॐ देवेभ्यो नमः देवानावाहयामि।
७. ॐ दानवेभ्यो नमः दानवानावाहयामि।
८. ॐ गन्धर्वेभ्यो नमः गन्धर्वानावाहयामि।
९. ॐ यक्षेभ्यो नमः यक्षानावाहयामि।

१०. ॐ राक्षसेभ्यो नमः राक्षसानावाहयामि।
११. ॐ पन्नगेभ्यो नमः पन्नगानावाहयामि।
१२. ॐ ऋषिभ्यो नमः ऋषीनावाहयामि।
१३. ॐ मुनिभ्यो नमः मुनीनावाहयामि।
१४. ॐ गोभ्यो नमः गाः आवाहयामि।
१५. ॐ देवमातृभ्यो नमः देवमातृ आवाहयामि।

इत्यावाह्य सम्पूज्य- सर्वेभ्यो बलिं दत्वा तत्रैव गणपतिमावाह्य सम्पूज्य बलिं दत्वा-

ॐ नमोऽस्तुरुद्द्रेब्भ्योयेदिवि येषां व्वर्षमिषवः। तेब्भ्यो-दशप्प्राचीर्द्दश दक्क्षिणादशप्प्रतीची र्द्दशोदीची-र्द्दशोर्द्ध्वाः॥ तेब्भ्यो नमोऽअस्तु तेनोऽवन्तु ते नो मृडयन्तुते यन्द्दिष्म्मोयश्श्च नोद्वेष्ट्टितमेषाञ्जम्भेदद्ध्मः॥

इति मन्त्रेण दिक्षु विदिक्षु अक्षतपुञ्जेषु रुद्रमावाह्य सम्पूज्य बलिं दत्वा सर्वान विसृज्य ईशाने सर्वभूतबलिंदत्वा दद्यात् तत्र मन्त्राः- ते च पूर्तकमलाकरोद्योता तावुक्ता उच्यन्ते-

अधश्चैवतु ये लोका असुराश्चैव पन्नगाः।
सपत्नीपरिवाराश्च प्रतिगृह्णन्त्विमं क्लिम्।।
नक्षत्राधिपतिश्चैव नक्षत्रैः परिवारितः।
स्थानं चैव पितृणां तु सर्वे गृह्णान्त्विमं बलिम्।।
ईशानोत्तरयोर्मध्ये क्षेत्रपालो महाबलः।
मीननामा महादंष्ट्रः प्रतिगृह्णन्त्विमं बलिम्।।
ये केचित्त्विहलोकेषु आगता बलिकाङ्क्षिणः।
तेभ्यो बलिं प्रयच्छामि नमस्कृत्य पुनः पुनः।।

बलिं गृह्णान्त्विमे देवा आदित्या वसवस्तथा।
मरुतश्चाश्विनौ रूद्राः सुपर्णाः पन्नगाः गृहाः।।
असुरायातु धानाश्च पिशाचा मातरो गणाः।
शाकिन्यो यक्ष वेताला योगिन्यः पूतनाः शिवाः।।
जृम्भका सिद्धगन्धर्वा नागविद्याधरा नगाः।
दिक्पालाश्च लोकपालाश्चये च विघ्नविनायकाः।।
जगतां शान्तिकर्तारोब्रह्माद्याश्च महर्षयः।
मां विघ्नं मा च ये पापा, मा सन्तु परिपान्थिनः।।
सौम्य भवन्तु तृप्ताश्च देवा भूतगणास्तथा।
ते गृह्णन्तु मया दत्तं बलिं वै सार्वभौतिकम्।।

अनेन बलिदानेन अधोलोकादयः प्रीयन्तां न मम।। ततः प्रक्षालितपादपाणिः प्राग्द्वारेणमण्डपं प्रविश्यं यजमानो दक्षिणत उपविश्य यथा विहितं कर्म कुरुध्व मिति प्रेषयोदति कमलाकरादयः।

हाथ-पैर धोकर मण्डप में प्रवेश करें।

।। इति मण्डपस्यद्वारदेवतापूजनं समाप्तः ।।

अथ चतुःषष्टियोगिनी स्थापनम्

वेदी के ऊपर वस्त्र बिछाकर दक्षिण तथा उत्तर की तरफ से नव रेखा खींचे इस प्रकार चौंसठ कोष्ठ (खाने) बन जायेंगे। सर्वोपरि भाग में तीन त्रिकोण बनाकर तीन कलशों को स्थापित कर दक्षिण से उत्तर की ओर क्रमशः महाकाली, महालक्ष्मी, महासरस्वती की पूजा करें तथा चौंसठ खाना त्रिकोण बनाकर पश्चिम से पूर्व की ओर आवाहन तथा स्थापन करें। कलशों के ऊपर अग्न्युत्तारण पूर्वक महाकाली, महालक्ष्मी तथा महासरस्वती की स्वर्णमयी प्रतिमा स्थापित करें।

सङ्कल्पः—कर्ता दक्षिणहस्ते जलाक्षत द्रव्यं चादाय सङ्कल्पं कुर्यात्—देशकालौ सङ्कीर्त्य, अमुकगोत्रः अमुकशर्माऽहं (वर्माऽहं गुप्तोऽहं दासोऽहम्) सपत्नीकोऽहं अस्मिन् अमुकयागकर्मणि महाकाली - महालक्ष्मी - महासरस्वतीपूजनपूर्वक दिव्यादि चतुःषष्टियोगिनीनां स्थापनं पूजनं करिष्ये।।

प्रथम कलशोपरि—

ॐ महाकाल्यै नमः महाकालीम् मावाहयामि स्थापयामि।

ॐ महालक्ष्म्यै नमः महालक्ष्मी मावाहयामि स्थापयामि।

तदुत्तरतः द्वितीय कलशपात्रोपरि।

ॐ महासरस्वत्यै नमः महासरस्वती मावाहयामि स्थापयामि। तदुत्तरतस्तृतीय कलशपात्रोपरि।

दक्षिण के प्रथम पङ्क्ति में नीचे के कोष्ठकों से ऊपर की ओर आवाहन करें।

प्रथम पंक्ति में—

(१) **प्रथम कोष्ठे—** ॐ दिव्ययोगिन्यै नमः दिव्ययोगिनीम् आवा०स्था०।

(२) **द्वितीय कोष्ठे—** ॐ महायोगिन्यै नमः महायोगिनीम् आवा०स्था०।

(३) **तृतीय कोष्ठे—** ॐ सिद्धयोगिन्यै नमः सिद्धयोगिनीम् आवा०स्था०।

(४) **चतुर्थ कोष्ठे—** ॐ माहेश्वर्य्यै नमः माहेश्वरी मावाहयामि स्थापयामि।

(५) **पञ्चमे कोष्ठे—** ॐ प्रेताक्ष्यै नमः प्रेताक्षीम् आवाहयामि स्थापयामि।

(६) **षष्ठे कोष्ठे—** ॐ डाकिन्यै नमः डाकिनीम् आवाहयामि स्थापयामि।

(७) **सप्तमे कोष्ठे—** ॐ काल्यै नमः कालीम् आवाहयामि स्थापयामि।

(८) **अष्टमे कोष्ठे—** ॐ कालरात्र्यै नमः, कालरात्रीमावाहयामि स्थापयामि।

द्वितीय पंक्ति में—

(१) **प्रथम कोष्ठे—** ॐ निशाकर्यै नमः निशाकरीम् आवा०स्था०।

(२) **द्वितीय कोष्ठे—** ॐ हुङ्कार्य्यै नमः हुङ्कारीम् आवा०स्था०।

(३) **तृतीय कोष्ठे—** ॐ सिद्धिवैतालिकायै नमः सिद्धिवैतालिकामावा०स्था०।

(४) चतुर्थ कोष्ठे– ॐ ह्रींकार्य्यै नमः ह्रींकारीम् आवाहयामि स्थापयामि।
(५) पञ्चमे कोष्ठे– ॐ भूतडामरायै नमः भूतडामरामावाहयामि स्थापयामि।
(६) षष्ठे कोष्ठे– ॐ ऊर्ध्वकेश्यै नमः ऊर्ध्वकेशीमावाहयामि स्थापयामि।
(७) सप्तमे कोष्ठे– ॐ विरुपाक्ष्यै नमः विरुपाक्षीमावाहयामि स्थापयामि।
(८) अष्टमे कोष्ठे– ॐ शुष्काङ्ग्यै नमः, शुष्काङ्गीमावाहयामि स्थापयामि।

तृतीय पंक्ति में–

(१) प्रथम कोष्ठे– ॐ नरभोजन्यै नमः नरभोजनीम आवा०स्था०।
(२) द्वितीय कोष्ठे– ॐ फेत्कार्यै नमः फेत्कारीम् आवा०स्था०।
(३) तृतीय कोष्ठे – ॐ वीरभद्रायै नमः वीरभद्राम् आवा०स्था०।
(४) चतुर्थ कोष्ठे– ॐ धूम्राक्ष्यै नमः धूम्राक्षी मावाहयामि स्थापयामि।
(५) पञ्चमे कोष्ठे– ॐ कलहप्रियायै नमः कलहप्रिया मावा० स्थापयामि।
(६) षष्ठे कोष्ठे– ॐ राक्षस्यै नमः राक्षसी मावाहयामि स्थापयामि।
(७) सप्तमे कोष्ठे–ॐ घोररक्ताक्ष्यै नमः घोररक्ताक्षीम् आवा० स्थापयामि।
(८) अष्टमे कोष्ठे– ॐ विशालाक्ष्यै नमः, विशालाक्षी मावा० स्थापयामि।

चतुर्थ पंक्ति में–

(१) प्रथम कोष्ठे– ॐ कौमार्यै नमः कौमारीम् आवाहयामि स्थापयामि।
(२) द्वितीय कोष्ठे– ॐ चण्ड्यै नमः चण्डीम् आवाहयामि स्थापयामि।
(३) तृतीय कोष्ठे – ॐ वाराह्यै नमः वाराहीम् आवाहयामि स्थापयामि।
(४) चतुर्थ कोष्ठे–ॐ मुण्डधारिण्यै नमः मुण्डधारिणीमावा० स्थापयामि।
(५) पञ्चमे कोष्ठे– ॐ भैरव्यै नमः भैरवीम् आवाहयामि स्थापयामि।
(६) षष्ठे कोष्ठे– ॐ विरायै नमः वीराम् आवाहयामि स्थापयामि।
(७) सप्तमे कोष्ठे– ॐ भयङ्कर्यै नमः भयङ्करीम् आवा० स्थापयामि।
(८) अष्टमे कोष्ठे– ॐ वज्रधारिण्यै नमः, वज्रधारिणीम् आवा० स्थाप०।

पञ्चम पंक्ति में–

(१) प्रथम कोष्ठे– ॐ क्रोधायै नमः क्रोधाम् आवाहयामि स्थापयामि।
(२) द्वितीय कोष्ठे– ॐ दुर्मुख्यै नमः दुर्मुखीम् आवाहयामि स्थापयामि।

(३) **तृतीय कोष्ठे**– ॐ प्रेतवाहिन्यै नमः प्रेतवाहिनी मावाहयामि स्थाप०।
(४) **चतुर्थ कोष्ठे**– ॐ कर्कायै नमः कर्कामा आवाहयामि स्थापयामि।
(५) **पञ्चमे कोष्ठे**–ॐ दीर्घलम्बोष्ठ्यै नमः दीर्घलम्बोष्ठीम् आवाह० स्थाप०।
(६) **षष्ठे कोष्ठे**– ॐ मालिन्यै नमः मालिनीम् आवाहयामि स्थापयामि।
(७) **सप्तमे कोष्ठे**– ॐ मन्त्रयोगिन्यै नमः मन्त्रयोगिनीम् आवा० स्थाप०।
(८) **अष्टमे कोष्ठे**- ॐ कालाग्निमोहिन्यै नमः, कालाग्निमोहिनीम् आवा० स्थाप०।

षष्ठम पंक्ति में–

(१) **प्रथम कोष्ठे**– ॐ मोहिन्यै नमः मोहिनीम् आवाहयामि स्थापयामि।
(२) **द्वितीय कोष्ठे**– ॐ चक्रायै नमः चक्राम् आवाहयामि स्थापयामि।
(३) **तृतीय कोष्ठे**- ॐ कुण्डलिन्यै नमः कुण्डलिनी मावाहयामि स्थाप०।
(४) **चतुर्थ कोष्ठे**– ॐ बालुकायै नमः बालुकाम् आवाहयामि स्थापयामि।
(५) **पञ्चमे कोष्ठे**– ॐ कौबेर्यै नमः कौबेरीम् आवाहयामि स्थापयामि।
(६) **षष्ठे कोष्ठे**– ॐ यमदूत्यै नमः यमदूतीम् आवाहयामि स्थापयामि।
(७) **सप्तमे कोष्ठे**– ॐ करालिन्यै नमः करालिनीम् आवाहयामि स्थाप०।
(८) **अष्टमे कोष्ठे**- ॐ कौशिक्यै नमः, कौशिकीम् आवाहयामि स्थाप०।

सप्तम पंक्ति में–

(१) **प्रथम कोष्ठे**– ॐ यक्षिण्यै नमः यक्षिणीम् आवाहयामि स्थापयामि।
(२) **द्वितीय कोष्ठे**– ॐ भक्षिण्यै नमः भक्षिणीम् आवाहयामि स्थापयामि।
(३) **तृतीय कोष्ठे**- ॐ कौमार्यै नमः कौमारीम् आवाहयामि स्थापयामि।
(४) **चतुर्थ कोष्ठे**– ॐ मन्त्रवाहिन्यै नमः मन्त्रवाहिनी मावाहयामि स्थाप०।
(५) **पञ्चमे कोष्ठे**– ॐ विशालायै नमः विशालाम् आवाहयामि स्थाप०।
(६) **षष्ठे कोष्ठे**– ॐ कार्मुक्यै नमः कार्मुकीम् आवाहयामि स्थापयामि।
(७) **सप्तमे कोष्ठे**– ॐ व्याघ्र्यै नमः व्याघ्रीम् आवाहयामि स्थापयामि।
(८) **अष्टमे कोष्ठे**- ॐ महाराक्षस्यै नमः, महाराक्षसीम् आवा० स्थाप०।

अष्टम पंक्ति में–

(१) **प्रथम कोष्ठे**– ॐ प्रेतभक्षिण्यै नमः प्रेतभक्षिणीम् आवाह० स्थाप०।

(२) द्वितीय कोष्ठे– ॐ धूर्जट्यै नमः धूर्जटीम् आवाहयामि स्थापयामि।
(३) तृतीय कोष्ठे- ॐ विकटायै नमः विकटाम् आवाहयामि स्थापयामि।
(४) चतुर्थ कोष्ठे– ॐ घोररुपायै नमः घोररूपाम् आवाहयामि स्थाप०।
(५) पञ्चमे कोष्ठे– ॐ कपालिकायै नमः कपालिकाम् आवाह० स्थाप०।
(६) षष्ठे कोष्ठे– ॐ निकलायै नमः निकलाम् आवाहयामि स्थापयामि।
(७) सप्तमे कोष्ठे– ॐ अमलायै नमः अमलाम् आवाहयामि स्थापयामि।
(८) अष्टमे कोष्ठे- ॐ सिद्धिप्रदायै नमः, सिद्धिप्रदाम् आवा० स्थाप०।

ॐ मनो जूतिर्ज्जुषता माज्ज्यस्य बृहस्प्पतिर्य्यज्ञ मिमं तनोत्वरिष्टं य्यज्ञ ꣳ समिमं दधातु । विश्वे देवा स ऽइह मादयन्तामो ३ प्रतिष्ठ ॥

योगिनी पीठ पर कलश की प्राण प्रतिष्ठा करके उस पर योगिनी का पूजन करे—

ॐ योगे-योगे तवस्तरं व्वाजे-वाजे हवामहे । सखाय इन्द्र मूतये।।

योगिनी प्रार्थना–

आधारभूता जगतस्त्वमेका, महीस्वरुपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये।।
ढुं ढुं ढुमकत ढुम्ब ढुम्ब वहनं। भूमौ सदा यस्य सा।।
क्षुं क्षुं क्षुमकत क्षुम्ब क्षुम्ब घुँघरु। कर्णौ सदा सर्वदा।।
रं रं रमकत रम्ब रम्ब रक्तं। कमलं तु हस्ते सदा।।
चं चं चमकत चम्ब चम्ब कङ्कण। दुर्गे सदा पाहि मां।।

चतुःषष्टियोगिनीभ्यो नमः ।

अनया पूजया चतुःषष्टि योगिन्यः प्रीयन्तां न मम ।

अथ क्षेत्रपाल पीठपूजनम्

क्षेत्रपाल पीठ पर सर्वप्रथम बीच के खाने से प्रारम्भ कर उसके ऊपर दाहिने तरफ से क्रमशः से आवाहन करें।

सङ्कल्पः— **कर्ता दक्षिणहस्ते जलाऽक्षत द्रव्यं चादाय सङ्कल्पं कुर्यात्–देशकालौ सङ्कीर्त्य, अमुकगोत्रः अमुकशर्माऽहं (वर्माऽहं गुप्तोऽहं दासोऽहम्) सपत्नीकोऽहं अस्मिन् अमुकयागकर्मणि क्षेत्रपालपूजनं करिष्ये।।**

पूर्वादिकोष्ठे षड्दले–

(१) ॐ अजराय नमः, अजरम् आवाहयामि स्थापयामि।
(२) ॐ व्यापकाख्याय नमः, व्यापकाख्य मावाहयामि स्थापयामि।
(३) ॐ इन्द्रचौराय नमः, इन्द्रचौरम् आवाहयामि स्थापयामि।
(४) ॐ इन्द्रमूर्तये नमः, इन्द्रमूर्तिम् आवाहयामि स्थापयामि।
(५) ॐ उक्षाभिधाय नमः, उक्षाभिधम् आवाहयामि स्थापयामि।
(६) ॐ कूष्माण्डाय नमः, कूष्माण्डम् आवाहयामि स्थापयामि।

आग्नेयादिकोष्ठे षड्दले–

(७) ॐ वरुणाय नमः, वरुणम् आवाहयामि स्थापयामि।
(८) ॐ बाहुकाख्याय नमः, बाहुकाख्य मावाहयामि स्थापयामि।
(९) ॐ विमुक्ताय नमः, विमुक्तम् आवाहयामि स्थापयामि।
(१०) ॐ लिप्तकाय नमः, लिप्तकम् आवाहयामि स्थापयामि।
(११) ॐ लीलालोकाय नमः, लीलालोकम् आवाहयामि स्थापयामि।
(१२) ॐ एकदंष्ट्राय नमः, एकदंष्ट्रम् आवाहयामि स्थापयामि।

दक्षिणादिकोष्ठे षड्दले–

(१३) ॐ ऐरावताख्याय नमः, ऐरावताख्य मावाहयामि स्थापयामि।
(१४) ॐ ओषधीध्माय नमः, ओषधीघ्न मावाहयामि स्थापयामि।
(१५) ॐ बन्धनाख्याय नमः, बन्धनाख्य मावाहयामि स्थापयामि।
(१६) ॐ दिव्यकाय नमः, दिव्यका मावाहयामि स्थापयामि।
(१७) ॐ कम्बलाख्याय नमः, कम्बलाख्य मावाहयामि स्थापयामि।

(१८) ॐ क्षोभणाख्याय नमः, क्षोभणाख्य मावाहयामि स्थापयामि।
(१९) ॐ गवे नमः, गवाम् आवाहयामि स्थापयामि।

नैर्ऋत्यादिकोष्ठे षड्दले-

(२०) ॐ घण्टाभिधाय नमः, घण्टाभिधान मावाहयामि स्थापयामि।
(२१) ॐ व्यालाय नमः, व्यालम् आवाहयामि स्थापयामि।
(२२) ॐ अणुस्वरूपाय नमः, अणुस्वरूपम् आवाहयामि स्थापयामि।
(२३) ॐ चन्द्रवारुणाय नमः, चन्द्रवारुणम् आवाहयामि स्थापयामि।
(२४) ॐ फटाटोपाय नमः, फटाटोपम् आवाहयामि स्थापयामि।
(२५) ॐ जटालाय नमः, जटालम् आवाहयामि स्थापयामि।

पश्चिमादिकोष्ठे षड्दले-

(२६) ॐ क्रतवे नमः, क्रतु मावाहयामि स्थापयामि।
(२७) ॐ घण्टेश्वराय नमः, घण्टेश्वरम् आवाहयामि स्थापयामि।
(२८) ॐ विटङ्काय नमः, विटङ्कम् आवाहयामि स्थापयामि।
(२९) ॐ मणिमतये नमः, मणिमतिम् आवाहयामि स्थापयामि।
(३०) ॐ गणबन्धाय नमः, गणबन्धम् आवाहयामि स्थापयामि।
(३१) ॐ डामराय नमः, डामरम आवाहयामि स्थापयामि।

वायव्यादिकोष्ठे षड्दले-

(३२) ॐ ढुण्ढिकर्णाय नमः, ढुण्ढिकर्णम् आवाहयामि स्थापयामि।
(३३) ॐ स्थविराय नमः, स्थविरम् आवाहयामि स्थापयामि।
(३४) ॐ दन्तुराय नमः, दन्तुरम् आवाहयामि स्थापयामि।
(३५) ॐ धनदाय नमः, धनदानम् आवाहयामि स्थापयामि।
(३६) ॐ नागकर्णाय नमः, नागकर्णम् आवाहयामि स्थापयामि।
(३७) ॐ मारीगणाय नमः, मारीगणम् आवाहयामि स्थापयामि।

उत्तरादिकोष्ठे षड्दले-

(३८) ॐ फेत्काराय नमः, फेत्कारम् आवाहयामि स्थापयामि।
(३९) ॐ चीकराय नमः, चीकरम् आवाहयामि स्थापयामि।
(४०) ॐ सिंहाकृतये नमः, सिंहाकृतिम् आवाहयामि स्थापयामि।
(४१) ॐ मृगाय नमः, मृगम् आवाहयामि स्थापयामि।
(४२) ॐ यक्ष्मप्रियाय नमः, यक्ष्मप्रिय मावाहयामि स्थापयामि।

उत्तरादिकोष्ठषड्दलस्यान्तिमदलार्धे-

(४३) ॐ मेघवाहनाय नमः, मेघवाहनम् आवाहयामि स्थापयामि।

उत्तरादिकोष्ठषड्दलस्यान्तिमदलार्धे यक्षादुत्तरतः-

(४४) ॐ तीक्ष्णोष्ट्राय नमः, तीक्ष्णोष्ट्रम आवाहयामि स्थापयामि।

ईशानादि कोष्ठे षड्दले-

(४५) ॐ अनलाय नमः, अनल मावाहयामि स्थापयामि।

(४६) ॐ शुक्लतुण्डाय नमः, शुक्लतुण्ड मावाहयामि स्थापयामि।

(४७) ॐ अन्तरिक्षाय नमः, अन्तरिक्ष मावाहयामि स्थापयामि।

(४८) ॐ बर्बरकाय नमः, बर्बरक मावाहयामि स्थापयामि।

ईशानादिकोष्ठषड्दलस्यान्तिमदलार्धे पवनादुत्तरतः-

(४९) ॐ पावनाय नमः, पावनम् आवाहयामि स्थापयामि।

ॐ नहिस्प्पशमविदन्नन्न्यमस्म्माद्वैश्श्वानरात्पुरऽएतारमग्ग्नेः। एमेनमवृधन्नमृताऽअमर्त्यंव्वैश्श्वानरङ्क्षैत्त्रजित्याय देवाः॥

प्रतिष्ठा— क्षेत्रपाल की स्थापना वेदी के मध्य भाग में करें।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमं तनोत्वरिष्टं य्यज्ञꣳ समिमन्दधातु। व्विश्श्वे देवासऽइह मादयन्तामों ३ प्रतिष्ठ ॥

ॐ भूत प्रेत पिशाचैश्च आवृतं शूल पाणिनम्।
आवाह्ये क्षेत्रपालं तु कर्मण्यस्मिन् सुखायनः॥
ॐ भूर्भुवः स्वः अजरादि मण्डल देवता सहित।
श्री क्षेत्रपाल देवता सुप्रतिष्ठितो वरदो भव॥

तत्पश्चात् क्षेत्रपाल पीठ पर कलश की प्राणप्रतिष्ठा कर उस पर क्षेत्रपाल का पूजन कर प्रार्थना करे—

कर कलित कपालः कुण्डली दण्डपाणिः।
तरूण तिमिरनील ब्यालयज्ञोपवीती॥

क्रतु समये सपर्या विघ्नविच्छेद हेतुः।
जयति बटुकनाथः सिद्धिदः साधकानाम्।।
ॐ यं यं यं यक्षरूपं दशदिशि वदनं भूमिकम्पायमानम्
सं सं सं संहार मूर्त्ति शिरमुकुट जटा शेखरं चन्द्रबिम्बम्।
दं दं दं दीर्घकायं विकृतनखमुखं ऊर्ध्वरोमं करालम्
पं पं पं पापनाशं प्रणमत सततं भैरवंक्षेत्रपालम्।।

प्रार्थना—

कौलीरे चित्रकूटे हिमगिरि शिखरेकाल जालान्धरेवा
सौराष्ट्रे सिधु देशे मगधपुरवरे कौसलेवाकलिङ्गे।
कर्णाटे कौङ्गणेवाभृगुषु पुरवरे कान्यकुब्जेस्थितेवा
ते सर्वे यज्ञरक्षाकरण कृतधियः पातुवः क्षेत्रपालाः।।

हस्ते जलमादाय—

ॐ अनेन कृतेन पूजनेन क्षेत्रपालसहिताजरादिदेवताः प्रीयन्ता न मम।।

सर्वतोभद्रदेवता स्थापनम्

सङ्कल्पः— कर्ता दक्षिणहस्ते जलाऽक्षत द्रव्यं चादाय सङ्कल्पं कुर्यात्–देशकालौ स्मृत्वा, अमुकगोत्रः अमुकशर्माऽहं (वर्माऽहं गुप्तोऽहं दासोऽहम्) सपत्नीकोऽहं अस्मिन् अमुकयागकर्मणि प्रधान पीठस्य सर्वतोभद्रमण्डलं स्थापनं पूजनं करिष्ये।।

(१) **मध्ये कर्णिकायाम् –**

ब्रह्मणे नमः, ब्रह्माणमावाहयामि स्थापयामि।

(२) **उत्तरे वाप्याम् –**

सोमाय नमः, सोममावाहयामि स्थापयामि।

(३) **ईशान्यां खण्डेन्दौ –**

ईशानाय नमः, ईशानमावाहयामि स्थापयामि।

(४) **पूर्वे वाप्याम् –**
इन्द्राय नमः, इन्द्रमावाहयामि स्थापयामि।

(५) **आग्नेय्यां खण्डेन्दौ –**
अग्नये नमः, अग्निमावाहयामि स्थापयामि।

(६) **दक्षिणे वाप्याम् –**
यमाय नमः, यममावाहयामि स्थापयामि।

(७) **नैर्ऋत्यां खण्डेन्दौ –**
निर्ऋतये नमः, निर्ऋतिमावाहयामि स्थापयामि।

(८) **पश्चिमे वाप्याम् –**
वरुणाय नमः, वरुणमावाहयामि स्थापयामि।

(९) **वायव्यां खण्डेन्दौ –**
वायवे नमः, वायुमावाहयामि स्थापयामि।

(१०) **वायु-सोमयोर्मध्ये भद्रे –**
अष्टवसुभ्यो नमः, अष्टवसून् आवाहयामि स्थापयामि।

(११) **सोमेशानयोर्मध्ये भद्रे –**
एकादशरुद्रेभ्यो नमः, एकादशरुद्रानावाहयामि स्थापयामि।

(१२) **ईशानेन्द्रमध्ये भद्रे –**
द्वादशादित्येभ्यो नमः, द्वादशादित्यानावाहयामि स्थापयामि।

(१३) **इन्द्राग्निमध्ये भद्रे –**
अश्विभ्यां नमः, अश्विनी आवाहयामि स्थापयामि।

(१४) **अग्नियममध्ये भद्रे –**
स-पैतृकविश्वेभ्यो देवेभ्यो नमः, स-पैतृकविश्वान् देवानामा-वाहयामि स्थापयामि।

(१५) **यम-निर्ऋतिमध्ये भद्रे –**
सप्तयक्षेभ्यो नमः, सप्तयक्षानावाहयामि स्थापयामि।

(१६) **निर्ऋति-वरुणमध्ये भद्रे –**
अष्टकुलनागेभ्यो नमः, अष्टकुलनागानावाहयामि स्थापयामि।

(१७) वरुण-वायुमध्ये भद्रे –

गन्धर्वाऽप्सरोभ्यो नमः, गन्धर्वाप्सरसः आवाहयामि स्थापयामि।

(१८) ब्रह्म सोममध्ये वाप्यां लिंगे वा –

स्कन्दाय नमः, स्कन्दमावाहयामि स्थापयामि।

(१९) तत्रैव स्कन्दोत्तरतः –

वृषभाय नमः, वृषभमावाहयामि स्थापयामि।

(२०) तदुत्तरे –

शूलाय नमः, शूलमावाहयामि स्थापयामि।

(२१) अनेनैव मन्त्रेण तदुत्तरे –

महाकालाय नमः, महाकालमावाहयामि स्थापयामि।

(२२) ब्रह्मेशानमध्ये शृङ्खलायाम् –

दक्षादि सप्तगणेभ्यो नमः, दक्षादि सप्तगणानावाहयामि स्थापयामि।

(२३) ब्रह्मेन्द्र मध्ये वाप्याम् –

दुर्गायै नमः, दुर्गमावाहयामि स्थापयामि।

(२४) तत्पूर्वे –

विष्णवे नमः, विष्णुमावाहयामि स्थापयामि।

(२५) ब्रह्माग्निमध्ये शृङ्खलायाम् –

स्वधायै नमः, स्वधामावाहयामि स्थापयामि।

(२६) ब्रह्म-यम मध्ये वाप्याम् –

मृत्युरोगेभ्यो नमः, मृत्युरोगानावाहयामि स्थापयामि।

(२७) ब्रह्म-निर्ऋति मध्ये शृङ्खलायाम् –

गणपतये नमः, गणपतिमावाहयामि स्थापयामि।

(२८) ब्रह्म-वरुण मध्ये वाप्याम् –

अद्भ्यो नमः, अपः आवाहयामि स्थापयामि।

(२९) ब्रह्म-वायु मध्ये शृङ्खलायाम् –

मरुद्भ्यो नमः, मरुतः आवाहयामि स्थापयामि।

(३०) ब्रह्मणः पादमूले –

पृथिव्यै नमः, पृथ्वीमावाहयामि स्थापयामि।

(३१) **तदुत्तरे –**
गंगादिनदीभ्यो नमः, गङ्गादिनदीः आवाहयामि स्थापयामि।

(३२) **तदुत्तरे –**
सप्तसागरेभ्यो नमः, सप्तसागरानावाहयामि स्थापयामि।

(३३) **कर्णिका परिधौ –**
मेरवे नमः, मेरूमावाहयामि स्थापयामि।

(३४) **ततः सत्वबाह्य परिधौ – सोमादि क्रमेण**
गदाय नमः, गदमावाहयामि स्थापयामि।

(३५) **ईशान्याम् –**
त्रिशूलाय नमः, त्रिशूलमावाहयामि स्थापयामि।

(३६) **पूर्वे –**
वज्राय नमः, वज्रमावाहयामि स्थापयामि।

(३७) **आग्नेय्याम् –**
शक्तये नमः, शक्तिमावाहयामि स्थापयामि।

(३८) **दक्षिणे –**
दण्डाय नमः, दण्डमावाहयामि स्थापयामि।

(३९) **नैर्ऋत्याम् –**
खड्गाय नमः, खड्गमावाहयामि स्थापयामि।

(४०) **पश्चिमे –**
पाशाय नमः, पाशमावाहयामि स्थापयामि।

(४१) **वायव्याम् –**
अङ्कुशाय नमः, अङ्कुशमावाहयामि स्थापयामि।

(४२) **तद्बाह्ये उत्तरे रक्तपरिधौ सोमादिक्रमेण –**
गौतमाय नमः, गौतमावाहयामि स्थापयामि।

(४३) **ईशान्याम् –**
भरद्वाजाय नमः, भरद्वाजमावाहयामि स्थापयामि।

(४४) **पूर्वे –**
विश्वामित्राय नमः, विश्वामित्रमावाहयामि स्थापयामि।

(४५) आग्नेय्याम् –

कश्यपाय नमः, कश्यपमावाहयामि स्थापयामि।

(४६) दक्षिणे –

जमदग्नये नमः, जमदग्निमावाहयामि स्थापयामि।

(४७) नैर्ऋत्याम् –

वसिष्ठाय नमः, वसिष्ठमावाहयामि स्थापयामि।

(४८) पश्चिमे –

अत्रये नमः, अत्रिमावाहयामि स्थापयामि।

(४९) वायव्याम् –

अरुन्धत्यै नमः, अरुन्धतीमावाहयामि स्थापयामि।

(५०) पूर्वे –

ऐन्द्र्यै नमः, ऐन्द्रीमावाहयामि स्थापयामि।

(५१) आग्नेय्याम् –

कौमार्य्यै नमः, कौमारीमावाहयामि स्थापयामि।

(५२) दक्षिणे –

ब्राह्म्यै नमः, ब्राह्मीमावाहयामि स्थापयामि।

(५३) नैर्ऋत्याम् –

वाराह्यै नमः, वाराहीमावाहयामि स्थापयामि।

(५४) पश्चिमे –

चामुण्डायै नमः, चामुण्डामावाहयामि स्थापयामि।

(५५) वायव्ये –

वैष्णव्यै नमः, वैष्णवीमावाहयामि स्थापयामि।

(५६) उत्तरे –

माहेश्वर्यै नमः, माहेश्वरीमावाहयामि स्थापयामि।

(५७) ईशान्याम् –

वैनायक्यै नमः, वैनायकीमावाहयामि स्थापयामि।

इस प्रकार आवाहन कर प्रतिष्ठा करें—

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञ ६ समिमन्दधातु । विश्वेदेवा ऽसइह मादयन्तामों३ प्रतिष्ठ ॥

प्रतिष्ठा करके षोडशोपचार पूजन करें। उसके बाद प्रार्थना करें—

ब्रह्माद्यावाहिताः देवाः सर्वतोभद्रमण्डले ।
पूजां गृह्णन्तु मद्दत्तां सर्वदा मे प्रसीदत ।।

अनया पूजया सर्वतोभद्रमण्डलस्थ देवताः प्रीयन्तां न मम ।

अथ एकलिङ्गतोभद्रदेवताविशेषाः

(१) **पूर्वे –**
असिताङ्गभैरवाय नमः, असिताङ्गभैरवमावाहयामि स्थापयामि।

(२) **आग्नेय्याम् –**
रूरूभैरवाय नमः, रूरूभैरवमावाहयामि स्थापयामि।

(३) **दक्षिणस्याम् –**
चण्डभैरवाय नमः, चण्डभैरवमावाहयामि स्थापयामि।

(४) **नैर्ऋत्याम् –**
क्रोधभैरवाय नमः, क्रोधभैरवमावाहयामि स्थापयामि।

(५) **पश्चिमे –**
उन्मत्तभैरवाय नमः, उन्मत्तभैरवमावाहयामि स्थापयामि।

(६) **वायव्याम् –**
कपालभैरवाय नमः, कपालभैरवमावाहयामि स्थापयामि।

(७) **उत्तरे –**
भीषणभैरवाय नमः, भीषणभैरवमावाहयामि स्थापयामि।

(८) **ईशान्याम् –**
संहारभैरवाय नमः, संहारभैरवमावाहयामि स्थापयामि।

(९) पूर्वे –

भवाय नमः, भवमावाहयामि स्थापयामि।

(१०) आग्नेय्याम् –

शर्वाय नमः, शर्वमावाहयामि स्थापयामि।

(११) दक्षिणे –

पशुपतये नमः, पशुपतिमावाहयामि स्थापयामि।

(१२) नैर्ऋत्याम् –

ईशानाय नमः, ईशानमावाहयामि स्थापयामि।

(१३) पश्चिमे –

रुद्राय नमः, रुद्रमावाहयामि स्थापयामि।

(१४) वायव्याम् –

उग्राय नमः, उग्रमावाहयामि स्थापयामि।

(१५) उत्तरे –

भीमाय नमः, भीममावाहयामि स्थापयामि।

(१६) ईशान्याम् –

महते नमः, महान्तमावाहयामि स्थापयामि।

(१७) पूर्वे –

अनन्ताय नमः, अनन्तमावाहयामि स्थापयामि।

(१८) आग्नेय्याम् –

वासुकये नमः, वासुकिमावाहयामि स्थापयामि।

(१९) दक्षिणे –

तक्षकाय नमः, तक्षकमावाहयामि स्थापयामि।

(२०) नैर्ऋत्याम् –

कुलिशाय नमः, कुलिशमावाहयामि स्थापयामि।

(२१) पश्चिमे –

कर्कोटकाय नमः, कर्कोटकमावाहयामि स्थापयामि।

(२२) वायव्याम् –

शङ्खपालाय नमः, शङ्खपाल मावाहयामि स्थापयामि।

(२३) **उत्तरे –**
कम्बलाय नमः, कम्बलमावाहयामि स्थापयामि।

(२४) **ईशान्याम् –**
अश्वतराय नमः, अश्वतरमावाहयामि स्थापयामि।

(२५) **ईशानेन्द्रयोर्मध्ये –**
शूलाय नमः, शूलमावाहयामि स्थापयामि।

(२६) **इन्द्राग्निमध्ये –**
चन्द्रमौलिने नमः, चन्द्रमौलिन मावाहयामि स्थापयामि।

(२७) **अग्नियमयोर्मध्ये –**
चन्द्रमसे नमः, चन्द्रमसमावाहयामि स्थापयामि।

(२८) **यमनिर्ऋतिमध्ये –**
वृषभध्वजाय नमः, वृषभध्वजमावाहयामि स्थापयामि।

(२९) **निर्ऋतिवरुणयोर्मध्ये –**
त्रिलोचनाय नमः, त्रिलोचनमावाहयामि स्थापयामि।

(३०) **वरुण-वायवोः मध्ये –**
शक्तिधराय नमः, शक्तिधरमावाहयामि स्थापयामि।

(३१) **वायु-सोमयोः मध्ये –**
महेश्वराय नमः, महेश्वरमावाहयामि स्थापयामि।

(३३) **सोमेशानयोर्मध्ये –**
शूलपाणये नमः, शूलपाणिमावाहयामि स्थापयामि।

नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु । विश्वेदेवासऽइह मादयन्तामोꣳ प्रतिष्ठ ॥

कलश स्थापन विधि से वेदी पर कलश स्थापित करके रुद्र का

आवाहन कर ऊर्ध्वलिखित मन्त्र से प्रतिष्ठा करके षोडशोपचार पूजन करें। उसके बाद प्रार्थना करें—

प्रार्थना–

भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः
कण्ठे पन्नगपुष्पदामसुभगो गङ्गाजलैः पूरितः।
ईषत्ताम्रजटाऽग्रपल्लवयुतोन्यस्तो जगन्मण्डपे
शम्भुर्मङ्गलकुम्भतामुपगतो भूयात्सतां श्रेयसे।।
यस्याङ्के च विभाति भूधरसुता देवापगा मस्तके
भाले बालविधुर्गले च गरलं यस्योरसि व्यालराट्।
सोऽयं भूतिविभूषणः सुरवरः सर्वाधिपः सर्वदा
शर्वः सर्वगतः शिवः शशिनिभः श्रीशङ्करः पातु माम्।।

अनया पूजया एकलिङ्गतोभद्र देवता: प्रीयन्ताम् ।

द्वादशलिङ्गतो भद्रमण्डल-१

मण्डले कर्णिकान्तराले मध्ये ईशानतः ईशानकोणे खण्डेन्दौ।

(१) **ईशान्याम् –**

ॐ गुरवे नम:, गुरूम् आवाहयामि स्थापयामि।

(२) **आग्नेय्याम् –**

ॐ गणपये नम:, गणपति मावाहयामि स्थापयामि।

(३) **नैर्ऋत्याम् –**

ॐ दुर्गायै नम:, दुर्गा मावाहयामि स्थापयामि।

(४) **वायव्याम् –**

ॐ क्षेत्रपालाय नम:, क्षेत्रपाल मावाहयामि स्थापयामि।

अष्टदल मध्ये –

(५) **भद्रमध्ये –**

ॐ सदाशिवाय नम:, सदाशिवा मावाहयामि स्थापयामि।

(६) **पूर्वे –**

ॐ कालाग्निरुद्राय नमः, कालाग्निरुद्रम् आवाहयामि स्थाप०।

(७) **तत्रैव –**

ॐ कूर्माय नमः, कूर्मम् आवाहयामि स्थापयामि।

(८) **तत्रैव –**

ॐ मण्डूकाय नमः, मण्डूकम् आवाहयामि स्थापयामि।

(९) **आग्नेय्याम् –**

ॐ वराहाय नमः, वराहम् आवाहयामि स्थापयामि।

(१०) **तत्रैव –**

ॐ अनंताय नमः, अनंतम् आवाहयामि स्थापयामि।

(११) **दक्षिणस्याम् –**

ॐ पृथिव्यै नमः, पृथिवीम् आवाहयामि स्थापयामि।

(१२) **तत्रैव –**

ॐ स्कन्दाय नमः, स्कन्दम् आवाहयामि स्थापयामि।

(१३) **तत्रैव –**

ॐ सुधासिंधवे नमः, सुधासिंधुम् आवाहयामि स्थापयामि।

(१४) **नैर्ऋत्याम् –**

ॐ नलाय नमः, नलम् आवाहयामि स्थापयामि।

(१५) **तत्रैव –**

ॐ पद्माय नमः, पद्मम् आवाहयामि स्थापयामि।

(१६) **पश्चिमायाम् –**

ॐ पत्रेभ्यो नमः, पत्रम् आवाहयामि स्थापयामि।

(१७) **तत्रैव –**

ॐ केसरेभ्यो नमः, केसरान् आवाहयामि स्थापयामि।

(१८) **तत्रैव –**

ॐ कर्णिकायै नमः, कर्णिकाम् आवाहयामि स्थापयामि।

(१९) **वायव्याम् –**

ॐ सिंहासनाय नमः, सिंहासनम् आवाहयामि स्थापयामि।

(२०) तत्रैव –

ॐ पद्मासनाय नमः, पद्मासनम् आवाहयामि स्थापयामि।

(२१) उत्तरस्याम् –

ॐ घर्माय नमः, घर्मम् आवाहयामि स्थापयामि।

(२२) तत्रैव –

ॐ ज्ञानाय नमः, ज्ञानम् आवाहयामि स्थापयामि।

(२३) तत्रैव –

ॐ वैराग्याय नमः, वैराग्यम् आवाहयामि स्थापयामि।

(२४) ईशान्याम् –

ॐ ऐश्वर्याय नमः, ऐश्वर्यम् आवाहयामि स्थापयामि।

(२५) तत्रैव –

ॐ चिदाकाशाय नमः, चिदाकाशम् आवाहयामि स्थापयामि।

(२६) पद्ममध्ये –

ॐ योगपीठाय नमः, योगपीठम् आवाहयामि स्थापयामि।

ततः कर्णिकोपरिपूर्वतश्चतुर्दिक्षु –

(२७) ॐ पृथिव्यै नमः, पृथिवीम् आवाहयामि स्थापयामि।

(२८) ॐ कपालाय नमः, क़पालम् आवाहयामि स्थापयामि।

(२९) ॐ सप्तसरिद्भ्यो नमः, सप्तसरित आवाहयामि स्थापयामि।

(३०) ॐ सप्तसागरेभ्यो नमः, सप्तसागरान् आवाहयामि स्थापयामि।

कर्णिका समीपे चत्वारि श्वेतभद्राणि सन्ति तेषु पूर्वादि चतुर्दिक्षु –

(३१) ॐ तत्पुरुषाय नमः, तत्पुरुष मावाहयामि स्थापयामि।

(३२) ॐ अघोराय नमः, अघोर मावाहयामि स्थापयामि।

(३३) ॐ सद्योजाताय नमः, सद्योजात मावाहयामि स्थापयामि।

(३४) ॐ वामदेवाय नमः, वामदेव मावाहयामि स्थापयामि।

तत्समीपेकृष्णान्यष्टभद्राणि सन्ति तेषु ईशानाद्यष्टदिक्षु –

(३५) ॐ भगवत्यै नमः, भगवती मावाहयामि स्थापयामि।

(३६) ॐ उमायै नमः, उमा मावाहयामि स्थापयामि।
(३७) ॐ शंकरप्रियायै नमः, शंकरप्रियाम् आवाहयामि स्थापयामि।
(३८) ॐ पार्वत्यै नमः, पार्वती मावाहयामि स्थापयामि।
(३९) ॐ गौर्यै नमः, गौरीम् आवाहयामि स्थापयामि।
(४०) ॐ काल्यै नमः, काली मावाहयामि स्थापयामि।
(४१) ॐ कौर्म्यै नमः, कौमारी मावाहयामि स्थापयामि।
(४२) ॐ विश्वंभर्यै नमः, विश्वंभरी मावाहयामि स्थापयामि।

ततः कृष्णभद्राण्यधः अष्टौ रक्तभद्राणि सन्ति तेषु ईशान्याद्यष्टदिक्षु–

(४३) ॐ नंदिने नमः, नंदी मावाहयामि स्थापयामि।
(४४) ॐ महाकालाय नमः, महाकाल मावाहयामि स्थापयामि।
(४५) ॐ महावृषभाय नमः, महावृषभ मावाहयामि स्थापयामि।
(४६) ॐ भृंगकिरीटिने नमः, भृंगकिरीट मावाहयामि स्थापयामि।
(४७) ॐ स्कन्दाय नमः, स्कन्द मावाहयामि स्थापयामि।
(४८) ॐ उमापतये नमः, उमापात मावाहयामि स्थापयामि।
(४९) ॐ चंडेश्वराय नमः, चण्डेश्वर मावाहयामि स्थापयामि।
(५०) ॐ योगसूत्राय नमः, योगसूत्र मावाहयामि स्थापयामि।

चतुर्लिंगोपरि श्वेतभद्राणि सन्ति तेषु पूर्वादि चतुर्दिक्षु –

(५१) ॐ धात्रे नमः, धातारम् आवाहयामि स्थापयामि।
(५२) ॐ मित्राय नमः, मित्रम् आवाहयामि स्थापयामि।
(५३) ॐ यमाय नमः, यमम् आवाहयामि स्थापयामि।
(५४) ॐ रूद्राय नमः, रूद्रम् आवाहयामि स्थापयामि।

तत्समीपे लिंगोपरि अष्टौ पीतभद्राणि सन्ति तेषु ईशान्याद्यष्ट दिक्षु –

(५५) ॐ वरूणाय नमः, वरुणम् आवाहयामि स्थापयामि।
(५६) ॐ सूर्याय नमः, सूर्यम् आवाहयामि स्थापयामि।

(५७) ॐ भगाय नमः, भगम् आवाहयामि स्थापयामि।

(५८) ॐ विवस्वते नमः, विवस्वतम् आवाहयामि स्थापयामि।

(५९) ॐ पुरुषोत्तमाय नमः, पुरुषोत्तमम् आवाहयामि स्थापयामि।

(६०) ॐ सवित्रे नमः, सवितारम् आवाहयामि स्थापयामि।

(६१) ॐ त्वष्ट्रे नमः, त्वष्टारम् आवाहयामि स्थापयामि।

(६२) ॐ विष्णवे नमः, विष्णुम् आवाहयामि स्थापयामि।

ततो द्वादशलिंगतो देवतानां स्थापनम् –

(६३) **पूर्वे–** ॐ शिवाय नमः, शिवम् आवाहयामि स्थापयामि।

(६४) **तद्दक्षिणे–** ॐ एकनेत्राय नमः, एकनेत्रम् आवाहयामि स्थापयामि।

(६५) **तद्दक्षिणे–** ॐ एकरुद्राय नमः, एकरुद्रम् आवाहयामि स्थापयामि।

(६६) **दक्षिणस्याम्–** ॐ त्रिमूर्तये नमः, त्रिमूर्तिम् आवाहयामि स्थापयामि।

(६७) **तत्पश्चिमे–** ॐ श्रीकंठाय नमः, श्रीकंठम् आवाहयामि स्थापयामि।

(६८) **तत्पश्चिमे–** ॐ वामदेवाय नमः, वामदेवम् आवाहयामि स्थाप०।

(६९) **पश्चिमायाम्–** ॐ ज्येष्ठाय नमः, ज्येष्ठयम् आवाहयामि स्थापयामि।

(७०) **तदुत्तरे–** ॐ श्रेष्ठाय नमः, श्रेष्ठम् आवाहयामि स्थापयामि।

(७१) **तदुत्तरे–** ॐ रुद्राय नमः, रुद्रम् आवाहयामि स्थापयामि।

(७२) **उत्तरे तत्पूर्वे–** ॐ कालाय नमः, कालम् आवाहयामि स्थापयामि।

(७३) **तत्पूर्वे–** ॐ कलविकरणाय नमः, कलविकरणम् आवा० स्थाप०।

(७४) **तदुत्तरे–** ॐ बलविकरणाय नमः, बलविकरणम् आवा० स्थाप०।

ततः श्वेतषोडशवापीषु प्रत्येकं देवतास्थापनम् –

(७५) ॐ अणिमायै नमः, अणिमाम् आवाहयामि स्थापयामि।

(७६) ॐ महिमायै नमः, महिमाम् आवाहयामि स्थापयामि।

(७७) ॐ लघिमायै नमः, लघिमाम् आवाहयामि स्थापयामि।

(७८) ॐ गरिमायै नमः, गरिमाम् आवाहयामि स्थापयामि।
(७९) ॐ प्राप्त्यै नमः, प्राप्तीम् आवाहयामि स्थापयामि।
(८०) ॐ प्राकाम्यै नमः, प्राकाम्यम् आवाहयामि स्थापयामि।
(८१) ॐ ईशितायै नमः, ईशिताम् आवाहयामि स्थापयामि।
(८२) ॐ वशितायै नमः, वशिताम् आवाहयामि स्थापयामि।
(८३) ॐ ब्राह्मै नमः, ब्राह्मीम् आवाहयामि स्थापयामि।
(८४) ॐ माहेश्वर्यै नमः, माहेश्वरीम् आवाहयामि स्थापयामि।
(८५) ॐ कौमार्यै नमः, कौमारीम् आवाहयामि स्थापयामि।

द्वादशलिङ्गतोभद्रमण्डले – २

(८६) ॐ वैष्णव्यै नमः, वैष्णवीम् आवाहयामि स्थापयामि।
(८७) ॐ वाराह्यै नमः, वाराहीम् आवाहयामि स्थापयामि।
(८८) ॐ इन्द्राण्यै नमः, इन्द्राणीम् आवाहयामि स्थापयामि।
(८९) ॐ चामुण्डायै नमः, चामुण्डाम् आवाहयामि स्थापयामि।
(९०) ॐ चण्डिकायै नमः, चण्डिकाम् आवाहयामि स्थापयामि।

ततो वापीसमीपे अष्टरक्तभद्राणि सन्ति तेषु ईषान्याद्यष्टदिक्षु –

(९१) ॐ असितांगभैरवाय नमः, असितांगभैरवम् आवा० स्थापयामि।
(९२) ॐ रुरुभैरवाय नमः, रुरुभैरवम् आवाहयामि स्थापयामि।
(९३) ॐ चंडभैरवाय नमः, चंडभैरवम् आवाहयामि स्थापयामि।
(९४) ॐ क्रोधभैरवाय नमः, क्रोधभैरवम् आवाहयामि स्थापयामि।
(९५) ॐ उन्मत्तभैरवाय नमः, उन्मत्तभैरवम् आवाहयामि स्थापयामि।
(९६) ॐ कालभैरवाय नमः, कालभैरवम् आवाहयामि स्थापयामि।
(९७) ॐ भीषणभैरवाय नमः, भीषणभैरवम् आवाहयामि स्थापयामि।
(९८) ॐ संहारभैरवाय नमः, संहारभैरवम् आवाहयामि स्थापयामि।

ईशानाद्यष्टदिक्षु वल्लीदेवतास्थापनम् –

(९९) ॐ घृताच्यै नमः, घृताच्यम् आवाहयामि स्थापयामि।
(१००) ॐ मेनकायै नमः, मेनकाम् आवाहयामि स्थापयामि।
(१०१) ॐ रम्भायै नमः, रम्भाम् आवाहयामि स्थापयामि।
(१०२) ॐ उर्वश्यै नमः, उर्वशीम् आवाहयामि स्थापयामि।
(१०३) ॐ तिलोत्तमायै नमः, तिलोत्तमाम् आवाहयामि स्थापयामि।
(१०४) ॐ सुकेशायै नमः, सुकेशाम् आवाहयामि स्थापयामि।
(१०५) ॐ मंजुघौषायै नमः, मंजुघोषाम् आवाहयामि स्थापयामि।
(१०६) ॐ अप्सरोभ्यो नमः, अप्सराम् आवाहयामि स्थापयामि।

ततो मण्डलमध्येपरिधि समीपे श्रृंखला देवताः स्थापयेत् – आग्नेय्याम्–

(१०७) ॐ भवाय नमः, भवम् आवाहयामि स्थापयामि।
(१०८) ॐ शिवाय नमः, शिवम् आवाहयामि स्थापयामि।
(१०९) ॐ रुद्राय नमः, रुद्रम् आवाहयामि स्थापयामि।
(११०) ॐ पशुपतये नमः, पशुपतिम् आवाहयामि स्थापयामि।
(१११) ॐ उग्राय नमः; उग्रम् आवाहयामि स्थापयामि।
(११२) ॐ भीमाय नमः, भीमम् आवाहयामि स्थापयामि।
(११३) ॐ महादेवाय नमः, महादेवम् आवाहयामि स्थापयामि।
(११४) ॐ ईशानाय नमः, ईशानम् आवाहयामि स्थापयामि।
(११५) ॐ अनन्ताय नमः, अनन्तम् आवाहयामि स्थापयामि।
(११६) ॐ वासुकये नमः, वासुकिम् आवाहयामि स्थापयामि।

नैर्ऋत्याम् –

(११७) ॐ तक्षकाय नमः, तक्षकम् आवाहयामि स्थापयामि।
(११८) ॐ कुलीरकाय नमः, कुलीरकम् आवाहयामि स्थापयामि।

(११९) ॐ कर्कोटकालाय नमः, कर्कोटकम् आवाहयामि स्थापयामि।

(१२०) ॐ शंखपालाय नमः, शंखपालम् आवाहयामि स्थापयामि।

(१२१) ॐ कंबलाय नमः, कंबलम् आवाहयामि स्थापयामि।

(१२२) ॐ अश्वतराय नमः, अश्वतरम् आवाहयामि स्थापयामि।

(१२३) ॐ वैन्याय नमः, वैन्यम् आवाहयामि स्थापयामि।

(१२४) ॐ अंगाय नमः, अंगम् आवाहयामि स्थापयामि।

(१२५) ॐ हैहयाय नमः, हैहयम् आवाहयामि स्थापयामि।

(१२६) ॐ अर्जुनाय नमः, अर्जुनम् आवाहयामि स्थापयामि।

वायव्याम् –

(१२७) ॐ शाकुन्तलेयाय नमः, शाकुन्तलेयम् आवाहयामि स्थापयामि।

(१२८) ॐ भरताय नमः, भरतम् आवाहयामि स्थापयामि।

(१२९) ॐ नलाय नमः, नलम् आवाहयामि स्थापयामि।

(१३०) ॐ रामाय नमः, रामम् आवाहयामि स्थापयामि।

(१३१) ॐ सार्वभौमाय नमः, सार्वभौमम् आवाहयामि स्थापयामि।

(१३२) ॐ निषधाय नमः, निषधम् आवाहयामि स्थापयामि।

(१३३) ॐ विंध्याचलाय नमः, विन्ध्याचलम् आवाहयामि स्थापयामि।

(१३४) ॐ माल्यवते नमः, माल्यवन्तम् आवाहयामि स्थापयामि।

(१३५) ॐ यारियात्राय नमः, परिपात्रम् आवाहयामि स्थापयामि।

(१३६) ॐ सह्याय नमः, सह्यम् आवाहयामि स्थापयामि।

ऐशान्याम् –

(१३७) ॐ हेमकूटाय नमः, हेमकूटम् आवाहयामि स्थापयामि।

(१३८) ॐ गंधमादनाय नमः, गंधमादनम् आवाहयामि स्थापयामि।

(१३९) ॐ कुलाचलाय नमः, कुलाचलम् आवाहयामि स्थापयामि।

(१४०) ॐ हिमवते नमः, हिमवन्तम् आवाहयामि स्थापयामि।

(१४१) ॐ रैवताय नमः, रैवतम् आवाहयामि स्थापयामि।

(१४२) ॐ देवगिरये नमः, देवगिरिम् आवाहयामि स्थापयामि।

(१४३) ॐ मलयाचलाय नमः, मलयाचलम् आवाहयामि स्थापयामि।

(१४४) ॐ कनकाचलाय नमः, कनकाचलम् आवाहयामि स्थापयामि।

(१४५) ॐ पृथिव्यै नमः, पृथिवीम् आवाहयामि स्थापयामि।

(१४६) ॐ अनंताय नमः, अनंतम् आवाहयामि स्थापयामि।

आग्नेयादि चतुर्दिक्षु खण्डेन्दुषु –

(१४७) ॐ अग्निकुमाराभ्यां विश्वेभ्यो देवेभ्यो नमः, अग्निकुमारम् आवाहयामि स्थापयामि।

(१४८) ॐ पितृभ्यो नमः, पितृन् आवाहयामि स्थापयामि।

(१४९) ॐ देवेभ्यो नमः, देवान् आवाहयामि स्थापयामि।

(१५०) ॐ नागेभ्यो नमः, नागान् आवाहयामि स्थापयामि।

ततो मण्डलाद्बहिः सत्वपरिधौ पूर्वादिक्रमेण –

(१५१) ॐ अग्नये नमः, अग्निम् आवाहयामि स्थापयामि।

उर्ध्वे – ॐ भगवते पञ्चवदनाय उर्ध्वमुखाय हयग्रीवाय सकलजनवशङ्कराय हरिमर्कट मर्कटवामकरे परिमुञ्चतिमुञ्चति श्रृङ्खलिकां नमः।। ५।।

सकलार्चनार्थे गन्धाक्षतपुष्प तुलसीदलानि समर्पयामि। आञ्जनेयायपञ्चवक्त्राय नमः। धुपम् –

अथ रामाङ्गपूजनम्

हस्ते पुष्पादीन् गृहीत्वा –

ॐ श्रीरामाय नमः पादौ पूजयामि तर्पयामि ।
ॐ राजीवलोचनाय नमः गुल्फे पूजयामि तर्पयामि ।
ॐ रावणान्तकाय नमः जानुनीं पूजयामि तर्पयामि ।
ॐ वाचस्पतये नमः उरुं पूजयामि तर्पयामि ।
ॐ विश्वरुपाय नमः जङ्घे पूजयामि तर्पयामि ।
ॐ लक्ष्मणाग्रजाय नमः कटिं पूजयामि तर्पयामि ।
ॐ व्विश्वमूर्तये नमः मेढ्रं पूजयामि तर्पयामि ।
ॐ परमात्मने नमः हृदयं पूजयामि तर्पयामि ।
ॐ सर्वास्त्रधारिणे नमः पूजयामि तर्पयामि ।
ॐ रघूद्वराय नमः मुखं पूजयामि तर्पयामि ।
ॐ पद्मनाभाय नमः जिह्वां पूजयामि तर्पयामि ।
ॐ दामोदराय नमः दन्तान् पूजयामि तर्पयामि ।
ॐ सीतापतये नमः ललाटं पूजयामि तर्पयामि ।
ॐ ज्ञानगम्याय नमः शिरः पूजयामि तर्पयामि ।
ॐ सर्वात्मने नमः सर्वाङ्ग पूजयामि तर्पयामि ।

अष्टवारम् —

ॐ श्रीसीतासहितं श्रीरामं पूजयामि तर्पयामि नमः।

वामभागे —

ॐ सीतायै नमः पूजयामि तर्पयामि ।

दक्षिणे —

ॐ भरताय नमः पूजयामि तर्पयामि ।
ॐ शार्ङ्गाय नमः पूजयामि तर्पयामि ।
ॐ शरेभ्यो नमः पूजयामि तर्पयामि ।

इत्यङ्गपूजनम्

आवरण पूजनम्

प्रथमावरणम्

हस्ते पुष्पाणि गृहीत्वा —

१. ॐ रां हृदयाय नमः।
२. ॐ रीं शिरसे स्वाहा नमः।
३. ॐ रुं शिखायै वषट् नमः।
४. ॐ रैं कवचाय हुम् नमः।
५. ॐ रौं नेत्रत्रयाय वौषट् नमः।
६. ॐ रः अस्त्राय फट् नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।।

द्वितीयावरणम्

१. ॐ आं आत्मने नमः।
२. ॐ अं अन्तरात्मने नमः।
३. ॐ पं परमात्मने नमः।
४. ॐ ज्ञां ज्ञानात्मने नमः।
५. ॐ निवृत्यै नमः।
६. ॐ प्रतिष्ठायै नमः।
७. ॐ विद्यायै नमः।
८. ॐ शान्त्यै नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्।।

तृतीयावरणम्

१. ॐ वासुकये नमः।
२. ॐ श्रियै नमः।
३. ॐ सङ्कपर्णाय नमः।
४. ॐ सरस्वत्यै नमः।
५. ॐ प्रद्युम्नाय नमः।
६. ॐ प्रीत्यै नमः।
७. ॐ अनिरुद्धाय नमः।
८. ॐ रत्यै नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्।।

चतुर्थावरणम्

१. ॐ हं हनुमते नमः।
२. ॐ सुग्रीवाय नमः।
५. ॐ लक्ष्मणाय नमः।
६. ॐ अङ्गदाय नमः।

३. ॐ भरताय नमः।
४. ॐ विभीषणाय नमः।
७. ॐ शत्रुघ्नाय नमः।
८. ॐ जाम्ववते नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं चतुर्थवरणार्चनम्॥

पंचमावरणम्

१. ॐ धृष्ट्यै नमः।
२. ॐ जयन्ताय नमः।
३. ॐ सुराष्ट्राय नमः।
४. ॐ राष्ट्रवर्द्धनाय नमः।
५. ॐ अकोपाय नमः।
६. ॐ धर्माय नमः।
७. ॐ सुमन्ताय नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं पंचमावरणार्चनम्॥

षष्ठावरणम्

१. ॐ नारदाय नमः।
२. ॐ वशिष्ठाय नमः।
३. ॐ जावालये नमः।
४. ॐ गौतमाय नमः।
५. ॐ भारद्वाजाय नमः।
६. ॐ कौशिकाय नमः।
७. ॐ वल्मीकये नमः।
८. ॐ सनकाय नमः।
९. ॐ सनन्दनाय नमः।
१०. ॐ सनातनाय नमः।
११. ॐ सनत्कुमाराय नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्यं षष्ठावरणार्चनम्॥

सप्तमावरणम्

१. ॐ नीलाय नमः ।
२. ॐ नलाय नमः ।
३. ॐ सुपेणाय नमः ।
४. ॐ मैन्दाय नमः ।
५. ॐ शरण्याय नमः ।
६. ॐ द्विविदाय नमः ।
७. ॐ चन्दनाय नमः ।
८. ॐ गवाक्षाय नमः ।
९. ॐ किरीटने नमः ।
१०. ॐ कुण्डलाय नमः ।

११. ॐ श्रीवत्साय नमः । १२. ॐ कौस्तुभाय नमः ।
१३. ॐ शङ्खाय नमः । १४. ॐ चक्राय नमः ।
१५. ॐ गदायै नमः । १६. ॐ पद्माय नमः ।

ॐ अभीष्ट सिद्धि मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम्॥

अष्टमावरणम्

१. ॐ ध्रुवाय नमः । २. ॐ धरायै नमः ।
३. ॐ सोमाय नमः । ४. ॐ अनिलाय नमः ।
५. ॐ अनलाय नमः । ६. ॐ प्रत्यूपाय नमः ।
७. ॐ प्रभात्याय नमः । ८. ॐ वीरभद्राय नमः ।
९. ॐ शम्भवे नमः । १०. ॐ गिरिशाय नमः ।
११. ॐ अजैकपदाय नमः । १२. ॐ अहिर्बुध्याय नमः ।
१३. ॐ पिनाकिने नमः । १४. ॐ भुवनाधीशाय नमः ।
१५. ॐ कपालिने नमः । १६. ॐ दिक्पतये नमः ।
१७. ॐ स्थाणवे नमः । १८. ॐ भवाय नमः ।
१९. ॐ वरुणाय नमः । २०. ॐ सूर्याय नमः ।
२१. ॐ वेदान्तिने नमः । २२. ॐ भानवे नमः ।
२३. ॐ इन्द्राय नमः । २४. ॐ रवये नमः ।
२५. ॐ गभस्ते नमः । २६. ॐ यमाय नमः ।
२७. ॐ हिरण्यरेतसे नमः । २८. ॐ दिवाकराय नमः ।
२९. ॐ मित्राय नमः । ३०. ॐ विष्णवे नमः ।
३१. ॐ धात्रे नमः ।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम्॥

नवमावरणम्

१. ॐ इन्द्राय नमः । २. ॐ अग्नये नमः ।
३. ॐ यमाय नमः । ४. ॐ निर्ऋतये नमः ।

५. ॐ वरुणाय नमः । ६. ॐ वायवे नमः ।
७. ॐ सोमाय नमः । ८. ॐ ईश्वराय नमः ।
९. ॐ ब्रह्मणे नमः । १०. ॐ अनन्ताय नमः ।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्।।

दशमावरणम्

१. ॐ वज्राय नमः । २. ॐ शङ्खाय नमः ।
३. ॐ दण्डाय नमः । ४. ॐ खड्गाय नमः ।
५. ॐ पाशाय नमः । ६. ॐ अङ्कुशाय नमः ।
७. ॐ ध्वजाय नमः । ८. ॐ गदायै नमः ।
९. ॐ त्रिशूलाय नमः । १०. ॐ अम्बुजाय नमः ।
११. ॐ चक्राय नमः ।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं दशमावरणार्चनम्।।

सर्वोपचारार्थेगन्धाक्षतपुष्पाणि समर्पयामि।
श्रीरामसहितदशमावरणार्चन देवेभ्यो नमः।।

ॐ दशरथाय विद्महे सीता वल्लभाय धीमहि।
तन्नोरामः प्रचोदयात्।।

श्रीरामाय नमः सर्वोपचारार्थेगन्धाक्षततिल तुलसीदल पुष्पाणि समर्पयामि-

ॐ यन्त्रराजाय नमः ।

यन्त्रपरितः अष्टपार्षदान् सम्पूज्य ।

१. ॐ नन्दनायपार्षदाय नमः। २. ॐ कुमुदेश्वरायपार्षदाय नमः।
३. ॐ सुदाम्रेपार्षदाय नमः। ४. ॐ कुमुदायपार्षदाय नमः ।
५. ॐ प्रचण्डायपार्षदाय नमः। ६. ॐ महाबलायपार्षदाय नमः।

७. ॐ बलायपार्षदाय नमः। ८. ॐ चण्डायपार्षदाय नमः।
९. ॐ अनन्तायपार्षदाय नमः। १०. ॐ कुलिशायपार्षदाय नमः।
११. ॐ वासुकयेपार्षदाय नमः। १२. ॐ शङ्खपालायपार्षदाय नमः।
१३. ॐ तक्षायपार्षदाय नमः। १४. ॐ महाद्मायपार्षदाय नमः।
१५. ॐ पद्मायपार्षदाय नमः। १६. ॐ कर्कोटकायपार्षदाय नमः।
१७. ॐ मेषाय नमः। १८. ॐ वृषाय नमः।
१९. ॐ मिथुनाय नमः। २०. ॐ कर्काय नमः।
२१. ॐ सिंहाय नमः। २२. ॐ कन्यायै नमः।
२३. ॐ तुलायै नमः। २४. ॐ वृश्चिकायै नमः।
२५. ॐ धनुषे नमः। २६. ॐ मकराय नमः।
२७. ॐ कुम्भाय नमः। २८. ॐ मीनाय नमः।

ॐ नमो भगवते श्री रामाय दशरथाय संयोगपीठात्मने नमः।
ॐ सत्यज्ञानानन्दरूपं परमधामैव सकलपीठात्मने नमः।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं समस्तावरणार्चनम्।।

इति रामाङ्गावरणपूजनम्।

श्रीगणपत्यथर्वशीर्षम्

ॐ भद्रङ्कर्णेभिरित शान्तिः

हरिः ॐ।। नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्वमसि । त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम्। ऋतं वच्मि। सत्यं वच्मि । अव त्वं माम् । अव वक्तारम्। अव श्रोतारम्। अव दातारम् । अव धातारम् । अवानूचानमवशिष्यम्। अव पश्चात्तात्। अव पुरस्तात् । अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो माँ पाहि पाहि समन्तात। त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयोविज्ञान मयोऽसि । सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापो नलोऽ निलो नभः। त्वं चत्वारि वाक्पदानि। त्वं गुणत्रयातीतः। त्वंवस्था त्रयातीतः कालत्रयातीतः। त्वं देहत्रयातीतः। त्वंमूलाधार-स्थितोऽसि नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवस्वरोम् । गणादिन् पूर्व मुच्चार्य वर्णादिं तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम् ।।१।। तारेण रूद्धम्। एतत्तव मनुस्वरूपं। गकारः पूर्वरूपम् अकारो-मध्यमरूपम् अनुस्वाश्चान्त्यरूपम् बिन्दुरुत्तररुपम्। नादः सन्धानम्। सहिता संधिः। सैषा गणेशविद्या। गणक ऋषिः निचृद्गायत्री छन्दः। श्रीमहागणपतिर्देवता। ॐ गं गणपतये नमः। एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्।।

एक दन्तं चतुर्हस्तं पाश मङ्कुश धारिणम्।
रदं च वरदं हस्तैर्ब्रिभ्राणं मूषकध्वजम्।।
रक्तं लम्बोदरं शूर्प कर्णकं रक्तवाससम्।
रक्त गन्धानुलिप्ताङ्गं रक्त पुष्पैः सुपूजितम्।।
भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्।।

एवं ध्यायति यो नित्यं स योगी योगिनां वरः। नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्न विनाशिने शिवसुताय श्री वरद मूर्तये नमो नमः।।

।। इति श्रीगणपत्यथर्वशीर्षम् ।।

श्रीसूक्तम्

ॐ हिरण्यवर्णां हरिणीं सुवर्ण रजतस्त्रजाम्।
चन्द्रां हिरण्यमयीं लक्ष्मीं जातवेदो म आ वह।।१।।
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।।२।।
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्।
श्रियं देवी मुप ह्वये श्रीर्मा देवी जुषताम्।।३।।
कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियम्।।४।।
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टा मुदाराम्।
तां पद्मिनीमीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे।।५।।

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु या अन्तरा याश्च बाह्या अलक्ष्मीः ।।६।।

उपैतु मां देवसखः कीर्तिश्च मणिना सह।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन कीर्तिमृद्धिं ददातु मे।।७।।

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्।।८।।

गन्ध द्वारा दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामि होपह्वये श्रियम्।।९।।

मनसः काममाकूतिं वाचः सत्य मशीमहि।
पशूनां रूपमन्न्यस्य मयि श्रीः श्रयतां यशः।।१०।।

कर्दमेन प्रजा भूता मयि सम्भव कर्दम।
श्रियं वासय मे कुले मातरं पद्ममालिनीम्।।११।।

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।
नि च देवीं मातरं श्रियं वासय मे कुले।।१२।।

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम्।
चन्द्रां हिरणमयीं लक्ष्मीं जात वेदो म आ वह।।१३।।

आर्द्रां यः करणिीं यष्टिं सुवर्णां हेममालिनीम्।
सूर्यां हिरणमयीं लक्ष्मीं जात वेदो म आ वह।।१४।।

तां आ वह जात वेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहम्।।१५।।

यः शचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्।।१६।।

।। ऋग्वेदोक्तं श्रीसूक्तं सम्पूर्णम् ।।

पुरुषसूक्तम्

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमि ँ सर्वतः स्पृत्वात्यतिष्ठद्दशाङ्गुलम्।। १।।

ॐ पुरुष एवेद ँ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति।। २।।

ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।। ३।।

ॐ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने अभि।। ४।।

ॐ ततो विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः।। ५।।

ॐ तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।। ६।।

ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दा ँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।। ७।।

ॐ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः।। ८।।

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये।। ९।।

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते।। १०।।

ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत।। ११।।

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।।१२।।

ॐ नाभ्या आसीदन्तरिक्षँ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२।। अकल्पयन्।।१३।।

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः।।१४।।

ॐ सप्तास्यासन् परिधयस्त्रिःसप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम्।।१५।।

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।१६।।

।। इति श्रीपुरुषसूक्तं समाप्तम्।।

रुद्रसूक्तम्

हरिः ॐ नमस्ते रुद्र मन्यव उतो त इषवे नमः। वाहुभ्यामुत ते नमः।। १।।

ॐ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि।। २।।

ॐ यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवाङ्गिरित्रताङ्कुरु मा हिर्ठ० सीः पुरुषञ्जगत्।। ३।।

ॐ शिवेन वचसा त्वा गिरिशाऽच्छावदामसि। यथा नः सर्वमिज्जगदयक्ष्मर्ठ० सुमना असत्।। ४।।

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्योभिषक्। अहीँश्च सर्वाञ्जम्भयन् सर्वाश्च यातुधन्योधराचीः परासुव।। ५।।

ॐ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः। ये चैन रुद्राअभितो दिक्षु श्रिताः सहस्रशोऽवैषार्ठ० हेड ईमहे॥ ६॥

ॐ असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनङ्गोप अदृश्रन्नदृश्रनुदहार्युः स दृष्टो मृडयाति नः॥ ७॥

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन्नमः॥ ८॥

ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्र्योर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप॥ ९॥

ॐ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२ उत। अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः॥ १०॥

ॐ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज॥ ११॥

ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्मन्निधेहि तम्॥ १२॥

अवतत्य धनुष्ट्वर्ठ० सहस्राक्ष शतेषुधे। निशीर्य शल्यानाम्मुखा शिवो नः सुमना भव॥ १३॥

ॐ नमस्त आयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ १४॥

ॐ मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तनवो रुद्र रीरिषः॥ १५॥

ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥ १६॥

॥ इति रुद्रसूक्तं समाप्तम् ॥

श्रीशिव मानस-पूजास्तोत्रम्

रत्नैः कल्पितमासनं हिमजलैः स्नानं च दिव्याम्बरं,
नाना रत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम्।
जातीचम्पकबिल्वपत्ररचितं पुष्पं च धूपं तथा,
दीपं देव दयानिधे पशुपते हृतकल्पितं गृह्यताम्।।१।।
सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं,
भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पानकम्।
शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं,
ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु।।२।।
छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं,
वीणाभेरि मृदङ्गकाहलकलागीतं च नृत्यं तथा।
साष्टाङ्गंप्रणतिः स्तुतिर्बहुविधा ह्येतत् समस्तं मया,
सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो।।३।।
आत्मात्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं,
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वांगिरो,
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।।४।।

करचरणकृतं वाकायजं कर्मजं वा,
श्रवणनयनजं वा मानसं वापराधम्।
विहितमविहित वा सर्वमेतत्क्षमस्व,
जय-जय करुणाब्धे श्री महादेव शम्भो।।५।।

।। इति शिव मानस-पूजास्तोत्रम् समाप्तम् ।।

हेमाद्रिः सङ्कल्पः

ॐ विष्णुः विष्णुः विष्णुः ॐ स्वस्ति श्री मुकुन्द सच्चिदानन्दरुपिणः अनिर्वाच्य माया शक्ति विजृम्भिता विद्या योगात् कालकर्म स्वभावाविर्भूत महत् तत्वोदिताऽहङ्कार त्रितयोद्‌भूत, वियदादि पञ्च महाभूतेन्द्रिय देवता निर्मिते अण्डकटाहे चतुर्दशलोकात्मके लोके, लीलया तन्मध्यवर्ति, भगवतः श्रीनारायणस्य नाभिकमलोद्‌भूत सकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तद् उद्धरणाय प्रजापतिप्रार्थितस्यसमस्त-जगद्उत्पत्तिस्थिति लयकारणस्य जगद्रक्षा शिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्‌भगवतो महापुरुषस्य अचिन्त्यापरिमित, शक्त्या ध्रियमाणानां महाजलौघमध्ये परिभ्रममाणानामनेक कोटि ब्रह्माण्डानाम् एकतमेऽव्यक्त महदहङ्कार पृथिवी-अप्-तेजो-वायु-आकाशातेद्य वरणैः आवृते अस्मिन्महति ब्रह्माण्डखण्डे, आधारशक्ति श्रीमदादि वाराहदंष्ट्राग्रविराजिते कूर्मानन्तवासुकितक्षककुलिक-कर्कोटक पद्ममहापद्मशंखद्यष्ट महानागैः ध्रियमाणे ऐरावत-पुण्डरीक वामन कुमुदाञ्जन पुष्पदन्त सार्वभौम सुप्रतिकाष्ट-दिग्गजप्रतिष्ठिते अतल, वितल, सुतल, तलातल, महातल, रसातल, पातालाख्य सप्तलोकानां उपरि भागे भूर्लोक, भुवर्लोक, स्वर्लोक, महर्लोक, जनलोक, तपोलोक, सत्यलोकाख्य सप्तलोकानाम् अधोभागे चक्रवाल शैल महावलय नगमध्यवर्तिनो महाकाल महाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्ति शुण्डादण्डोत्तम्भिते अमरावति शोकवती भोगवती सिद्धवती गन्धर्ववती काञ्चवन्त्यलकावती यशोवती पुण्यपुरी प्रतिष्ठिते

इन्द्र-अग्नि-यम-निर्ऋति- वरुण-वायु-कुबेर-ईशाना मष्ट दिक्पाल प्रतिष्ठिते, वरध्रुवाधर सोमपा प्रभञ्जनानल प्रत्यूष प्रभासाख्याष्ट वसुभिः विराजिते हर त्र्यम्बक रुद्र मृग व्याधापराजित कपालिभैरव शम्भु कपर्दि वृषाकपि बटु रुपाख्यैकादशरुद्रैः संशोभिते, रुद्रोपेन्द्र सवितृधातृ विष्णु त्वष्ट्र्यर्मेन्द्र-ईशान भगमित्र पूषाख्य द्वादशा दित्य प्रकाशिते यम नियम आसन प्राणायाम प्रत्याहार धारणाध्यान समाधि अष्टाङ्ग निरत वसिष्ठ बालखिल्य विश्वामित्र दक्ष कात्यायन कौण्डिन्य गौतम्, आङ्गिरस पराशर व्यास वाल्मीकि शुकशौनक भरद्वाज सनक सनन्दन सनातन सनत्कुमार नारदादि मुख्यमुनिभिः पवित्रिते लोकालोक अचल वलयिते लवणेक्षुरस सुरासर्पि दधिक्षीरोदकयुक्त सप्तार्णव परिवृते जम्बूप्लक्ष-शाल्मलि–कुशक्रौञ्चशाकपुष्कराख्य सप्तद्वीपयुते इन्द्रकांस्यताम्र गभस्तिनागसौम्य गन्धर्वचारण-भारतेतिनवखण्डमण्डिते-सुवर्णगिरि कर्णिकोपेते महासरोरुहाकार पञ्चाशत् कोटि योजन विस्तीर्णे भूमण्डले अयोध्या मथुरा माया काशी काञ्ची अवन्तिका द्वारावतीति सप्तपुरी प्रतिष्ठिते महामुक्ति प्रदस्थले शालग्राम शम्भलनन्दि ग्राम इति ग्राम त्रय विराजिते चम्पकारण्य, बदरिकारण्य-दण्डकारण्य-अर्बुदारण्य-धर्मारण्य-पद्मारण्य गुह्यारण्य जम्बुकारण्य विन्ध्यारण्य द्राक्षारण्य, नहुषारण्य काम्यारण्य द्वैतारण्य नैमिषारण्या दीनां मध्ये सुमेरु निषध शुभ्रकूट श्रीकूट, हेमकूट रजत चित्रकूट, त्रिकूट, किष्किन्धश्वेत आद्रिकूट हिम विन्ध्याचलानां हरिवर्ष किं पुरुष वर्षयोश्च दक्षिणे नवसहस्त्र योजन विस्तीर्णे भरतखण्डे मलयाचल सह्याचल विन्ध्याचलानाम उत्तरेण स्वर्णप्रस्थ चन्द्रप्रस्थ शुक्ल

सूक्तिकावर्तक रमणक महारमणक पाञ्चजन्य सिंहललङ्का-शोकवत्य लकावती सिद्धवती गान्धर्ववतीत्यादि पुण्यपुरी, विराजिते नवखण्डोप द्वीपमण्डिते दक्षिणावस्थित रेणुकाद्वय सूकर काशी काञ्ची कालिकालवटेश्वर कालंजर महाकालेति नवोषरयुते द्वादशज्योतिर्लिङ्ग गङ्गागोदावरी क्षिप्रा यमुना सरस्वती नर्मदा तापी पयोष्णी चन्द्रभागा कावेरी मन्दाकिनी प्रवरा कृष्णा वेणी भीमरथी तुङ्गभद्रा मलापहा कृतमाला ताम्रपर्णी विशालाक्षी वंजुला चर्मण्वती वेत्रवती भोगवती विशोका कौशिकी गण्डकी वासिष्ठिप्रमदा विश्वामित्री फल्गुनी चित्रकाश्यपी सरयू सर्वपापहारिणी करतोया प्रणीता वज्रा वक्रगामिनी सुवर्णरेखा शोणावनाशिनी शीघ्रगा कुशावर्तिनी ब्रह्मानन्दा महितनयेति अनेकपुण्यनदिभिर्विलसिते ब्रह्मपुत्र सिन्धु नदादि परमपवित्र जलविराजिते हिमवन् मेरु गोवर्धन क्रौञ्च चित्रकूट हिमकूट महेन्द्र मलय सह्येन्द्र कीलपारि यात्रादि अनेक पर्वत समन्विते मतङ्गमाल्यकिष्किन्ध ऋष्यशृङ्गेति महानग समन्विते अङ्ग वङ्ग कलिङ्ग काश्मीर कम्बोज सौवीर सौराष्ट्रमहाराष्ट्र राजस्थान मगध नेपाल केरल चोरल पाञ्चाल गौडमालव मलय सिंहल द्रविड कर्नाटक ललाटक रहाटवर हाटपानाट पाण्ड्य सारस्वत निषध मागधान्ध्र दशार्ण भोजकुरुगान्धार विदर्भ विदेह बाल्हीक बर्बर कैकय कोसल विराट् शूरसेन कोङ्कण कैकट मत्स्यभद्र पारसीक खर्जूर यवन म्लेच्छ जालन्धर इत्यादि नानादेश विराजिते नानाभाषाभाषि भूमिपाल, विचित्रिते इलावृत कुरुभद्राश्वं केतुमाल किंपुरुष रमणक हिरण्मयादि नवखण्डानां मध्ये भरतखण्डे बकुलचम्पक पाटलाब्ज पुन्नागजाति करवीर रसाल कल्हार केतक्यादि

नानाविध कुसुमस्तवक विराजिते कोकन्त हिरण्य शृङ्ग कुब्जार्बुद मणिकर्णि वट शालग्राम सूकर मथुरा गया निष्क्रमण लोहार्गलपोत स्वामि प्रभासबदरीति चतुर्दशगुह्य विलसिते जम्बूद्वीपे कुरुक्षेत्रादि सम भूमध्यरेखायाः अमुकदिग्भागे कुलमेरोर्दक्षिण दिग्भागे विन्ध्यस्य अमुकदिग्भागे श्रीगङ्गा-यमुनायोः अमुकदिग्भागे, मत्स्यकूर्मवराह नृसिंहवामन परशुराम रामकृष्ण बुधकल्कीति दशावताराणां मध्ये बौद्धावतारे गङ्गादि सरिद्भिः पाविते एवं नवसहस्र योजन विस्तीर्णे भारतवर्षे निखिलजन पावन परम भागवतोत्तम शौनकादि निवासिते नैमिषारण्य आर्यावर्तान्तर्गत ब्रह्मावर्तैकदेशे सोमसूर्यान्वय भूभृत्प्रतिष्ठिते तदन्तर्गत (अविमुक्त वाराणसी क्षेत्रे आनन्दवने महाश्मशाने गौरीमुखे त्रिकण्टक विराजिते भगवत्या उत्तरवाहिन्या भागीरथ्या वाम भागे) श्रीमन्नारायण नाभि-कमलोद्भूत सकल जगद् स्त्रष्टुः परार्द्ध द्वय जीविनो ब्रह्मणो द्वितीये परार्द्धे एकपञ्चाशत् तमे वर्षे प्रथम मासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीय मुहूर्ते रथन्तरादि द्वात्रिंशत् कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायम्भुवादि मन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृत त्रेता, द्वापर कलि संज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे (पादे) चान्द्रसंज्ञकानां प्रभवादि षष्टि संवत्सराणां मध्ये अमुक नाम्नि सम्वत्सरे श्रीमन्नृपति विक्रमार्कादि अमुक संख्याके सम्वत्सरे उत्तरगोलावलम्बिनी श्रीमार्तण्ड मण्डले अमुक ऋतौ अमुक मासे, अमुक पक्षे अमुक तिथौ अमुक नक्षत्रे अमुक योगे अमुक करणे अमुक राशिस्थिते चन्द्रे अमुक राशिस्थिते सूर्ये, अमुक राशिस्थिते देव गुरौ शेषेषु

ग्रहेषु यथा-यथा राशिस्थान स्थितेषु सत्सु एवं ग्रहगुणगण विशेषण विशिष्टायां शुभपुण्य तिथौ अमुकगोत्रः अमुक शर्माऽहं (वर्माऽहं गुप्तोऽहं वा) मम इह जन्मनि जन्मान्तरे वा बाल्य यौवन वार्द्धक्य अवस्थासु वाक्पाणि पाद-पायूपस्थ घ्राण-रसना-चक्षुः-स्पर्शन-श्रोत्र-मनो बुद्धिभिः चरितानां ज्ञाताज्ञात कामाकाम महापातक उपपातक सञ्चितानां पापानां ब्रह्महनन सुरापान सुवर्णस्तेय गुरुतल्पगमन तत्संसर्गरूप महापातकानां गोहनन स्तेयकरण नरेन्द्राज्ञा भङ्ग श्रोत्रिय विप्रादिमान भङ्ग बुद्धिपूर्वक बहुकाल अधीत अभ्यस्त शास्त्र विस्मरणादिनाम् उपपातकानां च, स्पृष्टास्पृष्ट सङ्करीकरण मलिनीकरण अपात्रीकरण जातिभ्रंशकरण विहिताकरण कर्मलोपजनितानां, रसविक्रय कन्या विक्रय हयविक्रय गोविक्रय खरोष्ट्रविक्रय दासीविक्रय अजादि पशुविक्रय स्वगृहविक्रय नीलीविक्रय अक्रेय विक्रय पण्य विक्रय जलचरादि जन्तुविक्रय स्थलचरादि विक्रय खेचरादिविक्रय सम्भूतानां निरर्थकाद्रवृक्षच्छेदन ऋणानपाकरण ब्रह्मस्वापहरण देवस्वापहरण राजस्वापहरण परद्रव्यापहरण तैलादिद्रव्यापहरण फलादिहरण लोहादिहरण नानाविधवस्तुहरणरूपाणां ब्राह्मणनिन्दा गुरुनिन्दा वेदनिन्दा शास्त्रनिन्दा परनिन्दा अभक्ष्यभक्षण अभोज्य-भोजन, अचोष्य-चोषण, अलेह्य लेहनापेय-पान, अस्पृश्य, स्पर्शन, अश्राव्य-श्रवण, अहिंस्य-हिंसन, अवन्द्य-वन्दनाचिन्त्यचिन्तनायाज्य-याजना, पूज्यपूजन, व्यतिक्रमण रूपाणां मातृपितृ तिरस्कार स्त्रीपुरुष प्रीतिभेदन, परस्त्रीगमन विधवागमन, दासीगमन, वेश्यागमन, चाण्डालादिहीनजाति गमन, गुदगमन, रजस्वलागमन, पश्वादिगमन रूपाणां पशुसमान विहरण

रूपाणां च कूट साक्षीत्व पैशुन्य वादमिथ्या अपवाद म्लेच्छ सम्भाषण ब्रह्मद्वेषकरण ब्रह्मवृत्तिहरण ब्रह्मवृत्तिच्छेदन परवृत्तिहरणरूपाणां मित्रवञ्चन, गुरुवञ्चन स्वामिवञ्चन भार्यावञ्चन असत्यभाषण गर्भपातन पथिताम्बूल चर्वण, हीनजाति सेवन परान्नभोजन गणान्नभोजन गणिकान्नभोजन लशुनभक्षण, पलाण्डुभक्षण, गृञ्जनभक्षण, तालवृक्षभक्षण, उच्छिष्टभक्षण पर्य्युषितान्नभक्षण रूपाणां पंक्तिभेदकरण भ्रूणहिंसा पशुहिंसा बालहिंसा पिपीलिकादि जन्तु हिंसा पक्षिहिंसा स्त्रीहिंसादि अनेक हिंसोद्भूतानां, शौचत्याग, स्नानत्याग, सन्ध्यात्याग उपासना त्याग अग्नि त्याग, वैश्वदेव त्याग रुपाणां निषिद्धाचरण, कुग्रामवास ब्रह्मद्रोह, गुरुद्रोह, परद्रोह, पितृद्रोह, मातृद्रोह, परनिन्दात्म स्तुति दुष्टप्रतिग्रह दुर्जनसंसर्ग रूपाणां गोयान वृषभयान महिषयान गर्दभयान उष्ट्रयान अजयानादि दुर्यानारोहण भृत्याभरण स्वग्रामत्याग गोत्रत्याग, कुलत्याग, दूरस्थमन्त्रण विप्राशाभेदना वन्दिताऽशीर्वाद ग्रहण पतित सम्भाषण रुपाणां पतितजन पंक्ति भोजनाहः सङ्गमवृथामनोरथ आदिपापानां आत्मार्थं पाककरणैकाकी मिष्ठान्नभोजन बालकादि सह भोजनात्म स्त्रीसह भोजनेत्यादि प्रकीर्णपातकानां एतत्कालपर्यन्तं नानायोनिषु अद्य अवधि कृतानाम् परभयोत्पादनादि प्रकीर्ण पातकानां, एतत्कालपर्यन्तं सञ्चितानाम् आर्द्र शुष्क गुरुलघु स्थूल सूक्ष्माणां पापानां च निःशेष परिहारार्थं सहस्र गोदान कुरुक्षेत्रादि सर्वतीर्थ स्नानजन्य फल प्राप्त्यर्थं मम समस्त पितॄणां आत्मनश्च विष्णवादि लोकप्राप्तये अधीतानां-मध्येष्यमाणानां चाध्यायानां स्थापन-विच्छेद-क्रोश-घोषण-दन्त विवृत्तिदुर्वृत्त द्रुतोच्चारिवर्णानां पूर्वसर्णानां गलोपलम्बित

विवृतोच्चारित वर्णानां श्लिष्टास्पष्टवर्ण विघट्टनादिभिः पठितानां श्रुतीनां यद्यातयामत्वं तत् परिहारार्थम् अष्टात्रिंशदनध्यायाध्ययने रथ्यासञ्चरतः शूद्रस्य म्लेच्छान्त्यजादेर्वा शृण्वतोऽध्ययने, अशुचिदेशेऽध्ययने आत्मनः अशुचित्वेऽध्ययने, अक्षरस्वरानुसार पदच्छेद कण्डिका व्यञ्जन ह्रस्व-दीर्घ-प्लुत-कण्ठ-तालु मूर्धन्य औष्ठ्य दन्त्य नासिका-अनुस्वारअनुनासिकरेफ जिह्वामूलीय उपध्मानीय उदात्त अनुदात्त स्वरित लक्षण जाति गोत्र प्रयत्नोच्चारणे माधुर्य अक्षरव्यक्ति हीनत्वादि अनेक प्रत्यवाय परिहारपूर्वकं सर्वस्य वेदस्य सवीर्य्यत्व सम्पादन द्वारा यथावत्फल प्राप्त्यर्थं श्रीपरमेश्वर प्रीत्यर्थं च (देव ब्राह्मण सवितृ सूर्यनारायण सन्निधौ गङ्गा भागीरथ्याममुकतीर्थे काशी तीर्थे तडागे वा प्रवाहाभिमुखे (सूर्याभिमुखो वा) नाभिमात्र जले अध्यायोत्सर्ग उपाकर्म निमित्तं गणस्नानमहं करिष्ये।।) अमुक कर्माऽहं करिष्ये।

इति हेमाद्रिः संङ्कल्पः सम्पूर्णम् ।

पार्थिव-पूजन

हाथ में अक्षत और पुष्प लेकर स्वस्त्ययन (स्वस्तिवाचन) तथा गणपति स्मरण करें। इसके बाद दाहिने हाथ में कुश, पुष्प, अक्षत, जल और द्रव्य रखकर संकल्प करें।

सकाम संकल्प–

विष्णुर्विष्णुर्विष्णुः अद्य .... मम सर्वारिष्टनिरसन पूर्वक सर्वपापक्षयार्थं दीर्घ आयुरारोग्य धनधान्य पुत्रपौत्रादि समस्त सम्पत्प्रवृद्ध्यर्थं श्रुति स्मृति पुराणोक्त फल प्राप्त्यर्थं श्रीसाम्बसदाशिव प्रीत्यर्थं पार्थिव लिङ्ग पूजनं अहं करिष्ये।

निष्काम संकल्प–

विष्णुर्विष्णुर्विष्णुः अद्य .... श्री परमात्म प्रीत्यर्थं पार्थिव लिङ्ग पूजनं अहं करिष्ये।

भूमि प्रार्थना

हाथ में अक्षत पुष्प लेकर भूमि की प्रार्थना करें।

सर्वाधारे धरे देवि त्वद्रूपां मृत्तिका मिमाम्।
ग्रहीष्यामि प्रसन्ना त्वं लिङ्गार्थं भव सुप्रभे।।
ह्रौं पृथिव्यै नमः।

मिट्टी ग्रहण–

मिट्टी को हाथ में लेकर अच्छी तरह कंकड़ इत्यादि निकाल दें।

उद्धृतासि वराहेण कृष्णेन शतबाहुना।
मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च।।

हराय नमः (यह मंत्र पढ़कर हाथ में मिट्टी लें)

लिङ्ग गठन–

महेश्वराय नमः

प्रतिष्ठा–

शूलपाणये नमः, हे शिव इह प्रतिष्ठितो भव।

विनियोग करें—

अस्य श्रीशिवपञ्चाक्षरमन्त्रस्य वामदेव ऋषिः अनुष्टुप् छन्दः श्रीसदाशिवो देवता ओङ्कारो बीजम्, नमः शक्ति, शिवाय इति कीलकम् मम साम्बसदाशिवप्रीत्यर्थं न्यासे पार्थिव लिङ्ग पूजने जपे च विनियोगः।

विनियोग करने के बाद अपने और देवता को दूर्वा अथवा कुश से स्पर्श करते हुए तत्तद् अङ्गों में न्यास करें।

ऋष्यादिन्यासः–

ॐ वामदेवर्षये नमः। (शिरसि)

ॐ अनुष्टुप् छन्दसे नमः। (मुखे)

ॐ सदाशिवदेवतायै नमः। (हृदि)

ॐ बीजाय नमः। (गुह्ये)

ॐ शक्तये नमः। (पादयोः)

ॐ शिवाय कीलकाय नमः। (सर्वाङ्गे)

ॐ नं तत्पुरुषाय नमः। (हृदये)

ॐ मं अधोराय नमः। (पादयोः)

ॐ शिं सद्योजाताय नमः। (गुह्ये)

ॐ वां वामदेवाय नमः। (मूर्ध्नि)

ॐ यं ईशानाय नमः। (मुखे)

करन्यासः–

ॐ अंगुष्ठाभ्यां नमः।

ॐ नं तर्जनीभ्यां नमः।

ॐ मं मध्यमाभ्यां नमः।

ॐ शिं अनामिकाभ्यां नमः।

ॐ वां कनिष्ठिकाभ्यां नमः।

ॐ यं करतलकरपृष्ठाभ्यां नमः।

षडङ्गन्यासः–

ॐ हृदयाय नमः ।

ॐ नं शिरसे नमः ।

ॐ मं शिखायै वषट् ।

ॐ शिं कवचाय हुम ।

ॐ वां नेत्रत्रयाय वौषट् ।

ॐ यं अस्त्राय फट् नमः ।

ध्यानम्–

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु चन्द्रावंतसं।
रत्नाकल्पोज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।

पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं।
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।
ॐ नागाधीश्वरविष्टरां फणिफणोत्तंसोरूरत्नावली।
भास्वद् देहलतां दिवाकरनिभां नेत्रत्रयोद्भासिताम्।
माला-कुम्भ-कपाल-नीरजकरां चन्द्रार्धचूड़ां।
परां, सर्वज्ञेश्वर भैरवाङ्कनिलयां पद्मावतीं चिन्तये।।

विनियोग–हाथ में जल लेकर विनियोग करें तथा जल भूमि पर छोड़ दें।

विनियोगः—**ॐ अस्य श्रीप्राणप्रतिष्ठा मन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुः सामानिच्छन्दांसि क्रियामयवपुः प्राणाख्या देवता आँ बीजं ह्रीं शक्तिः क्रौ कीलकं देव (देवी) प्राणप्रतिष्ठापने विनियोगः।**

प्राण-प्रतिष्ठा

हाथ में पुष्प लेकर मूर्ति पर स्पर्श करें।

ॐ ब्रह्मविष्णुरूद्रऋषिभ्यो नमः। – (शिरसि)
ॐ ऋग्यजुः सामच्छन्दोभ्यो नमः। – (मुखे)
ॐ प्राणाख्यदेवतायै नमः। – (हृदि)
ॐ आँ बीजाय नमः। – (गुह्ये)
ॐ ह्रीं शक्त्यै नमः। – (पादयोः)
ॐ क्रौ कीलकाय नमः। – (सर्वाङ्गेषु)

इस प्रकार न्यास करके पुनः पार्थिव लिङ्ग का स्पर्श करें।

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य प्राणा इह प्राणाः।

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य जीव इह स्थितः।

ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोऽहं शिवस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुऽ श्रोत्रघ्राणजिह्वापाणिपादपायूपस्थानि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

प्राण-प्रतिष्ठा करने के पश्चात् हाथ में अक्षत (चावल) लेकर आवाहन करें।

ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ भूवः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ स्वः पुरुषं साम्बसदाशिवमावाहयामि।
ॐ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्।
तावत्वम्प्रीतिभावेन लिङ्गेऽस्मिन् संनिधिं कुरु।।

आवाहन करने के बाद भगवान् शंकर (पार्थिव) जी का यथा विधि पूजन करें तथा पूजन कर प्रार्थना करें।

प्रार्थना

ॐ भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः।
कण्ठे पन्नगपुष्पदामसुभगो गङ्गाजलैः पूरितः।
ईषत्ताम्रजटाऽग्रपल्लवयुतो न्यस्तो जगन्मण्डपे।
शुम्भुर्मङ्गलकुम्भतामुपगतो भूयात्सतां श्रेयसे।।
ॐ आत्मा त्वं गिरिजामतिः सहचराः प्राणाः शरीरं गृहं।
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिण विधिः स्तोत्राणिसर्वा गिरो।
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम्।।

क्षमापनम्

करचरणकृतं वाकायजं कर्मजं वा।
श्रवणनयनजं वा मानसं वाऽपराधम्।
विहितं विहितं वा सर्वमेतत् क्षमस्व।
जय जय करूणाब्धे श्री महादेव शम्भो।।

गणेशाय नमः

हर हरे महादेव

अन्नपूर्णा देव्यै नमः।

ब्रह्मादि-शाप-विमोचनम्

विनियोगः– ॐ अस्य श्रीचण्डिकाया ब्रह्म-वसिष्ठ-विश्वामित्रशाप-विमोचन-मन्त्रस्य वसिष्ठ-नारद-संवाद-सामवेदाधिपति-ब्रह्माण-ऋषयः सर्वैश्वर्यकारिणी श्रीदुर्गादिवता चरित्रत्रयं बीजं ह्रीं शक्तिः त्रिगुणात्मस्वरूप-चण्डिकाशाप-विमुक्तौ मम सङ्कल्पितकार्य-सिद्ध्यर्थे जपे विनियोगः ।

पाठः–

ॐ (ह्रीं) रीं रेतःस्वरूपिण्यै मधुकैटभमर्दिन्यै ब्रह्म-वसिष्ठविश्वामित्रशापाद् विमुक्ता भव॥ १ ॥

ॐ श्रीं बुद्धिस्वरूपिण्यै महिषासुरसैन्यनाशिन्यै ब्रह्म-वसिष्ठविश्वामित्रशापाद् विमुक्ता भव॥ २ ॥

ॐ रं रक्तस्वरूपिण्यै महिषासुरमर्दिन्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ३ ॥

ॐ क्षुं क्षुधास्वरूपिण्यै देववन्दितायै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ४ ॥

ॐ छां छायास्वरूपिण्यै दूतसंवादिन्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ५ ॥

ॐ शं शक्तिस्वरूपिण्यै धूम्रलोचनघातिन्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ६ ॥

ॐ तृं तृषास्वरूपिण्यै चण्डमुण्डवधकारिण्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ७ ॥

ॐ क्षां क्षान्तिस्वरूपिण्यै रक्तबीजवधकारिण्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ८ ॥

ॐ जां जातिस्वरूपिण्यै निशुम्भवधकारिण्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ९ ॥

ॐ लं लज्जास्वरूपिण्यै शुम्भवधकारिण्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ १०॥

ॐ शां शान्तिस्वरूपिण्यै देवस्तुत्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ ११॥

ॐ श्रं श्रद्धास्वरूपिण्यै सकलफलदात्र्यै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ १२॥

ॐ कां कान्तिस्वरूपिण्यै राजवरप्रदायै ब्रह्मवसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ १३॥

ॐ मां मातृस्वरूपिण्यै अनर्गलमहिमसहितायै ब्रह्म-वसिष्ठविश्वामित्रशापाद् विमुक्ता भव॥ १४॥

ॐ ह्रीं श्रीं दुं दुर्गायै सं सर्वैश्वर्यकारिण्यै ब्रह्म-वसिष्ठ-विश्वामित्रशापाद् विमुक्ता भव॥ १५॥

ॐ ऐं ह्रीं क्लीं नमः शिवायै अभेद्यकवचस्वरूपिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव॥ १६॥

ॐ क्रीं काल्यै कालि ह्रीं फट् स्वाहायै ऋग्वेदस्वरूपिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव॥ १७॥

ॐ ऐं ह्रीं क्लीं महाकाली-महालक्ष्मी-महासरस्वती-स्वरूपिण्यै त्रिगुणात्मिकायै दुर्गादेव्यै नमः॥ १८॥

फलश्रुतिः

इत्येवं हि महामन्त्रान् पठित्वा परमेश्वर !।
चण्डीपाठं दिवा रात्रौ कुर्यादेव न संशयः॥१९॥
एवं मन्त्र न जानाति चण्डीपाठं करोति यः।
आत्मानं चैव दातारं क्षीणं कुर्यान्न संशयः॥२०॥

इति रुद्रयामले ब्रह्मादि-शापविमोचनं समाप्तम्।

अथ देव्याः कवचम्

विनियोगः—ॐ अस्य श्री चण्डीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, चामुण्डा देवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्ध-देवतास्तत्त्वम्, श्रीजगदम्बाप्रीत्यर्थे सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।

ॐ नमश्चण्डिकायै ॥

मार्कण्डेय उवाच

ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम्।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह॥ १ ॥

ब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने॥ २ ॥
प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी।
तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम्॥ ३ ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च।
सप्तमं कालरात्रीति महागौरीति चाष्टमम्॥ ४ ॥
नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना॥ ५ ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः॥ ६ ॥
न तेषां जायते किञ्चिदशुभं रणसङ्कटे।
नापदं तस्य पश्यामि शोक-दुःख-भयं न हि॥ ७ ॥
यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते।
ये त्वां स्मरन्ति देवेशि रक्षसे तान्न संशयः॥ ८ ॥
प्रेतसंस्था तु चामुण्डा वाराही महिषासना।
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना॥ ९ ॥
माहेश्वरी वृषारूढा कौमारीशिखिवाहना।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया॥ १०॥

श्वेतरूपधरा देवी ईश्वरी वृषवाहना।
ब्राह्मी हंससमारूढा सर्वाभरण-भूषिता॥११॥
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः।
नानाभरण-शोभाढ्या नानारत्नोपशोभिताः॥१२॥
दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः।
शङ्खं चक्रं गदां शक्तिं हलं च मुसलायुधम्॥१३॥
खेटकं तोमरं चैव परशुं पाशमेव च।
कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम्॥१४॥
दैत्यानां देहनाशाय भक्तानामभयाय च।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै॥१५॥
नमस्तेऽस्तु महारौद्रे महाघोर-पराक्रमे।
महाबले महोत्साहे महाभय-विनाशिनि॥१६॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि।
प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता॥१७॥
दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्गधारिणी।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी॥१८॥
उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी।
ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद् वैष्णवी तथा॥१९॥
एवं दश दिशो रक्षेच्चामुण्डा शववाहना।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः॥२०॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता।
शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता॥२१॥
मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके॥२२॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी।
कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी॥२३॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका।
अधरे चामृतकला जिह्वायां च सरस्वती॥२४॥
दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके॥२५॥
कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी॥२६॥
नीलग्रीवा बहिः कण्ठे नलिकां नलकूबरी।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी॥२७॥
हस्तयोर्दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च।
नखाञ्छूलेश्वरी रक्षेत् कुक्षौ रक्षेत् कुलेश्वरी॥२८॥
स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी।
हृदये ललिता देवी उदरे शूलधारिणी॥२९॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा।
पूतना कामिका मेढ्रं गुदे महिषवाहिनी॥३०॥
कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी।
जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी॥३१॥
गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी।
पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी॥३२॥
नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी।
रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा॥३३॥
रक्त-मज्जा-वसा-मांसान्यस्थि-मेदांसि पार्वती।
अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी॥३४॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा।
ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु॥३५॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा।
अहङ्कारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी॥३६॥

प्राणापानौ तथा व्यानमुदानं च समानकम्।
वज्रहस्ता च मे रक्षेत्प्राणं कल्याणशोभना॥३७॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा॥३८॥
आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी।
यशःकीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी॥३९॥
गोत्रमिन्द्राणि मे रक्षेत् पशून्मे रक्ष चण्डिके।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी॥४०॥
पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा।
राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता॥४१॥
रक्षाहीनं तु यत् स्थानं वर्जितं कवचेन तु।
तत्सर्वं रक्ष मे देवि! जयन्ती पापनाशिनी॥४२॥
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः।
कवचेनावृतो नित्यं यत्र यत्रैव गच्छति॥४३॥
तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः।
यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्॥४४॥
परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान्।
निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः॥४५॥
त्रैलोक्ये तु भवेत् पूज्यः कवचेनावृतः पुमान्।
इदं तु देव्याः कवचं देवानामपि दुर्लभम्॥४६॥
यः पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः।
दैवीकला भवेत्तस्य त्रैलोक्येष्वपराजितः॥४७॥
जीवेद् वर्षशतं साग्रमपमृत्युविवर्जितः।
नश्यन्ति व्याधयः सर्वे लूता-विस्फोटकादयः॥४८॥
स्थावरं जङ्गमं चैव कृत्रिमं चाऽपि यद्विषम्।
अभिचाराणि सर्वाणि मन्त्र-यन्त्राणि भूतले॥४९॥

भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः।
सहजाः कुलजा माला डाकिनी शाकिनी तथा॥५०॥
अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः।
ग्रह-भूत-पिशाचाश्च यक्ष-गन्धर्व-राक्षसाः॥५१॥
ब्रह्म-राक्षस-वेतालाः कूष्माण्डा भैरवादयः।
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते॥५२॥
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम्।
यशसा वर्धते सोऽपि कीर्ति-मण्डित-भूतले॥५३॥
जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा।
यावद् भूमण्डलं धत्ते स-शैल-वन-काननम्॥५४॥
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्र-पौत्रिकी।
देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्॥५५॥
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः।
लभते परमं रूपं शिवेन सह मोदते॥ॐ॥५६॥

॥ इति वाराहपुराणे हरिहर-ब्रह्म-विरचितं देव्याः कवचं सम्पूर्णम् ॥

अर्गलास्तोत्रम्

विनियोगः—ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवताः, श्रीजगदम्बाप्रीत्यर्थे सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच

ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते॥१॥
जय त्वं देवि चामुण्डे जय भूतार्तिहारिणि।
जय सर्वगते देवि कालरात्रि नमोऽस्तु ते॥२॥
मधु-कैटभ-विद्रावि विधातृवरदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥३॥

महिषासुरनिर्णाशि भक्तानां सुखदे नमः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥४॥
रक्तबीजवधे देवि चण्ड-मुण्ड-विनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥५॥
शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥६॥
वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥७॥
अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥८॥
नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥९॥
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१०॥
चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥११॥
देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१२॥
विदेहि द्विषतां नाशं विधेहि बलमुच्चकैः।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१३॥
विधेहि देवि कल्याणं विधेहि परमां श्रियम्।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१४॥
सुरासुर - शिरोरत्न - निघृष्ट - चरणेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१५॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१६॥

प्रचण्ड-दैत्य-दर्पघ्ने चण्डिके प्रणताय मे।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१७॥
चतुर्भुजे चतुर्वक्त्र-संस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१८॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१९॥
हिमाचल-सुतानाथ-संस्तुते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥२०॥
इन्द्राणीपतिसद्भाव-पूजिते परमेश्वरि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥२१॥
देवि प्रचण्ड-दोर्दण्ड-दैत्यदर्प-विनाशिनि।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥२२॥
देवि भक्तजनोद्दाम-दत्तानन्दोदयेऽम्बिके।
रूपं देहि जयं देहि यशो देहि द्विषो जहि॥२३॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम्।
तारिणीं दुर्गसंसार-सागरस्य कुलोद्भवाम्॥२४॥
इदं स्तोत्रं पठित्वां तु महास्तोत्रं पठेन्नरः।
स तु सप्तशतीसंख्या-वरमाप्नोति सम्पदाम्॥२५॥

इति श्रीदेव्या अर्गलास्तोत्रं सम्पूर्णम्।

कीलकस्तोत्रम्

विनियोगः—ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः, अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।

ॐ नमश्चण्डिकायै॥

मार्कण्डेय उवाच

विशुद्ध-ज्ञान-देहाय त्रिवेदी-दिव्यचक्षुषे।
श्रेयः प्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे॥ १॥
सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम्।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः॥ २॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति॥ ३॥
न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जाप्येन सिद्ध्येत् सर्वमुच्चाटनादिकम्॥ ४॥
समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम्॥ ५॥
स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्नोति सु न पुण्ये तां यथावन्नियन्त्रणाम्॥ ६॥
सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः॥ ७॥
ददाति प्रतिगृह्णाति नान्यऽथैषा प्रसीदति।
इत्थं रूपेण कीलेन महादेवेन कीलितम्॥ ८॥
यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः॥ ९॥
न चैवाप्यटतस्तस्य भयं क्वापीह जायते।
नाऽपमृत्युवशं याति मृतो मोक्षमवाप्नुयात्॥ १०॥
ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः॥ ११॥
सौभाग्यादि च यत् किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम्॥ १२॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत्॥१३॥
ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः।
शत्रुहानिःपरो मोक्षःस्तूयते सा न किं जनैः॥ॐ॥१४॥

इति श्रीभगवत्याः कीलकस्तोत्रं समाप्तम्॥

नवार्णमन्त्र-जपविधिः

विनियोगः- **श्रीगणपतिर्जयति। ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्म-विष्णु-रुद्रा ऋषयः, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, श्रीमहाकाली-महालक्ष्मी-महासरस्वत्यो देवताः, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकम्, श्रीमहाकाली-महालक्ष्मी-महासरस्वतीप्रीत्यर्थे जपे न्यासे च विनियोगः।**

ऋष्यादिन्यासः- **ब्रह्म-विष्णु-रुद्रऋषिभ्यो नमः, शिरसि। गायत्र्युष्णि-गनुष्टुप् छन्देभ्यो नमः, मुखे। महाकाली-महालक्ष्मी-महासरस्वती-देवताभ्यो नमः, हृदि। ऐं बीजाय नमः, गुह्ये। ह्रीं शक्तये नमः, पादयोः। क्लीं कीलकाय नमः, नाभौ। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः, सर्वाङ्गे।**

करादिन्यासः- **ॐ ऐं अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ क्लीं मध्यमाभ्यां नमः। ॐ चामुण्डायै अनामिकाभ्यां नमः। ॐ विच्चे कनिष्ठिकाभ्यां नमः। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः।**

हृदयादिन्यासः- **ॐ ऐं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ क्लीं शिखायै वषट्। ॐ चामुण्डायै कवचाय हुम्। ॐ विच्चे नेत्रत्रयाय वौषट्। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्।**

अक्षरन्यासः- ॐ ऐं नमः, शिखायाम्। ॐ ह्रीं नमः, दक्षिणनेत्रे। ॐ क्लीं नमः, वामनेत्रे। ॐ चां नमः, दक्षिणकर्णे। ॐ मुं नमः, वामकर्णे। ॐ डां नमः, दक्षिणनासायाम्। ॐ यै नमः, वामनासायाम्। ॐ विं नमः, मुखे। ॐ च्चें नमः, गुह्ये। एवं विन्यस्याऽष्टवारं मूलेन व्यापकं कुर्यात्।

दिङ्न्यासः- ॐ ऐं प्राच्यै नमः, ॐ ऐं आग्नेय्यै नमः। ॐ ह्रीं

दक्षिणायै नमः। ॐ ह्रीं नैर्ऋत्यै नमः। ॐ क्लीं प्रतीच्यै नमः। ॐ क्लीं वायव्यै नमः। ॐ चामुण्डायै उदीच्यै नमः। ॐ चामुण्डायै ऐशान्यै नमः। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ऊर्ध्वायै नमः। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे भूम्यै नमः।

ध्यानम्

खड्गं चक्र-गदेषु-चाप-परिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषा वृताम्।
नीलाश्म-द्युतिमास्य-पाददशकां सेवे महाकालिकां
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥१॥
अक्ष-स्त्रक्-परशुं गदेषुकुलिशं पद्मं धनुःकुण्डिकां
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्॥२॥
घण्टा-शूल-हलानि शङ्खमुसले चक्रं धनुः सायकं
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्यप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वमत्र सरस्वती-मनुभजे शुम्भादिदैत्यार्दिनीम्॥३॥

ततः 'ऐं ह्रीं अक्षमालिकायै नमः' इति मालां सम्पूज्य, प्रार्थयेत्।

माला-प्रार्थना

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव॥१॥
अविघ्नं कुरु माले! त्वं गृह्णामि दक्षिणे करे।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये॥२॥

तत्पश्चात् 'ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इति नवार्णमन्त्रमष्टोत्तरशतं जपेत्।

ततः— गुह्याऽतिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि! त्वत्प्रसादान्महेश्वरि॥

इति पठित्वा देव्या वामकरे जपं निवेदयेत्।

इति नवार्णमन्त्र-जप-विधिः समाप्ता।

तन्त्रोक्तं रात्रिसूक्तम्

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम्।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः॥ १॥

ब्रह्मोवाच

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता॥ २॥
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः।
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा॥ ३॥
त्वयैतद् धार्यते विश्वं त्वयैतत् सृज्यते जगत्।
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा॥ ४॥
विसृष्टौ सृष्टिरूपां त्वं स्थितिरूपा च पालने।
तथा संहृति-रूपान्ते जगतोऽस्य जगन्मये॥ ५॥
महाविद्या महामाया महामेधा महास्मृतिः।
महामोहा च भवती महादेवी महासुरी॥ ६॥
प्रकृतिस्त्वं च सर्वस्य गुणत्रय - विभाविनी।
कालरात्रि - र्महारात्रि-र्मोहरात्रिश्च दारुणा॥ ७॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च॥ ८॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डी परिघायुधा॥ ९॥
सौम्या सौम्यतराशेष-सौम्येभ्यस्त्वतिसुन्दरी।
पराऽपराणां परमा त्वमेव परमेश्वरी॥१०॥
यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा॥११॥

यया त्वया जगत्स्रष्टा जगत् पात्यत्ति यो जगत्।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः॥१२॥
विष्णुः शरीरग्रहणमहमीशान एव च।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्॥१३॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता।
मोहयैतौ दुराधर्षावसुरौ मधु-कैटभौ॥१४॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥१५॥

इति तन्त्रोक्तं रात्रिसूक्तं समाप्तम्।

सप्तशतीन्यासः

सप्तशतीन्यास—पश्चात् सप्तशती का विनियोग, न्यास एवं ध्यान करें।

विनियोगः—**प्रथम-मध्यमोत्तरचरित्राणां ब्रह्म-विष्णु-रुद्रा ऋषयः, श्रीमहाकाली-महालक्ष्मी-महासरस्वत्यो देवताः, गायत्र्युष्णिगनुष्टुभश्छन्दांसि, नन्दाशाकम्भरीभीमाः शक्तयः, रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि, अग्नि-वायु-सूर्यास्तत्त्वानि, ऋग्-यजुः-सामवेदा ध्यानानि, सकलकामनासिद्धये श्रीमहाकाली-महालक्ष्मी-महासरस्वतीदेवता-प्रीत्यर्थे जपे विनियोगः।**

करन्यासः

ॐखड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा॥

अङ्गुष्ठाभ्यां नमः।

ॐशूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिः स्वनेन च॥

तर्जनीभ्यां नमः।

ॐप्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि॥

मध्यमाभ्यां नमः।

ॐसौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्।।

अनामिकाभ्यां नमः।

ॐखड्ग-शूल-गदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः।।

कनिष्ठिकाभ्यां नमः।

ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते।।

करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः

'ॐखड्गिनी शूलिनी घोरा०' हृदयाय नमः।
'ॐ शूलेन पाहि नो देवि०' शिरसे स्वाहा।
'ॐ प्राच्यां रक्ष प्रतीच्यां च०' शिखायै वषट्।
'ॐ सौम्यानि यानि रूपाणि०' कवचाय हुम्।
'ॐ खड्ग-शूल-गदादीनि०' नेत्रत्रयाय वौषट्।
'ॐ सर्वस्वरूपे सर्वेशे०' अस्त्राय फट्।

इति हृदयादिन्यासः।

ध्यानम्

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे।।

।। इति सप्तशतीन्यासः सम्पूर्णः।।

प्रथमोऽध्यायः (१)

विनियोगः—ॐ प्रथमचरित्रस्य ब्रह्मा ऋषिः, महाकाली देवता, गायत्री छन्दः, नन्दा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्त्वम्, ऋग्वेदः स्वरूपम्, श्रीमहाकालीप्रीत्यर्थे प्रथमचरित्रजपे विनियोगः।

ध्यानम्

ॐखड्गं चक्र-गदेषु-चाप-परिघाञ्छूलं भुशुण्डीं शिरः
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम्।
नीलाश्म-द्युतिमास्य-पाददशकां सेवे महाकालिकाम्
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥

ॐ नमश्चण्डिकायै

'ॐ ऐं' मार्कण्डेय उवाच ॥१॥ (पत्र, पुष्प, फल)

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः। अर्क (मदार)
निशामय तदुत्पत्तिं विस्तराद् गदतो मम॥२॥
महामायानुभावेन यथा मन्वन्तराधिपः। अर्क (मदार)
स बभूव महाभागः सावर्णिस्तनयो रवेः॥३॥
स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः।
सुरथो नाम राजाऽभूत् समस्ते क्षितिमण्डले॥४॥
तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान्। अपामार्ग (शमी)
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा॥५॥
तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः। कुशा
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः॥६॥
ततः स्वपुरमायातो निजदेशाधिपोऽभवत्। खैर
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः॥७॥
अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः।
कोशो बलं चापहृतं तत्राऽपि स्वपुरे ततः॥८॥

ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः।
एकाकी हयमारुह्य जगाम गहनं वनम्॥९॥
स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः। तृण, कुशा, दूर्वा
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम्॥१०॥
तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृतः।
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे॥११॥
सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत्॥१२॥
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा।
न जाने स प्रधानो मे शूरहस्ती सदामदः॥१३॥
मम वैरिवशं यातः कान् भोगानुपलप्स्यते।
ये ममानुगता नित्यं प्रसाद-धन-भोजनैः॥१४॥
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम्।
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम्॥१५॥
सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति।
एतच्चाऽन्यच्च सततं चिन्तयामास पार्थिवः॥१६॥
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः।
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः॥१७॥
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे।
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम्॥१८॥
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम्॥१९॥

वैश्य उवाच॥२०॥ पत्र, पुष्प, फल

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले॥२१॥
पुत्र-दारैर्निरस्तश्च धनलोभादसाधुभिः।
विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम्॥२२॥

वनमभ्यागतो दुःखी निरस्तश्चाऽऽप्तबन्धुभिः।
सोऽहं न वेद्मि पुत्राणां कुशलाऽकुशलात्मिकाम्॥२३॥
प्रवृत्तिं स्वजनानां च दाराणां चाऽत्र संस्थितः।
किं नु तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम्॥२४॥
कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः॥२५॥

राजोवाच ॥२६॥ पत्र, पुष्प, फल

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः॥२७॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसम्॥२८॥

वैश्य उवाच ॥२९॥ पत्र, पुष्प, फल

एवमेतद्यथा प्राह भवानस्मद्गतं वचः॥३०॥
किं करोमि न बध्नाति मम निष्ठुरतां मनः।
यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः॥३१॥
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः।
किमेतन्नाभिजानामि जानन्नपि महामते॥३२॥
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु।
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते॥३३॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम्॥३४॥

मार्कण्डेय उवाच ॥३५॥ पत्र, पुष्प, फल

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ॥३६॥
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः।
कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम्॥३७॥
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ॥३८॥

राजोवाच ॥३९॥ पत्र, पुष्प, फल

भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत्॥४०॥

दु:खाय यन्मे मनसः स्वचित्तायत्तता विना।
ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ॥४१॥
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम।
अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥४२॥
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति।
एवमेष तथाहं च द्वावप्यत्यन्तदु:खितौ ॥४३॥
दृष्टदोषे ऽपि विषये ममत्वाकृष्टमानसौ।
तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥४४॥
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥४५॥

ऋषिरुवाच ॥४६॥ पत्र, पुष्प, फल

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ॥४७॥
विषयश्च महाभाग याति चैवं पृथक् पृथक्।
दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे ॥४८॥
केचिद्दिवा तथा रात्रौ पाणिनस्तुल्यदृष्टयः।
ज्ञानिनो मनुजाः सत्यं किं तु ते न हि केवलम् ॥४९॥
यतो हि ज्ञानिनः सर्वे पशु-पक्षि-मृगादयः।
ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥५०॥
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः। यव, ताण्डुल (चावल)
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ॥५१॥
कणमोक्षादृतान् मोहात् पीड्यमानानपि क्षुधा।
मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ॥५२॥
लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि।
तथापि ममतावर्ते मोहगर्ते निपातिताः ॥५३॥
महामायाप्रभावेण संसारस्थितिकारिणा।
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥५४॥

महामाया हरेश्चैषा तया सम्मोह्यते जगत्।
ज्ञानिनामपि चेतांसि देवी भगवती हि सा॥५५॥
बलादाकृष्य मोहाय महामाया प्रयच्छति। शर्करा (चीनी)
तया विसृज्यते विश्वं जगदेतच्चराचरम्॥५६॥
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये।
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी॥५७॥
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी॥५८॥

राजोवाच ॥५९॥ पत्र, पुष्प, फल

भगवन् का हि सा देवी महामायेति यां भवान्॥६०॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज।
यत्प्रभावा च सा देवि यत्स्वरूपा यदुद्भवा॥६१॥
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर॥६२॥

ऋषिरुवाच ॥६३॥ पत्र, पुष्प, फल

नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम्॥६४॥
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम।
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा॥६५॥
उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते। मिश्री, पुष्प
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते॥६६॥

पीपल का पत्ता, कमलगट्टा

आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः।
तदा द्वावसुरौ घोरौ विख्यातौ मधु-कैटभौ॥६७॥

उड़द राल, समुद्र का झाग

विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ।
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः॥६८॥

दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम्। कमलगट्टा
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थित: ॥६९॥
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम्। कमलगट्टा
विश्वेश्वरीं जगद्धात्रीं स्थिति-संहार कारिणीम्॥७०॥

पत्र, पुष्प, फल

निद्रां भगवतीं विष्णोरतुलां तेजस: प्रभु:॥७१॥

ब्रह्मोवाच ॥७२॥ हल्दी

त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कार: स्वरात्मिका॥७३॥
सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता। दूर्वा, दर्भा
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषत:॥७४॥
त्वमेव सन्ध्या सावित्री त्वं देवि जननी परा। मिश्री
त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत्॥७५॥
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा।
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने॥७६॥
तथा संहृति रूपान्ते जगतोऽस्य जगन्मये। राई
महाविद्या महामाया महामेधा महास्मृति:॥७७॥
महामोहा च भवती महादेवी महासुरी। राई
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी॥७८॥

लाजा, मिश्री, सहदेवी, पुष्प

कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा।
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा॥७९॥
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्ति: क्षान्तिरेव च।
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा॥८०॥
शङ्खिनी चापिनी बाण-भुशुण्डी-परिघायुधा। पुष्प, सुगन्धित द्रव्य
सौम्या सौम्यतराशेष-सौम्येभ्यस्त्वतिसुन्दरी॥८१॥

परापराणां परमा त्वमेव परमेश्वरी।
यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके॥८२॥
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा। राई, हल्दी
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत्॥८३॥
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः। जायफल, भांग
विष्णुः शरीरग्रहणमहमीशान एव च॥८४॥
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्।
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता॥८५॥
मोहयैतौ दुराधर्षावसुरौ मधु-कैटभौ।
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु॥८६॥

पत्र, पुष्प, फल

बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥८७॥

ऋषिरुवाच ॥८८॥ कमलगट्टा, रक्त, गुंजा

एवं स्तुता तदा देवी तामसी तत्र वेधसा॥८९॥
विष्णोः प्रबोधनार्थाय निहन्तुं मधु-कैटभौ।
नेत्रास्य - नासिका-बाहु - हृदयेभ्यस्तथोरसः॥९०॥
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः।
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः॥९१॥
एकार्णवेऽहिशयनात्ततः स ददृशे च तौ।
मधु-कैटभौ दुरात्मानावतिवीर्यपराक्रमौ॥९२॥
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ।
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः॥९३॥
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः। राई
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ॥९४॥
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्॥९५॥

श्रीभगवानुवाच ॥९६॥ पत्र, पुष्प, फल

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि॥९७॥
किमन्येन वरेणात्र एतावद्धि वृतं मम॥९८॥

ऋषिरुवाच ॥९९॥ कपूर

वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत्॥१००॥
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः। कमलगट्टा
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता॥१०१॥

ऋषिरुवाच ॥१०२॥ पत्र, पुष्प, फल

कुशा, शंखपुष्पी, गूगल, पान, मधु, केला

तथेत्युक्त्वा भगवता शङ्ख-चक्र-गदाभृता।
कृत्वा चक्रेण वैच्छिन्ने जघने शिरसी तयोः॥१०३॥
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम्। पुष्प
प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते।। ऐं ॐ ॥१०४॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधु-कैटभवधो नाम प्रथमोऽध्यायः ॥१॥
उवाच १४, अर्धश्लोका २४, श्लोकाः ६६ एवमादितः ॥१०४॥

विशेषाहुति (महाहुति)–

अध्याय पूरा होने पर इस प्रकार आहुति देवें—एक पान पर पुड़ी, खीर या हलुवा, सुपाड़ी, लौंग, इलायची, केला, कमलगट्टा, मधु-गुग्गुल इत्यादि ले, उसे घी से भिगोये, स्रुचि में रखकर खड़े होकर निम्न मन्त्र से आहुति दे—

ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन
ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।।

ॐ साङ्गायै सपरिवारायै, सवाहनायै सायुधायै वाग्भव बीजाधिष्ठात्र्यै महाकाल्यै महाहुति समर्पयामि नमः स्वाहा।।

इसके बाद पाँच बार स्रुवे से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम् स्वाहा॥

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतांतरिक्षस्य हविं रसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

द्वितीयोऽध्यायः (२)

विनियोगः—ॐ मध्यमचरित्रस्य विष्णुर्ऋषिर्महालक्ष्मीर्देवता, उष्णिक् छन्दः, शाकम्भरी शक्तिः, दुर्गा बीजम्, वायुस्तत्त्वम्, यजुर्वेदः स्वरूपम्, श्रीमहालक्ष्मीप्रीत्यर्थं मध्यमचरित्रजपे विनियोगः।

ध्यानम्

ॐ अक्ष-स्रक्-परशुं गदेषु-कुलिशं पद्मं धनुष्कुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्। शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्॥

'ॐ ह्रीं' ऋषिरुवाच ॥१॥ पत्र, पुष्प, फल

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा। गुगल
महिषेऽसुराणामधिपे देवानां च पुरन्दरे॥२॥
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम्।
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः॥३॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिम्।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ॥४॥
यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम्।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम्॥५॥

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च।
अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठति॥६॥
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना॥७॥
एतद्वः कथितं सर्वममरारिविचेष्टितम्।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम्॥८॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः।
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ॥९॥
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्तत।

नीम गिलोय, जायफल, आवला

निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च॥१०॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत॥११॥
अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम्। कपूर
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम्॥१२॥
अतुलं तत्र तत्तेजः सर्वदेवशरीरजम्।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा॥१३॥
यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम्। जटामाँसी, विष्णुक्रांता
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा॥१४॥
सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत्। आम्रफल
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः॥१५॥
ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका॥१६॥
तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा। कपूर
नयनत्रितयं जज्ञे तथा पावकतेजसा॥१७॥

भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च। रक्तचन्दन
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा॥१८॥
ततः समस्तदेवानां तेजोराशिसमुद्भवाम्।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः॥१९॥
शूलं शूलाद् विनिष्कृष्य ददौ तस्यै पिनाकधृक्। लौंग
चक्रं च दत्तवान् कृष्णः समुत्पाद्य स्वचक्रतः॥२०॥
शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः। शंखपुष्पी
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी॥२१॥
वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः। लौंग
ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात्॥२२॥
कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम्॥२३॥
समस्तरोमकूपेषु निजरश्मीन् दिवाकरः।
कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम्॥२४॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे। पुष्प
चूडामणिं तथा दिव्यं कुण्डले कटकानि च॥२५॥
अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु।
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम्॥२६॥
अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम्॥२७॥
अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम्। कपूर, पुष्प
अम्लानपङ्कजां मालां शिरस्युरसि चापराम्॥२८॥
अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम्। पुष्प, कमलगट्टा
हिमवान् वाहनं सिंहं रत्नानि विविधानि च॥२९॥

ददावशून्यं सुरया पानपात्रं धनाधिपः। मधु
शेषश्च सर्वनागेशो महामणिविभूषितम्॥३०॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम्।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा॥३१॥
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः॥३२॥
अमायतातिमहता प्रतिशब्दो महानभूत्।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे॥३३॥
चचाल वसुधा चेलुः सकलाश्च महीधराः।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम्॥३४॥
तुष्टुवुर्मुनयश्चैनां भक्ति-नम्रात्म-मूर्तयः।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः॥३५॥
सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः॥३६॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा॥३७॥
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम्।
क्षोभिताशेषपातालां धनुर्ज्यानिः स्वनेन ताम्॥३८॥
दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम्।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम्॥३९॥
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपित-दिगन्तरम्।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः॥४०॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः।
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः॥४१॥

अयुध्यतायुतानां च सहस्रेण महाहनुः।
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥४२॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे।
गज-वाजि - सहस्रौघैरनेकैः परिवारितः ॥४३॥
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत।
विडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ॥४४॥
युयुधे संयुगे तत्र रथानां परिवारितः। शंख
अन्ये च तत्रायुतशो रथ-नाग-हयैर्वृताः ॥४५॥
युयुधुः संयुगे देव्या सह तत्र महासुराः। गदा
कोटि-कोटि-सहस्रैस्तु रथानां दन्तिनां तथा ॥४६॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥४७॥
युयुधुः संयुगे देव्या खड्गैः परशु-पट्टिशैः।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥४८॥
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥४९॥
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी।
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ॥५०॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥५१॥
चचारासुरसैन्येषु वनेष्विव हुताशनः।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥५२॥
त एव सद्यः सम्भूता गणाः शतसहस्रशः।
युयुधुस्ते परशुभिर्भिन्दिपालासि-पट्टिशैः ॥५३॥

नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः।
अवादयन्त पटहान् गणाः शङ्खांस्तथापरे॥५४॥
मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे।
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः॥५५॥
खड्गादिभिश्च शतशो निजघान महासुरान्।
पातयामास चैवान्यान् घण्टास्वनविमोहितान्॥५६॥
असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत्। हरताल
केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे॥५७॥
विपोथिता निपातेन गदया भुवि शेरते।
वेमुश्च केचिद् रुधिरं मुसलेन भृशं हताः॥५८॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि।
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे॥५९॥
श्येनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः। सरसों
केषाञ्चिद् बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे॥६०॥
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः॥६१॥
एकबाह्वक्षिचरणाः केचिद् देव्या द्विधा कृताः।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः॥६२॥
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः। कटहल
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः॥६३॥
कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः॥६४॥
पातितै रथनागाश्वैरसुरैश्च वसुन्धरा।
अगम्या साभवत्तत्र यत्राभूत्स महारणः॥६५॥

शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम्॥६६॥
क्षणेन तन्महासैन्यमसुराणां तथाम्बिका। दर्भा, कपूर, राई
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्॥६७॥
स च सिंहो महानादमुत्सृजन्धुतकेसरः। केशर
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति॥६८॥
देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः। पुष्प, गुगुल, बिल्वपत्र
यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि॥ॐ॥६९॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥२॥

उवाच १, श्लोकाः ६८, एवम् ६९, एवमादितः ॥१७३॥

विशेषाहुति (महाहुति)–

पान के पत्ते पर पूड़ी, खीर, हलुवा, लौंग, इलायची, सुपारी, मधु, केला, गुगुल, कमलगट्टा एवं हवन सामग्री सहित स्रुवा में रखकर घी में भिगोकर खड़े होकर आहुति देवे।

मन्त्र—**ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।**
नमः प्रकृत्यै भद्रायै नियताः प्रवताः स्मताम॥।

ॐ श्रीश्च्च ते लक्ष्मीश्च्च पत्न्यावहोरात्त्रे पार्श्वे नक्षत्त्राणि रूपमश्श्विनौ व्यात्तम्। इष्ष्णन्निषाणामुं म ऽइषाण सर्व्वलोकम्म ऽइषाण॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै सायुधायै अष्टाविंशति वर्णात्मिकायै लक्ष्मी बीजाधिठात्र्यै श्रीमहालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

१. ॐ प्राणाय स्वाहा, २. ॐ व्यानाय स्वाहा। ३. ॐ अपानाय स्वाहा, ४. ॐ समानाय स्वाहा, ५. ॐ उदानाय स्वाहा।

तृतीयोऽध्यायः (३)

ध्यानम्

ॐ उद्यद्भानु-सहस्रकान्तिमरुण-क्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम्।
हस्ताब्जैर्दधतीं त्रिनेत्र-विलसद् वक्त्रारविन्दश्रियं
देवीं बद्ध-हिमांशु-रत्नमुकुटां वन्देऽरविन्दस्थिताम्॥

'ॐ' ऋषिरुवाच ॥१॥ पत्र, पुष्प, फल

निहन्यमानं तत्सैन्यमवलोक्य महासुरः।
सेनानीश्चिक्षुरः कोपाद् ययौ योद्धुमथाम्बिकाम्॥२॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः।
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः॥३॥
तस्यच्छित्त्वा ततो देवी लीलयैव शरोत्करान्।
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम्॥४॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम्।
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः॥५॥
सच्छिन्नधन्वा विरथो हताश्वो हतसारथिः।
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः॥६॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि।
आजघान भुजे सव्ये देवीमप्यतिवेगवान्॥७॥
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन।
ततो जग्राह शूलं स कोपादरुणलोचन॥८॥
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः। कपूर
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात्॥९॥
दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत। लौंग, कागजी नीबू
तच्छूलं शतधा तेन नीतं स च महासुराः॥१०॥

हते तस्मिन् महावीर्ये महिषस्य चमूपतौ। गुग्गुल
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥११॥
सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिकाद्रुतम्।
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम्॥१२॥
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः।
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत्॥१३॥
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा॥१४॥
युद्ध्यमानौ ततस्तौ तु तस्मान् नागान् महीं गतौ।
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥१५॥
ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा।
करप्रहारेण शिरश्चामरस्य पृथक् कृतम्॥१६॥
उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः। पालक, सोवा, शिलाजीत
दन्तमुष्टितलैश्चैव करालश्च निपातितः॥१७॥
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम्। चिचिड़ी, सोवापालक
वाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम्॥१८॥
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम्। लौंग
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी॥१९॥
बिडालस्यासिना कायात् पातयामास वै शिरः। सरसों
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम्॥२०॥
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः।
माहिषेण स्वरूपेण त्रासयामास तान् गणान्॥२१॥
कांश्चितुण्डप्रहारेण खुरक्षेपैस्तथापरान्।
लाङ्गूलताडितांश्चान्याञ्छृङ्गाभ्यां च विदारितान्॥२२॥

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च।
निःश्वास-पवनेनान्यान् पातयामास भूतले॥ २३॥
निपात्य प्रमथानीकमभ्यधावत सोऽसुरः।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका॥ २४॥
सोऽपि कोपान् महावीर्यः खुरक्षुण्णमहीतलः। बड़ा (उड़द)
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च॥ २५॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः॥ २६॥
धुतशृङ्ग-विभिन्नाश्च खण्डं खण्डं ययुर्घनाः। सिंघाड़ा
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः॥ २७॥
इति क्रोधसमाध्मातमापतन्तं महासुरम्।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत्॥ २८॥
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम्। हरताल
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे॥ २९॥
ततः सिंहोऽभवत् सद्यो यावत् तस्याम्बिका शिरः।
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत॥ ३०॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः।
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः॥ ३१॥
करेण च महासिंहं तं चकर्ष जगर्ज च।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत॥ ३२॥
ततो महासुरो भूयो माहिषं वपुरास्थितः।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम्॥ ३३॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम्। मधु, पान, गुड़, दूध
पपौ पुनः पुनश्चैव जहासारुणलोचना॥ ३४॥

ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान्॥३५॥
सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करै।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम्॥३६॥

देव्युवाच ॥३७॥ पत्र, पुष्प, फल

मधु, आसव, पत्र, पुष्प, फल

गर्ज गर्ज क्षणं मूढ मधु यावत् पिबाम्यहम्।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः॥३८॥

ऋषिरुवाच ॥३९॥ पत्र, पुष्प, फल

एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम्। सरसो
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत्॥४०॥
ततः सोऽपि पदाऽऽक्रान्तस्तया निजमुखात्ततः।
अर्धनिष्क्रान्त एवासीद् देव्या वीर्येण संवृतः॥४१॥

काली मिचई उड़द, लौकी

अर्धनिष्क्रान्त एवासौ युध्यमानो महासुर।
तया महासिना देव्या शिरश्छित्त्वा निपातितः॥४२॥
ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत्।
प्रहर्षं च परं जग्मुः सकला देवतागणाः॥४३॥

पत्र, पुष्प, गुलाल, पान, सुपारी

तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः॥ॐ॥४४॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥३॥
उवाच ३, श्लोकाः ४१, एवम् ४४, एवमादितः ॥२१७॥

विशेषाहुति (महाहुति)–

पान के पत्ते पर पूड़ी, हलुवा, खीर, सुपाड़ी, लौंग, इलायची,

माष (उड़द), दधि, चंदन, कमलगट्टा, मधु, गुग्गुल, पत्र, पुष्प, फल सहित स्रुवा में घी भरकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्।।

ॐ श्रीश्च्चं ते लक्ष्मीश्च्च पत्न्यावहोरात्रे पार्श्वे नक्षंत्राणि रूपमश्विनौ व्यात्तम्। इष्ण्णन्निषाणामुं म ऽइषाण सर्व्वलोकम्मं ऽइषाण स्वाहा।।

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै अष्टाविंशति वर्णात्मिकायै लक्ष्मी बीजाधिठात्र्यै श्रीमहालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम् स्वाहा।।

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतांतरिक्षस्य हविं रसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा।।

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

चतुर्थोऽध्यायः (४)

ध्यानम्

ॐ कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्ती त्रिनेत्राम्।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः।।

नोट : चतुर्थ अध्याय के सभी मन्त्रों में पायस (खीर) युक्त शाकल्य से आहुति देवे।

ऋषिरुवाच ॥१॥ पत्र, पुष्प, फल

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन् दुरात्मनि सुरारिबले च देव्या।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्ष-पुलकोद्गम-चारुदेहाः ॥२॥

देव्या यया ततमिदं जगदात्मशक्त्या (कदलीफल)
निश्शेष-देवगण-शक्तिसमूह-मूर्त्या।
तामम्बिकामखिल-देव-महर्षि-पूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥३॥

यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च।
सा चण्डिकाखिल-जगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु॥४॥

(पुष्प, बिल्वफल विष्णुक्रांत)

या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम्॥५॥

किं वर्णयाम तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु॥६॥

हेतुः समस्तजगतां त्रिगुणापि दोषै- (बिल्वपत्र)
र्न ज्ञायसे हरिहरादिभिरप्यपारा।
सर्वाश्रयाखिलमिदं जगदंशभूत -
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या॥७॥

यस्याः समस्तसुरता समुदीरणेन (हलुवा, पक्वान्न, श्वेत चंदन)
तृप्तिं प्रयाति सकलेषु मखेषु देवि।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च॥८॥
या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्त - समस्त-दोषै-
र्विद्यासि सा भगवती परमा हि देवि॥९॥
शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्य-पदपाठवतां च साम्नाम्।
देवी त्रयी भगवती भवभावनाय
वार्त्ता च सर्वजगतां परमार्तिहन्त्री॥१०॥
मेधासि देवि विदिताखिलशास्त्रसारा (ब्राह्मी कपूर)
दुर्गासि दुर्गभवसागरनौरसङ्गा।
श्रीः कैटभारि-हृदयैक-कृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा॥११॥
ईषत्सहासममलं परिपूर्णचन्द्र- (बिजौरा)
बिम्बानुकारि कनकोत्तम-कान्ति-कान्तम्।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण॥१२॥
दृष्ट्वा तु देवि कुपितं भ्रुकुटी-कराल-
मुद्यच्छशाङ्क-सदृश-च्छवि यन्न सद्यः।
प्राणान् मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन॥१३॥

देवि प्रसीद परमा भवती भवाय (लाल कनेर, पुष्प)
सद्यो विनाशयसि कोपवती कुलानि।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य॥१४॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः।
धन्यास्त एव निभृतात्मज-भृत्य-दारा
येषां सदाभ्युदयदा भवती प्रसन्ना॥१५॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृतः प्रतिदिनं सुकृतिं करोति।
स्वर्गं प्रयाति च ततो भवती प्रसादात्
लोकत्रयेऽपि फलदा ननु देवि तेन॥१६॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि।
दारिद्र्य-दुःख-भय-हारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता॥१७॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम्।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि॥१८॥

दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी॥१९॥

खड्ग-प्रभा-निकर-विस्फुरणैस्तथोग्रैः
शूलाग्र-कान्ति-निवहेन दृशोऽसुराणाम्।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत्॥२०॥

दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम्॥२१॥

केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि॥२२॥

(कमलगट्टा, लाल कनेर, सीताफल)

त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते॥२३॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च॥२४॥

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि॥२५॥

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्॥२६॥

खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः॥२७॥

ऋषिरुवाच ॥२८॥ (पत्र, पुष्प, फल)

(पुष्प, लाल चन्दन, हरिद्रा, सुगन्धित द्रव्य)

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः॥२९॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता। (अष्टांग धूप, गुगुल)
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान्॥३०॥

देव्युवाच ॥३१॥ (पत्र, पुष्प, फल)

व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम्॥३२॥

देवा ऊचुः ॥३३॥

(पत्र, पुष्प, फल)

भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते॥३४॥
यदयं निहतः शत्रुरस्माकं महिषासुरः। (गुगुल, जायफल)
यदि चापि वरो देयस्त्वयास्माकं महेश्वरि॥३५॥

(पंचमेवा, पायस, गुलकंद, मिश्री, पुष्प, फल)

संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः।
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने॥३६॥

(पत्र, पुष्प, फल, बिल्वपत्र)

तस्य वित्तर्द्धिविभवैर्धन-दारादि-सम्पदाम्।
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके॥३७॥

ऋषिरुवाच ॥३८॥

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽऽत्मनः। (पुष्प)
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप॥३९॥
इत्येतत् कथितं भूप सम्भूता सा यथा पुरा।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥४०॥
पुनश्च गौरीदेहात् सा समुद्भूता यथाभवत्। (भोजपत्र, रक्त कनेर)
वधाय दुष्टदैत्यानां तथा शुम्भ-निशुम्भयोः॥४१॥

(पुष्प, आँवला, मधु, धूप)

रक्षणाय च लोकानां देवानामुपकारिणी।
तच्छृणुष्व मयाऽऽख्यातं यथावत्कथयामि ते।। ह्रीं ॐ ।।४२।।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ।।४।।

उवाच १, अर्धश्लोकौ २, श्लोकाः ३५, एवम् ४२, एवमादितः ।।२५९।।

महाहुति–

पान के पत्ते पर पूड़ी, हलुवा, खीर, सुपाड़ी, लौंग, इलायची, माष, दधि, चंदन, कमलगट्टा, मधु, गुग्गुल, पत्र, पुष्प, फल सहित स्रुवा में घी भरकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्।।

ॐ श्रीश्च्च ते लक्ष्मीश्च्च पत्न्यावहोरात्रे पार्श्वे नक्षत्त्राणि रूपमश्श्विनौ व्यात्तम्। इष्ष्णन्निषाणामुं म ऽइषाण सर्व्वलोकम्म ऽइषाण।।

ॐ साङ्गायै सपरिवारायै, सायुधायै सवाहनायै सशक्तिकायै श्रीलक्ष्मी बीजाधिष्ठात्र्यै त्रिवर्णात्मिकायै श्रीमहालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा।

पञ्चमोऽध्यायः (५)

*विनियोगः–*ॐ अस्य श्रीउत्तरचरित्रस्य रुद्रऋषिः, महासरस्वती देवता, अनुष्टुप् छन्दः, भीमा शक्तिः, भ्रामरी बीजम्, सूर्यस्तत्त्वम्, सामवेदः स्वरूपम्, महासरस्वतीप्रीत्यर्थे उत्तरचरित्रपाठे विनियोगः।

ध्यानम्

ॐ घण्टा-शूल-हलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्। गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा- पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥

'ॐ क्लीं' ऋषिरुवाच ॥१॥ (पत्र, पुष्प, फल)

पुरा शुम्भ-निशुम्भाभ्यामसुराभ्यां शचीपतेः।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात्॥१॥
तावेव सूर्यतां तद्वदधिकारं तथैन्दवम्।
कौबेरमथ याम्यं च चक्राते वरुणस्य च॥३॥
तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च।
ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः॥४॥
हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम्॥५॥

(पत्र, पुष्प, फल, हलुवा)

तयास्माकं वरो दत्तो यथाऽऽपत्सु स्मृताखिलाः।
भवतां नाशयिष्यामि तत्क्षणात् परमापदः॥६॥
इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम्।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः॥७॥

देवा ऊचुः ॥८॥ (पत्र, पुष्प, फल, खीर)

(पत्र, पुष्प, फल, भोजपत्र, गुगुल)

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥९॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः। (हल्दी आँवला)
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः॥१०॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः। (पुष्प, भोजपत्र)
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥११॥

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै। (दूर्वा)
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१२॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः। (दारुल हल्दी)
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥१३॥
(विष्णुक्रान्ता)
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता। नमस्तस्यै ॥१४॥
नमस्तस्यै ॥१५॥ नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते। (आँवला)
नमस्तस्यै ॥१७॥ नमस्तस्यै ॥१८॥ नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता। (ब्राह्मी)
नमस्तस्यै ॥२०॥ नमस्तस्यै ॥२१॥ नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता। (हल्दी, निभगिलोय)
नमस्तस्यै ॥२३॥ नमस्तस्यै ॥२४॥ नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै ॥२६॥ नमस्तस्यै ॥२७॥ नमस्तस्यै नमो नमः ॥२८॥
या देवी सर्वभूतेषुच्छायारूपेण संस्थिता। (छाया, सतावरी)
नमस्तस्यै ॥२९॥ नमस्तस्यै ॥३०॥ नमस्तस्यै नमो नमः ॥३१॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता। (सोंठ, जायफल)
नमस्तस्यै ॥३२॥ नमस्तस्यै ॥३३॥ नमस्तस्यै नमो नमः ॥३४॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै ॥३५॥ नमस्तस्यै ॥३६॥ नमस्तस्यै नमो नमः ॥३७॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै ॥३८॥ नमस्तस्यै ॥३९॥ नमस्तस्यै नमो नमः ॥४०॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै ॥४१॥ नमस्तस्यै ॥४२॥ नमस्तस्यै नमो नमः ॥४३॥

या देवी सर्वभूतेषु लज्जारूपेण संस्थिता। (लाजा पुष्प)
नमस्तस्यै ॥४४ ॥ नमस्तस्यै ॥४५ ॥ नमस्तस्यै नमो नमः ॥४६ ॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता। (पुष्प)
नमस्तस्यै ॥४७ ॥ नमस्तस्यै ॥४८ ॥ नमस्तस्यै नमो नमः ॥४९ ॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै ॥५०॥ नमस्तस्यै ॥५१॥ नमस्तस्यै नमो नमः ॥५२॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता। (अबीर)
नमस्तस्यै ॥५३ ॥ नमस्तस्यै ॥५४ ॥ नमस्तस्यै नमो नमः ॥५५ ॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता। (मिस्त्री, विल्वपत्र, कमलगट्टा)
नमस्तस्यै ॥५६ ॥ नमस्तस्यै ॥५७ ॥ नमस्तस्यै नमो नमः ॥५८ ॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता। (मधु, पुष्प)
नमस्तस्यै ॥५९ ॥ नमस्तस्यै ॥६०॥ नमस्तस्यै नमो नमः ॥६१॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता। (ब्राह्मी, विजया)
नमस्तस्यै ॥६२ ॥ नमस्तस्यै ॥६३ ॥ नमस्तस्यै नमो नमः ॥६४ ॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता। (सहदेवी)
नमस्तस्यै ॥६५ ॥ नमस्तस्यै ॥६६ ॥ नमस्तस्यै नमो नमः ॥६७ ॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता। (पक्वान्न)
नमस्तस्यै ॥६८॥ नमस्तस्यै ॥६९ ॥ नमस्तस्यै नमो नमः ॥७०॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता। (लाल कनेर, केसर)
नमस्तस्यै ॥७१॥ नमस्तस्यै ॥७२॥ नमस्तस्यै नमो नमः ॥७३॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै ॥७५॥ नमस्तस्यै ॥७५॥ नमस्तस्यै नमो नमः ॥७६॥
इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥७७ ॥

चितिरूपेण या कृत्स्नमेतद् व्याप्य स्थिता जगत्।
नमस्तस्यै॥७८॥ नमस्तस्यै॥७९॥ नमस्तस्यै नमो नमः॥८०॥

स्तुता सुरैः पूर्वमभीष्टसंश्रयात् (मिस्री, इलायची)
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः॥८१॥

या साम्प्रतं चोद्धतदैत्यतापितै- (गुग्गुल)
रस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्ति-विनम्र-मूर्तिभिः॥८२॥

ऋषिरुवाच॥८३॥ (पत्र, पुष्प, फल)

एवं स्तवादियुक्तानां देवानां तत्र पार्वती। (जावित्री)
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन॥८४॥
साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का। (दालचीनी)
शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा॥८५॥
स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः। (भोजपत्र)
देवैः समेतैः समरे निशुम्भेन पराजितैः॥८६॥
शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका। (भोजपत्र, दालचीनी)
कौशिकीति समस्तेषु ततो लोकेषु गीयते॥८७॥
तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती। (दारुल हल्दी, पुष्प)
कालिकेति समाख्याता हिमाचलकृताश्रया॥८८॥
ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम्। (आम्रफल)
ददर्श चण्डो मुण्डश्च भृत्यौ शुम्भ निशुम्भयोः॥८९॥
ताभ्यां शुम्भाय चाख्याता अतीव सुमनोहरा।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम्॥९०॥

नैव तादृक् क्वचिद् रूपं दृष्टं केनचिदुत्तमम्।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर॥९१॥
स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा। (कपूर)
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति॥९२॥
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो।
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे॥९३॥
ऐरावतः समानीतो गजरत्नं पुरन्दरात्। (पुष्प, बिल्वपत्र)
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः॥९४॥
विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे। (गुंजा)
रत्नभूतमिहानीतं यदासीद् वेधसोऽद्भुतम्॥९५॥
निधिरेष महापद्मः समानीतो धनेश्वरात्। (पुष्प, कमलगट्टा)
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम्॥९६॥
छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति। (भोजपत्र)
तथायं स्यन्दनवरो यः पुराऽऽसीत् प्रजापतेः॥९७॥
मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे॥९८॥
निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः।
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी॥९९॥
एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते।
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते॥१००॥

ऋषिरुवाच ॥१०१॥ (पुष्प, पत्र, फळ)

निशम्येति वचः शुम्भः स तदा चण्ड-मुण्डयोः।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम्॥१०२॥
इति चेति च वक्तव्या सा गत्वा वचनान्मम।
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु॥१०३॥

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने। (मैनशिला)
सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा॥१०४॥

दूत उवाच ॥१०५॥ (पत्र, पुष्प, फल)

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः॥१०६॥
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु।
निर्जिताखिल-दैत्यारिः स यदाह शृणुष्व तत्॥१०७॥
मम त्रैलोक्यमखिलं मम देवा वशानुगाः।
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक्॥१०८॥
त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः।
तथैव गजरत्नं च हृत्वा देवेन्द्रवाहनम्॥१०९॥
क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम्॥११०॥
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च।
रत्नभूतानि भूतानि तानि मय्येव शोभने॥१११॥
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम्।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम्॥११२॥
मां वा ममानुजं वापि निशुम्भमुरुविक्रमम्।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः॥११३॥
परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात्। (लावा, लाजा)
एतद् बुद्ध्या समालोच्य मत्परिग्रहतां व्रज॥११४॥

ऋषिरुवाच ॥११५॥ (पत्र, पुष्प, फल)

(बच, पान, भोजपत्र, शमीपत्र, दूर्वा)

इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत्॥११६॥

देव्युवाच ॥११७॥

(शमीपत्र, दूर्वा, फल, पुष्प, कनेर पुष्प)

सत्यमुक्तं त्वया नात्र मिथ्या किंचित् त्वयोदितम्।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥११८॥
किं त्वत्र यत्प्रतिज्ञातं मिथ्यां तत् क्रियते कथम्।
श्रूयतामल्पबुद्धित्वात् प्रतिज्ञा या कृता पुरा॥११९॥

(लाजा, लौंग, कज्जल)

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति॥१२०॥

(लाजा, खाजा, शमीपत्र)

तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु॥१२१॥

दूत उवाच ॥१२२॥ (पत्र, पुष्प, फल)

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः।
त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुम्भ-निशुम्भयोः ॥१२३॥
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि।
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका॥१२४॥
इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम्॥१२५॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भ-निशुम्भयोः। (जटामासी)
केशाकर्षण-निर्धूत-गौरवा मा गमिष्यसि॥१२६॥

देव्युवाच ॥१२७॥

(शमीपत्र, पुष्प, फल, पान)

एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान्।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा॥१२८॥

(ताम्बूल, सुपारी, ईख)

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत्॥ ॐ॥१२९॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्या-दूतसंवादो नाम पञ्चमोऽध्यायः ॥५॥

उवाच १, त्रिपान्मन्त्राः ६६, श्लोकाः ५४, एवम् १२९, एवमादितः ॥३८८।

महाहुति– पान, पूड़ी, हलुवा, खीर, कमलगट्टा, लौंग, इलायची, सुपाड़ी, गुग्गुल, मधु, कपूर, श्वेत चंदन तथा फल एवं शाकल्य सहित घी से आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती। यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै श्रीविष्णुमायेति चतुर्विंश देवतायै कामबीजाधिष्ठात्र्यै श्रीमहासरस्वत्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम्॥

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

षष्ठोऽध्यायः (६)

ध्यानम्

ॐ नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावली-
भास्वद् देहलतां दिवाकरनिभां नेत्रत्रयोद्भासिताम्।
माला-कुम्भ-कपाल-नीरजकरां चन्द्रार्धचूडां परां
सर्वज्ञेश्वरभैरवाङ्कनिलयां पद्मावतीं चिन्तये॥

'ॐ' ऋषिरुवाच ॥१॥ (पत्र, पुष्प, फल)

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः।
समाचष्ट समागम्य दैत्यराजाय विस्तरात्॥२॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम्॥३॥
हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः। (राई, जटामासी, गूगल)
तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम्॥४॥
तत्परित्राणदः कश्चिद् यदि वोत्तिष्ठतेऽपरः।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा॥५॥

ऋषिरुवाच ॥६॥

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः। (मसूर)
वृत्तः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ॥७॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम्।
जगादोच्चैः प्रयाहीति मूलं शुम्भ-निशुम्भयोः॥८॥
न चेत् प्रीत्याद्य भवती मद्भर्तारमुपैष्यति।
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम्॥९॥

देव्युवाच ॥१०॥ (पत्र, पुष्प, शमीपत्र, दूर्वा, जल)

दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः।
बलान्नयसि मामेवं ततः किं ते करोम्यहम्॥११॥

ऋषिरुवाच ॥१२॥ (पत्र, पुष्प, फल, गुगुल)

(सूरमा, नीबू, गूगुल, बिजौरा)

इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः।
हुंकारेणैव तं भस्म सा चकाराम्बिका ततः॥१३॥

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका। (उड़द मसूर)
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः॥१४॥

ततो धुतसटः कोपात् कृत्वा नादं सुभैरवम्।
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः॥१५॥

कांश्चित् करप्रहारेण दैत्यानास्येन चापरान्।
आक्रम्य चाधरेणान्यान् स जघान महासुरान्॥१६॥

केषाञ्चित्पाटयामास नखैः कोष्ठानि केसरी। (केसर)
तथा तलप्रहारेण शिरांसि कृतवान् पृथक्॥१७॥

विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे। (केसर, राई)
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः॥१८॥

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना।
तेन केसरिणा देव्या वाहनेनातिकोपिना॥१९॥

(लौंग, इलायची, सुपारी, कमलगट्टा)

श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम्।
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः॥२०॥

चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः।
आज्ञापयामास च तौ चण्ड-मुण्डौ महासुरौ॥२१॥

हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ।
तत्र गच्छत गत्वा च सा समानीयतां लघु॥२२॥

केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि। (राई जटामासी)
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम्॥२३॥

(लौंग, कनेर, पुष्प, ईख)

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम्॥ ॐ ॥२४॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भ-निशुम्भ-सेनानीधूम्रलोचनवधो नाम षष्ठोऽध्यायः॥६॥

उवाच ४, श्लोकाः २०, एवम् २४, एवमादितः ४१२।

महाहुति–

पान के पत्ते पर सुपाड़ी, लौंग, इलायची, पूड़ी, हलुवा, खीर, कमलगट्टा, गुग्गुल, भोजपत्र, नारियल फल, नारंगी, कुष्माण्ड एवं शाकल्य लेकर स्रुवा सहित घी में भिगोकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजैभिर्व्वाजिनीवती। यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै शताक्ष्यै श्रीधूमाक्षीदेवतायै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा।

सप्तमोऽध्यायः (७)

ध्यानम्

ॐ ध्यायेयं रत्नपीठे शुककलपठितं शृण्वतीं श्यामलाङ्गीं
न्यस्तैकाङ्घ्रिं सरोजे शशिशकलधरां वल्लकीं वादयन्तीम्।
कह्लाराबद्धमालां नियमितविलसच्चोलिकां रक्तवस्त्रां
मातङ्गीं शङ्खपात्रां मधुर-मधु-मदां चित्रकोद्भासिभालाम्॥

'ॐ' ऋषिरुवाच ॥१॥ (पत्र, पुष्प, फल)

आज्ञप्तास्ते ततो दैत्याश्चण्ड-मुण्डपुरोगमाः।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः॥२॥

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम्।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने॥३॥
ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः॥४॥

(काला रंग, हल्दी, कस्तुरी)

ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति।
कोपेन चास्या वदनं मषीवर्णमभूत्तदा॥५॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद् द्रुतम्। (कालीमिर्च)
काली करालवदना विनिष्क्रान्तासिपाशिनी॥६॥
विचित्रखट्वाङ्गधरा नरमालाविभूषणा।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा॥७॥

(पान, रक्तचंदन, कुंकुम, केशर)

अतिविस्तारवदना जिह्वाललनभीषणा।
निमग्नारक्तनयना नादापूरितदिङ्मुखा॥८॥
सा वेगेनाभिपतिता घातयन्ती महासुरान्।
सैन्ये तत्र सुरारीणामभक्षयत् तद्बलम्॥९॥
पार्ष्णि-ग्राहाङ्कुशग्राहि-योध-घण्टा-समन्वितान्।
समादायैकहस्तेन मुखे चिक्षेप वारणान्॥१०॥
तथैव योधं तुरगै रथं सारथिना सह।
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम्॥११॥
एकं जग्राह केशेषु ग्रीवायामथ चापरम्। (चौराई सरसो)
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत्॥१२॥
तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि॥१३॥
बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम्। (हल्दी, काली मिर्च)
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत् तथा॥१४॥

असिना निहताः केचित्केचित्खट्वाङ्गताडिताः। (गुग्गुल, वज्रदंती)
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा॥१५॥
क्षणेन तद्बलं सर्वमसुराणां निपातितम्।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम्॥१६॥
शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः॥१७॥
तानि चक्राण्यनेकानि विशमानानि तन्मुखम्।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम्॥१८॥
ततो जहासातिरुषा भीमं भैरवनादिनी। (कपूर, वज्रदंती)
कालीकरालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥१९॥
जटामासी, दर्भा, सरसो, कदलीफल, (केला)
उत्थाय च महासिंहं देवी चण्डमधावत।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत्॥२०॥
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम्।
तमप्यपातयद् भूमौ सा खड्गाभिहतं रुषा॥२१॥
हतशेषं ततःसैन्यं दृष्ट्वा चण्डं निपातितम्।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम्॥२२॥
शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च। (बिजौरी नींबू)
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम्॥२३॥
ईख का टुकड़ा, कुष्माण्ड खण्ड)
मया तवात्रोपहृतौ चण्ड-मुण्डौ महापशू।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि॥२४॥

ऋषिरुवाच॥२५॥ (पुष्प, पत्र, फल)

पान, जायफल (२ नग) कमलगट्टा)
तावानीतौ ततो दृष्ट्वा चण्ड-मुण्डौ महासुरौ।
उवाच कालीं कल्याणी ललितं चण्डिका वचः॥२६॥

पान, पुष्प, फल, आम्रफल, चिरौंजी)

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि॥ॐ॥२७॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥७॥

उवाच २, श्लोकाः २५, एवम् २७, एवमादितः ॥४३९॥

महाहुति–

पान के पत्ते पर पूड़ी, हलुवा, खीर, पान, लौंग, इलायची, सुपाड़ी, कमलगट्टा, कुष्माण्ड का टुकड़ा, जायफल, कर्पूर, चिरौंजी एवं शाकल्य लेकर स्रुवा सहित घी में भिगोकर खड़े होकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती। यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सयुधायै सवाहनायै श्रीकर्पूर बीजाधिष्ठात्र्यै श्रीधूमाक्षी काली चामुण्डादेवता महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम्॥

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतांतरिक्षस्य हुविं रसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

अष्टमोऽध्यायः (८)

ध्यानम्

ॐ अरुणां करुणातरङ्गिताक्षीं
धृत-पाशाङ्कुश-बाण-चापहस्ताम्।
अणिमादिभिरावृतां मयूखै-
रहमित्येव विभावये भवानीम्॥

'ॐ' ऋषिरुवाच॥१॥ (पत्र, पुष्प फल)

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः॥२॥
ततः कोपपराधीनचेताः शुम्भः प्रतापवान्।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह॥३॥
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः॥४॥
कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै। (राई)
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया॥५॥
कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः। (राई)
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम॥६॥
इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः॥७॥

(दूर्वा, रक्त कनेर, गग्गुल)

आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम्।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम्॥८॥
ततः सिंहो महानादमतीव कृतवान् नृप।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत्॥९॥

(दूर्वा,गुग्गुल, हल्दी कारा रंग)

धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना॥१०॥

तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम्।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥११॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम्।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥१२॥
ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः। (पत्र,पुष्प,फल)
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१३॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम्। (गुंजा
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥१४॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः। (ब्राह्मी)
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते॥१५॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी। (जटामासी)
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा॥१६॥
कौमारी शक्तिहस्ता च मयूरवरवाहना। (मोरपंखी)
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी॥१७॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता। (विष्णुक्रान्ता
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१८॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः। (वज्रदन्दी पत्र, या समिधा)
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम्॥१९॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥२०॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता। (पुष्प, लौंग)
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा॥२१॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम्॥२२॥

ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी॥२३॥
सा चाह धूम्रजटिलमीशानमपराजिता।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः॥२४॥
ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः॥२५॥
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ॥२६॥
बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः॥२७॥
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम्। (जंटामासी, विजया)
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता॥२८॥
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः। (हल्दी)
अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता॥२९॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः।
ववर्षुरुद्धतामर्षास्तां देवीममरारयः॥३०॥
सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान्।
चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तैर्महेषुभिः॥३१॥
तस्याग्रतस्तथा काली शूलपातविदारितान्।
खट्वाङ्गपोथितांश्चारीन् कुर्वती व्यचरत्तदा॥३२॥
कमण्डलु-जलाक्षेप-हतवीर्यान् हतौजसः।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति॥३३॥
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी।
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना॥३४॥

ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः।
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः॥३५॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः॥३६॥
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान्।
नारसिंही चचाराजौ नादापूर्णदिगम्बरा॥३७॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः।
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा॥३८॥
इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान्। (सरसों)
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥३९॥
पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान्।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः॥४०॥
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः।
समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः॥४१॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत्॥४२॥
कुलिशेनाहतस्याशु बहु सुस्राव शोणितम्। (रक्तगुंजा)
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः॥४३॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः। (रक्तगुंजा)
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः॥४४॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः।
समं मातृभिरत्युग्र-शस्त्रपातातिभीषणम्॥४५॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः॥४६॥

वैष्णवी समरे चैनं चक्रेणाभि जघान ह।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम्॥४७॥
वैष्णवीचक्रभिन्नस्य रुधिरस्त्रावसम्भवैः।
सहस्त्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः॥४८॥
शक्त्या जघान कौमारी वाराही च तथासिना। (लाल चंदन)
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम्॥४९॥
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक्।
मातृः कोपसमाविष्टो रक्तबीजो महासुरः॥५०॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः॥५१॥
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत्।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम्॥५२॥
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु॥५३॥
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान्। (लाल चंदन, गुंजा)
रक्त बिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना॥५४॥
भक्षयन्ती चर रणे तदुत्पन्नान् महासुरान्। (लाल चंदन)
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति॥५५॥
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम्॥५६॥
मुखेन काली जगृहे रक्तबीजस्य शोणितम्। (लाल चंदन)
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम्॥५७॥
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि।
तस्याहतस्य देहात्तु बहु सुस्त्राव शोणितम्॥५८॥

यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति।
मुखे समुद्गता येऽस्या रक्तपातान् महासुराः॥५९॥
तांश्चखादाथ चामुण्डा पपौ तस्य च शोणितम्। (रक्तचंदन)
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः॥६०॥
जघान रक्तबीजं तं चामुण्डापीतशोणितम्। (रक्तचंदन)
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः॥६१॥
नीरक्तश्च महीपाल रक्तबीजो महासुरः। (बिजौरा नींबू)
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप॥६२॥
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः॥ॐ॥६३॥ (पुष्प)

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः॥८॥

उवाच १, अर्धश्लोकः १, श्लोकाः ६१, एवम् ६३, एवमादितः॥५०२॥

महाहुति–

पान के पत्ते पर पूड़ी, हलुवा, खीर, पान, लौंग, इलायची, सुपाड़ी, कमलगट्टा, कुष्माण्ड का टुकड़ा, जायफल, कर्पूर, चिरौंजी एवं शाकल्य लेकर स्रुवा सहित घी में भिगोकर खड़े होकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती। युज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै अष्टमातृका सहितायै रक्ताक्ष्यै देव्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा।

नवमोऽध्याय: (९)

ध्यानम्

ॐ बन्धूककाञ्चननिभं रुचिराक्षमालां
पाशाङ्कुशौ च वरदां निजबाहुदण्डैः।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्र-
मर्धाम्बिकेशमनिशं वपुराश्रयामि॥

'ॐ' राजोवाच ॥१॥ (पत्र, पुष्प, फल)

विचित्रमिदमाख्यातं भगवन् भवता मम। (बीजौरा नीबू)
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम्॥२॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः॥३॥

ऋषिरुवाच ॥४॥ (पत्र, पुष्प, फल)

चकार कोपमतुलं रक्तबीजे निपातिते।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे॥५॥
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन्।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया॥६॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः।
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः॥७॥
आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः।
निहन्तुं चण्डिकां कोपात् कृत्वा युद्धं तु मातृभिः॥८॥
ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः। (राई)
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः॥९॥
चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः।
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ॥१०॥
निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम्।
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम्॥११॥

ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम्।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम्॥१२॥
छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम्॥१३॥
कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः।
आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत्॥१४॥
आविध्याथ गदां सोऽपि चिक्षेप चण्डिकां प्रति।
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता॥१५॥
ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम्।
आहत्य देवी बाणौघैरपातयत भूतले॥१६॥
तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम्॥१७॥
स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः॥१८॥
तमायान्तं समालोक्य देवी शङ्खमवादयत्।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम्॥१९॥
पूरयामास ककुभो निजघण्टास्वनेन च। (केसर)
समस्तदैत्यसैन्यानां तेजोवधविधायिना॥२०॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः। (केला)
पूरयामास गगनं गां तथैव दिशो दश॥२१॥
ततः काली समुत्पत्य गगनं क्ष्मामताडयत्।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः॥२२॥
अट्टाट्टहासमशिवं शिवदूती चकार ह।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ॥२३॥
दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः॥२४॥

शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया॥२५॥
सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम्।
निर्घातनिःस्वनो घोरो जितवानवनीपते॥२६॥
शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान्।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः॥२७॥
ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम्।
स तदाभिहतो भूमौ मूर्च्छितो निपपात ह॥२८॥
ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः। (केसर)
आजघान शरैर्देवीं कालीं केसरिणं तथा॥२९॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः।
चक्रायुधेन दितिजश्छादयामास चण्डिकाम्॥३०॥
ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी। (दूर्वा कनेर)
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान्॥३१॥
ततो निशुम्भो वेगेन गदामादाय चण्डिकाम्।
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः॥३२॥
तस्यापतत एवाशु गदां चिच्छेद चण्डिका।
खड्गेन शितधारेण स च शूलं समाददे॥३३॥
शूलहस्तं समायान्तं निशुम्भममरार्दनम्। (लौंग)
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका॥३४॥
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः। (बीजौरा नीबू)
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन्॥३५॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः। (गुग्गुल, इन्द्र जौ)
शिरश्चिच्छेद खड्गेन ततोऽसावपतद् भुवि॥३६॥

ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान्।
असुरांस्तांस्तथा काली शिवदूती तथापरान्॥३७॥
कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः। (मोरपंखी, ब्राह्मी)
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः॥३८॥
माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथाऽपरे।
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि॥३९॥
खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः।
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे॥४०॥
(उड़द, कूष्माण्ड, फलखण्ड इक्षुखण्ड,पान, सुपारी, बेलगिरी)
केचिद् विनेशुरसुराः केचिन्नष्टा महाहवात्।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः॥ॐ॥४१॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधो नाम नवमोऽध्यायः॥९॥
उवाच २, श्लोकाः ३९, एवम् ४१, एवमादितः॥५४३॥

महाहुति–

पान के पत्ते पर पूड़ी, हलुवा, खीर, पान, लौंग, इलायची, सुपाड़ी, कमलगट्टा, कुष्माण्ड का टुकड़ा, जायफल, कर्पूर, चिरौंजी एवं शाकल्य लेकर स्त्रुवा सहित घी में भिगोकर खड़े होकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती। यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै श्रीवाग्भव बीजाधिष्ठात्र्यै भगवती श्रीमहाकाल्यै तारादेव्यै नमः महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्त्रुवा से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम्॥

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतांतरिक्षस्य हविं रसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

दशमोऽध्यायः (१०)

ध्यानम्

'ॐ' उत्तप्तहेमरुचिरां रवि-चन्द्र-वह्नि-
नेत्रां धनुश्शरयुताङ्कुशपाशशूलम्।
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां
कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम्॥

'ॐ' ऋषिरुवाच ॥१॥ (पान, पुष्प, फल)

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम्। (केसर कस्तूरी)
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद् वचः॥२॥
बलावलेपाद् दुष्टे त्वं मा दुर्गे गर्वमावह।
अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी॥३॥

देव्युवाच ॥४॥ (पान, पुष्प, फल, दूर्वा, शमीपत्र)

एकैवाहं जगत्यत्र द्वितीया का ममापरा। (लाल चंदन)
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः॥५॥
ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखालयम्। (पान, पुष्प, फल)
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका॥६॥

देव्युवाच ॥७॥ (पुष्प)

(पान, पुष्प, फल, दूर्वा, शमीपत्र)

अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥८॥

ऋषिरुवाच ॥९॥ (पुष्प)

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः।
पश्यतां सर्वदेवानामसुराणां च दारुणम्॥१०॥
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः।
तयोर्युद्धमभूद् भूयः सर्वलोकभयङ्करम्॥११॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः॥१२॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः॥१३॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः॥१४॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे। (धनुष-बाण)
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम्॥१५॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत्।
अभ्यधावत् तदा देवीं दैत्यानामधिपेश्वरः॥१६॥
तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम्॥१७॥
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः॥१८॥
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः।
तथापि सोऽभ्यधावत् तां मुष्टिमुद्यम्य वेगवान्॥१९॥
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्॥२०॥
तलप्रहाराभिहतो निपपात महीतले।
स दैत्यराजः सहसा पुनरेव तथोत्थितः॥२१॥

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः।
तत्रापि सा निराधारा युयुधे तेन चण्डिका॥२२॥
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम्।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम्॥२३॥
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह।
उत्पात्य भ्रामयामास चिक्षेप धरणीतले॥२४॥
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया॥२५॥
तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि॥२६॥
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः। (केला)
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम्॥२७॥
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि। (भोजपत्र)
जगत्स्वास्थ्यमतीवाप निर्मलं चाऽभवन्नभः॥२८॥
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते॥२९॥
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः॥३०॥
अवादयंस्तथैवान्ये ननृतुश्चाऽप्सरोगणाः। (पुष्प)
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद् दिवाकरः॥३१॥
(कपूर, गुगुल, कमलगट्टा, वट पत्र, इन्द्र जौ)
जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः॥ॐ॥३२॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥१०॥

उवाच ४, अर्धश्लोकः १, श्लोकाः २७, एवम् ३२, एवमादितः ॥५७५॥

महाहुति (विशेषाहुति)–

स्रुवा में घी भरे उस पर पान के पत्ते पर पूड़ी, हलुवा, खीर, पान, लौंग, इलायची, सुपाड़ी, कस्तूरी, कमलगट्टा, गुग्गल, कुष्माण्ड का टुकड़ा, बिल्वपत्र पुष्प, फल एवं शाकल्य लेकर खड़े होकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवति। यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै सिंहवाहनायै शूलपाशधारिण्यै अम्बिका भैरवी देव्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा।

एकादशोऽध्यायः (११)

ध्यानम्

ॐ बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम्।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम्॥

'ॐ' ऋषिरुवाच ॥१॥ **(पत्र, पुष्प, फल)**

(२ से ३७ मन्त्र तक सभी मंत्रों पर पत्र, पुष्प, फल की आहुति दे)

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राः सुरा वह्निपुरोगमास्ताम्।
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्जविकाशिताशाः॥२॥

देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य॥३॥

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि।
अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये॥४॥
त्वं वैष्णवी शक्तिरनन्तवीर्या विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥५॥
विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पूरितमम्बयैतत् का ते स्तुतिः स्तव्यपराः परोक्तिः॥६॥
सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः॥७॥
सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते॥८॥
कलाकाष्ठादिरूपेण परिणामप्रदायिनी !।
विश्वस्योपरतौ शक्ते नारायणि! नमोऽस्तु ते॥९॥
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके।
शरण्ये त्र्यम्बके गौरि नारायणि! नमोऽस्तु ते॥१०॥
सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते॥११॥
शरणागत-दीनार्त-परित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥१२॥
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते॥१३॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनी।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते॥१४॥
मयूर - कुक्कुटवृते महाशक्तिधरेऽनघे।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते॥१५॥

शङ्ख-चक्र-गदा-शार्ङ्ग-गृहीत-परमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते॥१६॥
गृहीतोग्र - महाचक्रे दंष्ट्रोद्धृतवसुन्धरे।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते॥१७॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते॥१८॥
किरीटिनि महावज्रे सहस्त्रनयनोज्ज्वले।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते॥१९॥
शिवदूती - स्वरूपेण हतदैत्यमहाबले!।
घोररूपे महारावे नारायणि नमोऽस्तु ते॥२०॥
दंष्ट्राकरालवदने शिरोमालाविभूषणे।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते॥२१॥
लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते॥२२॥
मेधे सरस्वति वरे भूति बाभ्रवि तामसि।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते॥२३॥
सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥२४॥
एतत् ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते॥२५॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते॥२६॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव॥२७॥

असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्॥२८॥
रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान्।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति॥२९॥
एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम्।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या॥३०॥
विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च कात्वदन्या।
ममत्वगर्तेऽतिमहान्धकारे विभ्रामयत्येतदतीव विश्वम्॥३१॥
रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र।
दावानला यत्र तथाऽब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम्॥३२॥
विश्वेश्वरि त्वं परिपासि विश्वम्
विश्वात्मिका धारयसीति विश्वम्।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः॥३३॥
देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथासुरवधादधुनैव सद्यः।
पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान्॥३४॥
प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव॥३५॥

देव्युवाच ॥३६॥

वरदाहं सुरगणा वरं यन्मनसेच्छथ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम्॥३७॥

देवा ऊचुः ॥३८॥ (पान, पुष्प, फल)

(सरसों, कालीमिर्च, दालचीनी)

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्॥३९॥

देव्युवाच ॥४०॥ (दूर्वा, पान, शमीपत्र)

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे। (सरसों)
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥४१॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा। (मक्खन)
ततस्तौ नाशयिष्यामि विन्ध्याचल निवासिनी॥४२॥
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले। (जायफल)
अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान्॥४३॥
भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान्। (दाडिन केफूल)
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः॥४४॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः। (अनार, मजीठ)
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम्॥४५॥

पुष्प, पान, फल, नारंगी)

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा॥४६॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन्। इलायची कमलगट्टा)
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः॥४७॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः॥४८॥

(पत्र, पुष्प, फल, हरी सब्जी)

शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्॥४९॥

(दूर्वांकुर, लाल कनेर, फल, पान)

दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले॥५०॥
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात्।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः॥५१॥
(रक्त गुंजा, पान, पुष्प, फल)

भीमा देवीति विख्यातं तन्मे नाम भविष्यति।
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति॥५२॥
तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम्। (लाल कनेर)
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्॥५३॥
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः।(पुष्प, फल, पान)
इत्थं यदा यदा बाधा दानवोत्था भविष्यति॥५४॥
(काली मिर्च, सरसों, गूगल)
तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम्॥ॐ॥५५॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये देव्याः स्तुतिर्नामैकादशोऽध्यायः ॥११॥
उवाच ४, अर्धश्लोकः १, श्लोकाः ५०, एवम् ५५, एवमादितः ॥६३०॥

महाहुति–

पान के पत्ते पर पूड़ी, हलुवा, खीर, पान, लौंग, इलायची, सुपाड़ी, कमलगट्टा, कुष्माण्ड का टुकड़ा, जायफल, कर्पूर, चिरौंजी एवं शाकल्य लेकर स्रुवा सहित घी में भिगोकर खड़े होकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती।
यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सायुधायै सवाहनायै सशक्तिकायै सर्वनारायण्यै शक्त्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम्॥

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतांतरिक्षस्य हविं रसि स्वाहा। दिशः प्रदिशऽआहिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

द्वादशोऽध्यायः (१२)

ध्यानम्

ॐ विद्युद्दाम-समप्रभां मृगपतिस्कन्धस्थितां भीषणाम्
कन्याभिः करवाल-खेट-विलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्र-गदासि-खेट-विशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे॥

'ॐ' देव्युवाच ॥१॥ (पान, शमीपत्र, पुष्प,फल)

(गूगल, दूर्वा, हल्दी, नागकेसर)

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः।
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम्॥२॥
मधु-कैटभनाशं च महिषासुरघातनम्। (दर्भा)
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भ-निशुम्भयोः॥३॥
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः। (भोजपत्र)
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम्॥४॥
न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः। (गूगल, मिश्री)
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम्॥५॥

शत्रुतो न भयं तस्य दस्युतो वा न राजतः।(हल्दी, दूर्वा)
न शस्त्रानलतोयौघात् कदाचित् सम्भविष्यति॥६॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत्॥७॥
उपसर्गानशेषांस्तु महामारीसमुद्भवान्।(गूगल, मिश्री)
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम॥८॥

(गूगल, पान, पुष्प, मिश्री, इलायची, मधु)

यत्रैतत् पठ्यते सम्यङ्नित्यमायतने मम।
सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम्॥९॥
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे।(इक्षुखण्ड, कुष्माण्ड)
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च॥१०॥

(कदली फल, इक्षुखण्ड, कुष्माण्ड खण्ड)

जानताऽजानता वापि बलिपूजां तथा कृताम्।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम्॥११॥
शरत्काले महापूजा क्रियते या च वार्षिकी। (पान, पुष्प,फल, मिस्त्री)
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्ति समन्वितः॥१२॥
सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः।(पान, पुष्प, फल, मिश्री)
मनुष्यो मत्प्रसादेन भविष्यति न संशयः॥१३॥
श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः।(दूर्वा)
पराक्रमं च युद्धेषु जायते निर्भयः पुमान्॥१४॥
रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते।(दर्भा गूगल)
नन्दते च कुलं पुंसां माहात्म्यं मम शृण्वताम्॥१५॥
शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने।
ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम॥१६॥

(अर्क, पलाश, शमीपत्र, भोजपत्र)

उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः।
दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते॥१७॥

(राई, गूगल, धूप, पान, पुष्प फल)

बालग्रहाभिभूतानां बालानां शान्तिकारकम्।
संघातभेदे च नृणां मैत्रीकरणमुत्तमम्॥१८॥
दुर्वृत्तानामशेषाणां बलहानिकरं परम्।
रक्षो-भूत-पिशाचानां पठनादेव नाशनम्॥१९॥
सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम्।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः॥२०॥

(पान, पुष्प, फल, धूप, केसर, मिश्री, कपूर, बिजौरा नीबू, पक्वान्न)

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम्।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या॥२१॥
प्रीतिर्मे क्रियते सास्मिन् सकृत्सुचरिते श्रुते। (पायस, पक्वान्न)
श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति॥२२॥

(पान, पुष्प, फल, जायफल)

रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्॥२३॥
तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः॥२४॥

(दर्भा, पुष्प, भोजपत्र)

ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम्।
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः॥२५॥
दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः।
सिंह-व्याघ्रानुयातो वा वने वा वनहस्तिभिः॥२६॥
राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे॥२७॥

पतस्तु चापि शस्त्रेषु संग्रामे भृशदारुणे।
सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा॥२८॥
स्मरन् ममैतच्चरितं नरो मुच्येत सङ्कटात्। (हलताल, गूगल, पुष्प
मम प्रभावात् सिंहाद्या दस्यवो वैरिणस्तथा॥२९॥
दूरादेव पलायन्ते स्मरतश्चरितं मम॥३०॥

ऋषिरुवाच ॥३१॥ (पान, पुष्प, फल)

(वच, पान, पुष्प)

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा॥३२॥
पश्यतामेव देवानां तत्रैवाऽन्तरधीयत। (सर्वौषधी)
तेऽपि देवा निरातङ्काः स्वाधिकारान् यथा पुरा॥३३॥
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः।
दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि॥३४॥
जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे।
निशुम्भे च महावीर्ये शेषाः पातालमाययुः॥३५॥
एवं भगवती देवी सा नित्यापि पुनः पुनः। (पान,पुष्प,फल)
सम्भूय कुरुते भूप जगतः परिपालनम्॥३६॥
तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते। (इलायची, मिश्री)
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति॥३७॥
व्याप्तं तयैतत् सकलं ब्रह्माण्डं मनुजेश्वर।
महाकाल्या महाकाले महामारीस्वरूपया॥३८॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा। (अनार के छिलके)
स्थितिं करोति भूतानां सैव काले सनातनी॥३९॥
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे।
सैवाभावे तथाऽलक्ष्मीर्विनाशायोपजायते॥४०॥

(गंध, पुष्प, पान, फल, मिश्री, जायफल, चंदन, धूप)

स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिस्तथा।
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम्॥ ॐ॥४१॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये फलस्तुतिर्नाम द्वादशोऽध्याय: ॥१२॥

उवाच २, अर्धश्लोकौ २, श्लोका: ३७, एवम् ४१, एवमादित: ॥६७१।

महाहुति (विशेषाहुति)–

पान के पत्ते पर पूड़ी, हलुवा, खीर, लौंग, इलायची, सुपाड़ी, कमलगट्टा, केसर, कस्तूरी, बिल्वपत्र, पुष्प, मिश्री, अगर एवं शाकल्य लेकर स्रुवा में घीर भरकर सामग्री सहित खड़े होकर आहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवर्ति।
यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै श्रीबालात्रिपुरसुन्दर्यै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ समानाय स्वाहा, ॐ उदानाय स्वाहा।

●

त्रयोदशोऽध्याय: (१३)

ध्यानम्

ॐ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम्।
पाशा-ङ्कुश-वरा-भीतीर्धारयन्तीं शिवां भजे॥

'ॐ' ऋषिरुवाच ॥१॥ (पत्र, पुष्प, फल)

एतत् ते कथितं भूप देवीमाहात्म्यमुत्तमम्।
एवं प्रभावा सा देवी ययेदं धार्यते जगत्॥२॥

विद्या तथैव क्रियते भगवद्विष्णुमायया। (विष्णुक्रान्ता)
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥३॥
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे। (इलायची)
तामुपैहि महाराज शरणं परमेश्वरीम् ॥४॥
(पान, पत्र, पुष्प, फल)
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥५॥

मार्कण्डेय उवाच ॥६॥ (पान, पत्र, पुष्प, फल)

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥७॥
प्रणिपत्य महाभागं तमृषिं शंसितव्रतम्।
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥८॥
जगाम सद्यस्तपसे स च वैश्यो महामुने। (पुष्प, भोजपत्र)
संदर्शनार्थमम्बाया नदीपुलिनसंस्थितः ॥९॥
(पान, पुष्प, गंध, धूप, फल)
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन्।
तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥१०॥
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः। (ईक्षुखण्ड)
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥११॥
(पान, पुष्प, फल, दूर्वा, शमीपत्र)
ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम्।
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥१२॥
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥१३॥

देव्युवाच ॥१४॥ (पान, पुष्प, फल, नारिकेल खण्ड)

(पान, पुष्प, फल)
यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ॥१५॥

मार्कण्डेय उवाच ॥१६॥ (गूगल, काली मिर्च, अशोक पत्र)

ततो वव्रे नृपो राज्यमविभ्रंशयन्यजन्मनि।
अत्रैव च निजं राज्यं हतशत्रुबलं बलात्॥१७॥

(पान, पुष्प, दूर्वा, कनेर पुष्प, शमीपत्र)

सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम्॥१८॥

देव्युवाच ॥१९॥ (कमल पुष्प, अशोक पुष्प या पत्र)

(सरसो, गूगल)

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान्॥२०॥
हत्वा रिपूनस्खलितं तव तत्र भविष्यति॥२१॥

(अर्क (मदार) कपूर)

मृतश्च भूयः सम्प्राप्य जन्म देवाद् विवस्वतः॥२२॥

(पुष्प फल)

सावर्णिको नाम मनुर्भवान् भुवि भविष्यति॥२३॥

(भोजपत्र)

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः॥२४॥

(पुष्प, फल, पान)

तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति॥२५॥

मार्कण्डेय उवाच ॥२६॥

इति दत्वा तयोर्देवी यथाभिलषितं वरम्॥२७॥
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता।
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः॥२८॥

(अर्क, कपूर, गंध, फल, पान, सुपाड़ी)

सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥२९॥

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः॥ क्लीं ॐ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये सुरथ-वैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्याय: ॥१३॥

महाहुति–

पान के पत्ते पर पूड़ी, हलुवा, खीर, लौंग, इलायची, सुपाड़ी, कमलगट्टा, गूगल, फल, शमीपत्र, केसर, कपूरअर्क पुष्प नारिकेल खण्ड, बिल्वपत्र एवं शाकल्य सहित स्रुवा में घी भरकर खड़े होकर महाहुति देवे।

मन्त्र– ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम्॥

ॐ पावका नः सरस्वती व्वाजेभिर्व्वाजिनीवती। यज्ञं व्वष्टु धियावसुः॥

ॐ साङ्गायै सपरिवारायै, सवाहनायै सशक्तिकायै श्रीमहात्रिपुरसुन्दर्यै श्रीविद्यायै महाहुतिं समर्पयामि नमः स्वाहा।

पाँच बार स्रुवा से घी की आहुति देवे।

ॐ अम्बे ऽअम्बिके ऽम्बालिके न मा नयति कश्चन ससस्त्यश्वकः सुभद्रिद काङ्काम्पील वासिनीम्॥

ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥

ॐ अम्बायै स्वाहा। ॐ अम्बिकायै स्वाहा,
ॐ अम्बालिकायै स्वाहा।

●

उत्तरन्यासः

करन्यासः

ॐ ह्रीं अङ्गुष्ठाभ्यां नमः। ॐ चं तर्जनीभ्यां नमः। ॐ डिं मध्यमाभ्यां नमः। ॐ कां अनामिकाभ्यां नमः। ॐ यैं कनिष्ठिकाभ्यां नमः। ॐ ह्रीं चण्डिकायै करतरकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः

ॐखड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा।। हृदयाय नमः।

ॐशूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च।।शिरसे स्वाहा।

ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि।। शिखायै वषट्।

ॐसौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्।। कवचाय हुम्।

ॐखड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः।। नेत्रत्रयाय वौषट्।

ॐसर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते।। अस्त्राय फट्।

ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे।।

तन्त्रोक्तं देवी-सूक्तम्

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥१॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः॥२॥
कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥३॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः॥४॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः॥५॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥७॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥८॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥९॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१०॥
या देवी सर्वभूतेषुच्छायारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥११॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१२॥

या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥
या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥
या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥

या देवी सर्वभूतेषु मातृरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥
इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या।
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ॥२७॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥

स्तुता सुरैः पूर्वमभीष्ट-संश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥२९॥
या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्ति-विनम्र-मूर्तिभिः ॥३०॥

इति तन्त्रोक्तं देवीसूक्तं समाप्तम्।

नवार्णमन्त्र-जपः

ततो देवीसूक्तस्य पाठं कृत्वाऽष्टोत्तरशतसंख्याकं 'ॐऐं ह्रीं क्लीं चामुण्डायै विच्चे' इति नवार्णमन्त्रं जपेत्। तत्पश्चात्—

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि॥

इति पठित्वा, देव्या वामहस्ते जपं निवेदयेत्। ततः सप्तशती-रहस्यत्रयं पठेत्।

प्राधानिकं रहस्यम्

विनियोग:—ॐ अस्य श्रीसप्तशतीरहस्यत्रयस्य नारायण ऋषिरनुष्टुप्-छन्दः, महाकाली-महालक्ष्मी-महासरस्वत्यो देवता, यथोक्तफलावाप्त्यर्थं जपे विनियोगः ।

राजोवाच

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि॥१॥
आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज।
विधिना ब्रूहि सकलं यथावत् प्रणतस्य मे॥२॥

ऋषिरुवाच

इदं रहस्यं परममनाख्येयं प्रचक्षते।
भक्तोऽसीति न मे किञ्चित् तवावाच्यं नराधिप॥३॥
सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी।
लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता॥४॥
मातुलुङ्गं गदां खेटं पानपात्रं च बिभ्रती।
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि॥५॥
तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा।
शून्यं तदखिलं स्वेन पूरयामास तेजसा॥६॥
शून्य तदखिलं लोकं विलोक्य परमेश्वरी।
बभार परमं रूपं तमसा केवलेन हि॥७॥
सा भिन्नाञ्जनसंकाशा दंष्ट्राङ्कितवरानना।
विशाललोचना नारी बभूव तनुमध्यमा॥८॥
खड्गपात्रशिरः खेटैरलङ्कृतचतुर्भुजा।
कबन्धहारं शिरसा बिभ्राणां हि शिरःस्रजम्॥९॥
सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा।
नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः॥१०॥

तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम्।
ददामि तव नामानि यानि कर्माणि तानि ते॥११॥
महामाया महाकाली महामारी क्षुधा तृषा।
निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया॥१२॥
इमानि तव नामानि प्रतिपाद्यानि कर्मभिः।
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम्॥१३॥
तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप।
सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ॥१४॥
अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी।
सा बभूव वरा नारी नामान्यस्यै च सा ददौ॥१५॥
महाविद्या महावाणी भारती वाक् सरस्वती।
आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी॥१६॥
अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम्।
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः॥१७॥
इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम्।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ॥१८॥
ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नरम्।
श्रीः पद्मे कमले लक्ष्मीत्याह माता च तां स्त्रियम्॥१९॥
महाकाली भारती च मिथुने सृजतः सह।
एतयोरपि रूपाणि नामानि च वदामि ते॥२०॥
नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम्।
जनयामास पुरुषं महाकाली सितां स्त्रियम्॥२१॥
स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः।
त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा॥२२॥

सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप।
जनयामास नामानि तयोरपि वदामि ते॥२३॥
विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः।
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा॥२४॥
एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे।
चक्षुष्मन्तो नु पश्यन्ति नेतरेऽतद्विदो जनाः॥२५॥
ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम्।
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम्॥२६॥
स्वरया सह सम्भूय विरिञ्चोऽण्डमजीजनत्।
विभेद भगवान् रुद्रस्तद् गौर्या सह वीर्यवान्॥२७॥
अण्डमध्ये प्रधानादि कार्यजातमभून्नृप।
महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम्॥२८॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः।
संजहार जगत्सर्वं सह गौर्या महेश्वरः॥२९॥
महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी।
निराकारा च साकारा सैव नानाभिधानभृत्॥३०॥
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित्॥ॐ॥३१॥

इति प्राधानिकं रहस्यं समाप्तम्।

वैकृतिकं रहस्यम्

ऋषिरुवाच

ॐ त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते॥१॥
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा।
मधु-कैटभनाशार्थं यां तुष्टावाम्बुजासनः॥२॥

दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा।
विशालया राजमाना त्रिंशल्लोचनमालया॥३॥
स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप।
रूप-सौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः॥४॥
खड्गबाणगदाशूलचक्रशङ्खभुशुण्डिभृत् ।
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ॥५॥
एषा सा वैष्णवी माया महाकाली दुरत्यया।
आराधिता वशीकुर्यात् पूजाकर्तुश्चराचरम्॥६॥
सर्वदेवशरीरेभ्यो याऽऽविर्भूतामितप्रभा।
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी॥७॥
श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला।
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा॥८॥
सुचित्रजघना चित्र-माल्याम्बर-विभूषणा।
चित्रानुलेपना कान्ति-रूप-सौभाग्यशालिनी॥९॥
अष्टादशभुजा पूज्या सा सहस्रभुजा सती।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात्॥१०॥
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा।
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः॥११॥
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः।
अलङ्कृत-भुजामेभिरायुधैः कमलासनाम्॥१२॥
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप।
पूजयेत् सर्वलोकानां स देवानां प्रभुर्भवेत्॥१३॥
गौरीदेहात् समुद्भूता या सत्त्वैकगुणाश्रया।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी॥१४॥

दधौ चाष्टभुजा बाण-मुसले शूल-चक्रभृत्।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप॥१५॥
एषा सम्पूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति।
निशुम्भमथिनी देवी शुम्भासुरनिबर्हिणी॥१६॥
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव।
उपासनं जगन्मातुः पृथगासां निशामय॥१७॥
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती।
दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम्॥१८॥
विरञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे।
वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम्॥१९॥
अष्टादशभुजा मध्ये वामे चास्या दशानना।
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत्॥२०॥
अष्टादशभुजा चैषा यदा पूज्या नराधिप।
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा॥२१॥
काल-मृत्यू च सम्पूज्यौ सर्वारिष्टप्रशान्तये।
यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी॥२२॥
नवास्याः शक्तयः पूज्यास्तदा रुद्र-विनायकौ।
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत्॥२३॥
अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः।
अष्टादशभुजा चैषा पूज्या महिषमर्दिनी॥२४॥
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती।
ईश्वरी पुण्य-पापानां सर्वलोकमहेश्वरी॥२५॥
महिषान्तकरी येन पूजिता स जगत्प्रभुः।
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम्॥२६॥

अर्घ्यादिभिरलङ्कारैर्गन्ध-पुष्पैस्तथाऽक्षतैः ।
धूपैर्दीपैश्च नैवेद्यैर्नाना-भक्ष्य-समन्वितैः ॥२७॥
रुधिराक्तेन बलिना मांसेन सुरया नृप।
(बलि-मांसादि-पूजेयं विप्रवर्ज्या मयेरिता॥
तेषां किल सुरामांसैर्नोक्ता पूजा नृप क्वचित्।)
प्रणामा-ऽचमनीयेन चन्दनेन सुगन्धिना॥२८॥
सकर्पूरैश्च ताम्बूलैर्भक्ति-भाव-समन्वितैः।
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम्॥२९॥
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया।
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम्॥३०॥
वाहनं पूजयेद् देव्या धृतं येन चराऽचरम्।
कुर्याच्च स्तवनं धीमांस्तस्या एकाग्रमानसः॥३१॥
ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः।
एकेन वा मध्यमेन नैकेनेतरयोरिह॥३२॥
चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात्।
प्रदक्षिणा-नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः॥३३॥
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः।
प्रतिश्लोकं च जुहुयात् पायसं तिल-सर्पिषा॥३४॥
जुहुयात् स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः।
भूयो नामपदैर्देवीं पूजयेत् सुसमाहितः॥३५॥
प्रयतः प्राञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि।
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत्॥३६॥

एवं यः पूजयेद् भक्त्या प्रत्यहं परमेश्वरीम्।
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात्॥३७॥
यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम्।
भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्वरी॥३८॥
तस्मात् पूजय भूपाल सर्वलोकमहेश्वरीम्।
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि॥३९॥

इति वैकृतिकं रहस्यं सम्पूर्णम्।

मूर्ति-रहस्यम्

ऋषिरुवाच

ॐ नन्दा भगवती नाम या भविष्यति नन्दजा।
स्तुता या पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम्॥१॥
कनकोत्तमकान्तिः या सुकान्ति-कनकाम्बरा।
देवी कनकवर्णाभा कनकोत्तमभूषणा॥२॥
कमलाङ्कुश-पाशाब्जैरलङ्कृत-चतुर्भुजा।
इन्दिरा कमला लक्ष्मीः सा श्रीरुक्माम्बुजासना॥३॥
या रक्तदन्तिका नाम देवी प्रोक्ता मयानघ।
तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम्॥४॥
रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा।
रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा॥५॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदन्तिका।
पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम्॥६॥
वसुधेव विशाला सा सुमेरुयुगलस्तनी।
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ॥७॥

कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी।
भक्तान् सम्पाययेद् देवी सर्वकामदुघौ स्तनौ॥८॥
खड्गं पात्रं च मुसलं लाङ्गलं च बिभर्ति सा।
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च॥९॥
अनया व्याप्तमखिलं जगत्स्थावर-जङ्गमम्।
इमां यः पूजयेद् भक्त्या स व्याप्नोति चराचरम्॥१०॥
(भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात्।)
अधीते य इमं नित्यं रक्तदन्त्या वपुःस्तवम्।
तं सा परिचरेद् देवी पतिं प्रियमिवाङ्गना॥११॥
शाकम्भरी नीलवर्णा नीलोत्पलविलोचना।
गम्भीर-नाभिस्त्रिवली-विभूषित-तनूदरी ॥१२॥
सुकर्कश-समोत्तुङ्ग-वृत्त-पीन-घनस्तनी ।
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया॥१३॥
पुष्प-पल्लव-मूलादि-फलाढ्यं शाकसञ्चयम्।
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युभयापहम्॥१४॥
कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता॥१५॥
विशोका दुष्टदमनी शमनी दुरितापदाम्।
उमा गौरी सती चण्डी कालिका सा च पार्वती॥१६॥
शाकम्भरीं स्तुवन् ध्यायन् जपन् सम्पूज्यन् नमन्।
अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम्॥१७॥
भीमाऽपि नीलवर्णा सा दंष्ट्रादशनभासुरा।
विशाललोचना नारी वृत्तपीनपयोधरा॥१८॥

चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता॥१९॥
तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत्।
चित्रानुलेपना देवी चित्राभरणभूषिता॥२०॥
चित्रभ्रमरपाणिः सा महामारीति गीयते।
इत्येता मूर्तयो देव्या याः ख्याता वसुधाधिप॥२१॥
जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः।
इदं रहस्यं परमं न वाच्यं कस्यचित् त्वया॥२२॥
व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकम्।
तस्मात् सर्वप्रयत्नेन देवीं जप निरन्तरम्॥२३॥
सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ।
पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्बिषैः॥२४॥
देव्या ध्यानं मयाख्यातं गुह्याद् गुह्यतरं महत्।
तस्मात् सर्वप्रयत्नेन सर्वकामफलप्रदम्॥२५॥
(एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि।
सर्वरूपमयी देवी सर्वं देवीमयं जगत्॥
अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम्।)

इति मूर्तिरहस्यं सम्पूर्णम्।

देव्यपराध-क्षमापन-स्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो,
न चाह्वानं ध्यानं तदपि च न जाने स्तुति-कथाः।
न जाने मुद्रास्ते तदपि च न जाने विलपनं,
परं जाने मातस्त्वदनुशरणं क्लेशहरणम्॥१॥

विधेरज्ञानेन द्रविण-विरहेणालसतया,
विधेयाऽशक्यत्वात्तव चरणयोर्या च्युतिरभूत्।
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥२॥
पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः,
परं तेषां मध्ये विरलतरलोऽहं तव सुतः।
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥३॥
जगन्मातर्मातस्तव चरण-सेवा न रचिता,
न वा दत्तं देवि! द्रविणमपि भूयस्तव मया।
तथाऽपि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे,
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति॥४॥
परित्यक्ता देवा विविध-विधि-सेवाकुलतया,
मया पञ्चाशीतेरधिकमपनीते तु वयसि।
इदानीं चेन्मातस्तव यदि कृपा नाऽपि भविता,
निरालम्बो लम्बोदर-जननि कं यामि शरणम्॥५॥
श्वपाको जल्पाको भवति मधुपाकोपमगिरा,
निरातङ्को रङ्को विहरति चिरं कोटि-कनकैः।
तवापर्णे कर्णे विशति मनुवर्णे फलमिदं,
जनःको जानीते जननि जपनीयं जपविधौ॥६॥
चिताभस्मालेपो गरलमशनं दिक्पटधरो,
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।
कपाली-भूतेशो भजति जगदीशैकपदवीं,
भवानि त्वत्पाणि-ग्रहण-परिपाटी-फलमिदम्॥७॥
न मोक्षस्याऽऽकांक्षा-भव-विभव-वाञ्छापि च न मे,
न विज्ञानापेक्षा शशिमुखि सुखेच्छाऽपि न पुनः।

अतस्त्वां संयाचे जननि जननं यातु मम वै,
मृडानी रुद्राणी शिव-शिव भवानीति जपतः ॥८॥
नाराधितासि विधिना विविधोपचारैः,
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे,
धत्से कृपामुचितमम्ब परं तवैव ॥९॥
आपत्सु मग्नः स्मरणं त्वदीयं करोमि दुर्गे करुणार्णवेशि।
नैतच्छठत्वं मम भावयेथाः क्षुधा-तृषार्ता जननीं स्मरन्ति ॥१०॥
जगदम्ब! विचित्रमत्र किं परिपूर्णा करुणाऽस्ति चेन्मयि।
अपराध-परम्परापरं न हि माता समुपेक्षते सुतम् ॥११॥
मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि।
एवं ज्ञात्वा महादेवि! यथायोग्यं तथा कुरु ॥१२॥

इस प्रकार देव्यपराधक्षमापन स्तोत्र समाप्त। ●

सिद्ध-कुञ्जिका-स्तोत्रम्

शिव उवाच

शृणु देवि! प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम्।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥१॥
न कवचं नाऽर्गलास्तोत्रं कीलकं न रहस्यकम्।
न सूक्तं नाऽपि ध्यानं च न न्यासो न च वाऽर्चनम् ॥२॥
कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत्।
अति गुह्यतरं देवि! देवानामपि दुर्लभम् ॥३॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति!।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम्।
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम् ॥४॥

मन्त्र—ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे। ॐ ग्लौं हुं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल प्रज्वल ऐं ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा॥

इति मन्त्रः।

नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि।
नमः कैटभहारिण्यै नमस्ते महिषार्दिनि॥१॥
नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि।
जाग्रतं हि महादेवि! जपं सिद्धं कुरुष्व मे॥२॥
ऐंकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका।
क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते॥३॥
चामुण्डा चण्डघाती च यैकारी वरदायिनी।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणी॥४॥
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी।
क्रां क्रीं क्रूं कालिका देवि! शां शीं शूं मे शुभं कुरु॥५॥
हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः॥६॥
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं।
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा॥७॥
पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा।
सां सीं सूं सप्तशती देव्या मन्त्रसिद्धिं कुरुष्व मे॥८॥
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति!॥९॥
यस्तु कुञ्जिकाया देवि! हीनां सप्तशतीं पठेत्।
न तस्य जायते सिद्धिररण्ये रोदनं यथा॥१०॥

इति रुद्रयामलस्थ-गौरीतन्त्रे शिव-पार्वती-संवादे कुञ्जिकास्तोत्रं सम्पूर्णम्।

●

देवताओं के यज्ञ विचार

रूद्रयाग

रूद्रयाग तीन प्रकार का होता है—रुद्र, महारुद्र और अतिरुद्र। रुद्रयाग ५,७ अथवा ९ दिन में होता है। महारुद्र याग ९ दिन में अथवा ११ दिन में होता है। अतिरूद्रयाग ९ दिन में अथवा ११ दिन में होता है। रूद्रयाग में १६ अथवा २१ विद्वान् होते हैं। महारूद्रयाग में ३१ अथवा ४१ विद्वान् होते हैं। अतिरूद्रयाग में ६१ अथवा ७१ विद्वान् होते हैं।

रूद्रयाग में उन्नीस हजार नव सौ इक्कीस (१९९२१) आहुति होती है। महारूद्र में दो लाख उन्नीस हजार एक सौ इकतीस (२१९१३१) आहुति होती है। अतिरूद्रयाग में चौबीस लाख दस हजार चार सौ इकतालिस (२४१०४४१) आहुति होती है।

लघु रूद्रयाग में हवन सामग्री ११ मन, महारूद्रयाग में २१ मन और अतिरूद्रयाग में ७० मन लगती है।

विष्णुयाग

विष्णुयाग तीन प्रकार का होता है—विष्णु, महाविष्णु और अतिविष्णु। विष्णुयाग ५, ७, ८ अथवा ९ दिन में होता है। महाविष्णुयाग ९ दिन में होता है। अतिविष्णुयाग ९ दिन में अथवा ११ दिन में होता है। विष्णुयाग में १६ अथवा २१ विद्वान् होते हैं। महाविष्णुयाग में ३१ अथवा ४१ विद्वान् होते हैं। अतिमहाविष्णुयाग में ६१ अथवा ७१ विद्वान् होते हैं।

विष्णुयाग में हवनसामग्री ११ मन, महाविष्णुयाग में २१ मन और अतिविष्णुयाग में ५५ मन लगती है।

अनन्तदेवकृत विष्णुयाग पद्धति के अनुसार विष्णुयाग में सोलह हजार (१६०००) आहुति होती है। महाविष्णुयाग में एक लाख साठ हजार (१,६००००) आहुति होती है। अतिविष्णुयाग में तीन लाख बीस हजार (३,२००००) आहुति होती है।

नागरकृत विष्णुयाग पद्धति के अनुसार विष्णुयाग में एक लाख साठ हजार (१६००००) आहुति होती है। महाविष्णुयाग में तीन लाख बीस हजार (३,२००००) आहुति होती है। अतिविष्णुयाग में चार लाख अस्सी हजार (४८०,०००) आहुति होती है।

आधुनिक विद्वानों की मुद्रित विष्णुयाग पद्धति के अनुसार विष्णुयाग में सोलह हजार (१६०००) आहुति होती है। महाविष्णुयाग में एक लाख साठ हजार (१६००००) आहुति होती है। अतिविष्णुयाग में तीन लाख बीस हजार (३२००००) आहुति होती है।

हरिहर महायज्ञ

हरिहर महायज्ञ में हरि (विष्णु) और हर (शिव) इन दोनों का यज्ञ होता है। प्रातःकाल विष्णुयज्ञ और मध्याह्न में रूद्रयज्ञ होता है। विष्णुयज्ञ में 'पुरुषसूक्त' से आहुति होती है और रूद्रयज्ञ में 'रूद्रसूक्त' से आहुति होती है। हरिहर महायज्ञ में १६ अथवा २१ विद्वान् होते हैं। हरिहर महायज्ञ में विष्णुयज्ञ और रूद्रयज्ञ की तरह आहुति की संख्या कही गयी है। हरिहर याग में हवन सामग्री २५ मन लगती है। यह महायज्ञ ९ दिन अथवा ११ दिन में होता है।

रामयज्ञ

रामयज्ञ विष्णुयाग की तरह होता है। इसमें पुरुषसूक्त से अथवा 'ॐ रामाय नमः' इस षडक्षर मन्त्र से आहुति होती है। प्रतिदिन अथवा पूर्णाहुति के दिन (रामसहस्रनामावली) से हवन करना चाहिये। रामयज्ञ में १६ अथवा २१ विद्वान् होते हैं। इसमें हवनसामग्री १५ मन लगती है। यह यज्ञ ८ दिन में होता है। रामयज्ञ में एक लाख (१०००००) अथवा एक लाख साठ हजार (१६००००) आहुति होती है।

शिवशक्ति महायज्ञ

शिवशक्ति महायज्ञ में शिव (रूद्रयज्ञ) और शक्ति (दुर्गा) इन दोनों का यज्ञ होता है। शिवयज्ञ प्रातःकाल और शक्तियज्ञ (दुर्गायज्ञ) मध्याह्न में होता है। शिवयज्ञ (रूद्रयज्ञ) में शुक्ल यजुर्वेद के पाँचवें सम्पूर्ण अध्याय से हवन होता है और शक्तियज्ञ (दुर्गायज्ञ) में सम्पूर्ण दुर्गा से हवन होता है।

शिवयज्ञ और शक्तियज्ञ इन दोनों यज्ञों की आहुति की संख्या एक लाख पचीस हजार (१२५०००) कही गयी है। इसमें हवन-सामग्री १५ मन लगती है। शिवशक्ति महायज्ञ में २१ हवन करने वाले विद्वान् होते हैं। यह महायज्ञ ९ दिन अथवा ११ दिन में सुसम्पन्न होता है।

गणेशयज्ञ

गणेशयज्ञ में शुक्ल यजुर्वेद के ३३वें अध्याय के ६५वें मन्त्र से (७२) मन्त्र तक आठ मन्त्रों से आहुति होती है। प्रतिदिन अथवा पूर्णाहुति के दिन 'गणेशसहस्रनाम' से हवन करना चाहिए। गणेशयज्ञ में एक लाख (१००००००) आहुति होती है। इसमें १६ अथवा २१ विद्वान् होते हैं। गणेशयज्ञ में हवन-सामग्री १२ मन लगती है। यह यज्ञ ८ दिन में होता है।

दुर्गायज्ञ

दुर्गायज्ञ में 'दुर्गासप्तशती' के द्वारा हवन होता है। प्रतिदिन अथवा पूर्णाहुति के दिन 'दुर्गासहस्रनामावली' (देवीसहस्रनामावली) से हवन करना चाहिए दुर्गायज्ञ में हवन करनेवाले ९ विद्वान् होते हैं। आचार्य, ब्रह्मा और द्वारपालादि सब मिलाकर १६ अथवा २१ विद्वान् होते हैं। यह यज्ञ ९ दिन में होता है। दुर्गायज्ञ में हवन-सामग्री २० मन अथवा १५ मन लगती है।

लक्ष्मीयज्ञ

लक्ष्मीयज्ञ में ऋक परिष्टोक्त 'श्रीसूक्त' से हवन होता है। प्रतिदिन अथवा यज्ञ की पूर्णाहुति के दिन 'लक्ष्मीसहस्रनामावली' से हवन करना चाहिए। लक्ष्मीयज्ञ में एक लक्ष (१००००००) आहुति होती है। इसमें हवन करनेवाले ११ अथवा १६ विद्वान् होते हैं। आचार्य और ब्रह्मा मिलाकर २१ विद्वान् होने चाहिए। यह यज्ञ ८ दिन में होता है। लक्ष्मीयज्ञ में हवन-सामग्री १५ मन लगती है।

लक्ष्मीनारायण महायज्ञ

लक्ष्मीनारायण महायज्ञ में लक्ष्मी और नारायण (विष्णु) इन दोनों का यज्ञ होता है। प्रात:काल लक्ष्मी का यज्ञ और मध्याह्न में नारायण (विष्णु) का यज्ञ होता है। लक्ष्मीयज्ञ में ऋग्वेदपरिशिष्टोक्त 'श्रीसूक्त' से हवन होता है और नारायण यज्ञ में पुरुषसूक्त (शुक्ल यजुर्वेद के ३१वें अध्याय के प्रारम्भ के १६ मन्त्र) से हवन होता है। लक्ष्मीयज्ञ और नारायण यज्ञ इन दोनों की आहुति संख्या एक लाख साठ हजार (१६००००) अथवा सवा लाख (१२५०००) कही गई है। इसमें ५० मन हवन-सामग्री लगती है। लक्ष्मीनारायण महायज्ञ में हवन करनेवाले ३१ विद्वान् होते हैं। यह महायज्ञ ८ दिन में अथवा ९ दिन में अथवा ११ दिन में सुसम्पन्न होता है।

तिलार्थं तण्डुलाः देयास्तण्डुलार्धं यवास्तथा।
यवार्धं शर्कराः प्रोक्ताः सर्वार्द्धं च घृतं स्मृतम्।।

(आनन्दरामायण)

तिल का आधा चावल और चावल काआधा जौ देना चाहिये। जौ से आधा शर्करा कही गई है और सबसे आधा घृत कहा गया है।

तिलार्थं तण्डुलाः प्रोक्तास्तण्डुलार्धं यवास्तथा।
तण्डुलैस्त्रिगुणं चाज्यं यथेष्ठं शर्करा मता।।

तिल के आधे चावल कहे गये हैं, चावलों के आधे जौ और चावलों से तिगुना घृत कहा गया है। शर्करा जितनी इच्छा हो उतनी कही गई है।

तिलास्तु द्विगुणाः प्रोक्ता यवेभ्यश्चैव सर्वदा।
अन्यं सौगन्धिकाः स्निग्धा गुग्गुलादि यवः समाः।।

यव की अपेक्षा तिल को द्विगुणित रखना चाहिए और अन्य सुगन्धित गुग्गुल इत्यादि द्रव्यों को यव के बराबर ही रखना चाहिये।

तिलार्थं तु यवाः प्रोक्ता यवार्धं तण्डुलाः स्मृताः।
तण्डुलार्धं शर्कराः प्रोक्ता आज्यभाग चतुष्टयम्।।

तिल का आधा यव, यव का आधा चावल, चावल की आधी चीनी और चतुर्गुण घृत से शाकल्य का निर्माण उत्तम कहा गया है।

तिलाधिक्ये भवेल्लक्ष्मीर्यवाधिक्ये दरिद्रता।
घृताधिक्ये भवेन्मुक्तिः सर्वसिद्धिस्तु शर्करा।।

तिल की अधिकता से लक्ष्मी की प्राप्ति होती है और यव की अधिकता से दरिद्रता की प्राप्ति होती है। घृत के अधिक से मुक्ति और शर्करा के आधिक्य से सर्वसिद्धि होती है।

उत्तम गोघृतं प्रोक्तं मध्यमं महिषीभवम्।
अधमं छागलीजातं तस्माद् गव्यं प्रशस्यते।।

गोघृत सर्वोत्तम, भैंस का घृत मध्यम और बकरी का घृत अधम कहा गया है, अतः इनमें गोघृत ही प्रशस्त है।

आहुति देने का विचार

प्रश्न- **अधोमुखः ऊर्ध्वपादः प्राङ्मुखो हव्यवाहनः।**
तिष्ठत्येव स्वभावेन आहुतिः कुत्र दीयते?॥

(कारिका)

'अग्नि (जो हवनीय द्रव्य चरू आदि को तत्तत् देवताओं को पहुँचाता है) स्वभावतः ही अधोमुख (नीचे की ओर मुखवाला) ऊर्ध्वपाद (ऊपर की ओर पैरवाला) रहता है, उसका मुँह पूर्वकी ओर रहता है, ऐसी स्थिति में आहुति कहां दी जाय?

उत्तर- **सपवित्राम्बुहस्तेन वह्नेः कुर्यात्प्रदक्षिणम्।**
हव्यवाट् सलिलं दृष्ट्वा विभेति सम्मुखो भवेत्॥

(कारिका)

हाथ में पवित्री और जल लेकर कर्ता अग्नि की प्रदक्षिणा करे। हव्यवाहन (अग्नि) जल को देखकर डर जाता है और सम्मुख (हवनकर्ता के सामने) हो जाता है। इसलिए सामने होम करना चाहिए।

हवनादि में हस्तस्तर का निषेध

उपस्थाने जपे होमे दोहे च यज्ञकर्मणि।
हस्त स्तरं न कुर्वीत शेषास्तु स्वरसंयुता॥

(क्षौतोल्लास)

उपस्थान में, जप में, गोदोहन (गोदोहन-कर्म श्रौतभाग में होता है) में और यज्ञकर्म में हस्तस्तर नहीं लगाना चाहिए। शेष कर्मों में स्तर लगाना चाहिये।

जपे होमे मखे श्राद्धेऽभिषेके पित्रकर्मणि।
हस्तस्वरं न कुर्वीत सन्ध्यादौ देवपूजने॥

(स्मार्तप्रभु)

जप में, होम, में, यज्ञ में, श्राद्ध में, अभिषेक में, पित्रकर्म में, सन्ध्या में तथा देवपूजन में हस्तस्वर नहीं लगाना चाहिये।

हवन मुद्रा के भेद

होमे मुद्राः स्मृतास्त्रिस्त्रो मृगी हंसी च सूकरी।
मुद्रां विना कृतो होमः सर्वो भवति निष्फलः।।

(परशुरामकारिका)

होम में मृगी, हंसी और सूकरी यह तीन प्रकार की मुद्रा कही गयी है। मुद्रा के बिना किया हुआ सब हवन निष्फल होता है।

कामनाभेद से मुद्रा का विधान

शान्तिके तु मृगी ज्ञेया हंसी पौष्टिककर्मणि।
सूकरी त्वभिचारे तु कार्या तन्त्रविदुत्तमैः।।

(परशुरामकारिका)

शान्ति-कर्म के मृगी-मुद्रा, पौष्टिक कर्म में हंसी और अभिचारात्मक (मारणात्मक) कर्म में सूकरी, मुद्रा से होम करना चाहिए, यही उत्तम तन्त्रशास्त्र के ज्ञाताओं के लिए उचित है।

यज्ञ के कलशों पर नारिकेल के स्थापन का क्रम

अधोमुखं विवर्धनाय
ऊर्ध्वस्य वक्त्रं बहुरोगवद्ध्यै।
प्राचीमुखं वित्तर्विनाशताय
तस्माच्छुभं सम्मुखनारिकेलम्।।

यदि नारिकेल (नारियल) अधोमुख रखा जाय, तो उससे शत्रुओं की वृद्धि होता है, यदि ऊपर को मुख करके रखा जाय तो उससे बहुत से रोगी की वृद्धि होती है तथा यदि पूर्व की ओर मुख करके रखा जाय तो उससे धन नाश होता है। इसलिये नारियल को सम्मुख रखना शुभ है।

ब्रह्मा आसन दक्षिण में क्यों?

उत्तरे सर्वत्रात्राणि उत्तरे सर्वदेवताः।
उत्तरेऽपां प्रणयनं किमर्थं ब्रह्म दक्षिणे।।

प्रश्न-उत्तर दिशा में समस्त देवता रहते हैं और उत्तर दिशा में जल का प्रणयन होता है, तो ब्रह्मा का आसन दक्षिण दिशा में किसलिये रखा जाता है।

यमो वैवस्वतो राजा वसते दक्षिणा दिशि।
तस्य संरक्षणार्थाय ब्रह्मा तिष्ठति दक्षिणे।।

उत्तर—दक्षिण दिशा में यम और वैवस्वत नामक राजा रहते हैं, अतः उनके रक्षार्थ ब्रह्मा दक्षिण दिशा में रहते हैं।

दक्षिणे दानवाः प्रोक्ताः पिशाचोरग राक्षसाः।
तेभ्यः संरक्षणार्थाय ब्रह्मा स्थाप्यस्तु दक्षिणे।।

(कारिका)

दक्षिण दिशा में समस्त दानव, पिशाच, नाग और राक्षसादि रहते हैं, अतः उनसे सुरक्षित रखने के लिये ही ब्रह्मा को दक्षिण दिशा में स्थापित करना चाहिये।

आशीर्वादेऽभिषेके च पादप्रक्षालने तथा।
शयने भोजने चैव पत्नि तूत्तरतो भवेत्।। (धर्मप्रवृत्ति)

ब्राह्मणो के द्वारा आशीर्वाद प्राप्त करने के समय अभिषेक के समय, ब्राह्मणों के पाद-प्रक्षालन के समय, शयन के समय और पति के साथ भोजन करते समय पत्नी को सर्वदा अपने पति से उत्तर अर्थात् वाम भाग में बैठना चाहिये।

यज्ञादि में प्रौढपाद बैठने का निषेध

स्नानं दानं जपं होमे भोजनं देवतार्चनम्।
पौढपादो न कुर्वीत स्वाधायां पितृतर्पणम्।।

(अत्रि संहिता ३१८)

स्नान, दान, जप, होम, भोजन, देवपूजन, वेद का स्वाध्याय और पित्र तर्पण में पौढपाद (जाँघपर पैर रखकर) होकर नहीं बैठना चाहिए।

दानमाचमनं होमं भोजनं देवतार्चनम्।
प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्।।

(शाट्यायनः)

दान, आचमन, होम, भोजन, देवपूजन, स्वाध्याय और पितृतर्पण में पौढपाद होकर नहीं बैठना चाहिए।

गुक्तां शुक्तिं हरेरर्चां शिवलिङ्गं शिवां तथा।
शङ्खं प्रदीपं मन्त्रं च माणिक्यं हीरकं तथा॥३९॥

(देवी. नवम स्कं. अ. ९)

यज्ञसूत्रं च पुष्पं च पुस्तकं तुलसीदलम्।
जपमालां पुष्पमालां कर्पूरं च सुवर्णकम्॥४०॥

किंतु हे भगवन्! आप यह सुन लीजिये कि मैं मोती, सीप, शालग्राम शिला, शिवलिंग, पार्वती विग्रह, शंख, दीप, मन्त्र, माणिक्य, हीरा, यज्ञोपवीत, पुष्प, पुस्तक, तुलसीदल, जपमाला, पुष्पमाला, कपूर, सुवर्ण,

गोरोचनं चन्दनं च शालग्राम जलं तथा।
एतान्वोढुमशक्ताहं क्लिष्टा च भगवच्छृणु॥४१॥

गोरोचन, चन्दन और शालग्राम का जल— इन वस्तुओं का वहन करने में सर्वथा असमर्थ हूँ, इससे मुझे क्लेश होता है।

विप्रपादोदके चैव शालग्रामोदके तथा।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः॥३६॥

(देवी.नवमस्कंध अ. ३४)

जो मनुष्य ब्राह्मण के चरणोदक तथा शालग्राम के जल में भेदबुद्धि करता है, वह ब्रह्महत्या के पाप का भागी होता है।

शिवनैवेद्यके चैव हरिनैवेद्यके तथा।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेतु सः॥३७॥

(देवी.नवमस्कंध अ. ३४)

जो मनुष्य शिव के नैवेद्य तथा भगवान् विष्णु के नैवेद्य में भेदबुद्धि रखता है, वह ब्रह्महत्या के पाप का भागी होता है।

कृष्णजन्माष्टमीं रामनवमीं च सुपुण्यदाम्।
शिवरात्रिं तथा चैकादशीं वारे खेस्तथा॥४६॥

(देवी.नवमस्कंध अ. ३४)

जो मनुष्य पुण्यदायिनी कृष्णजन्माष्टमी, रामनवमी, शिवरात्रि, एकादशी और रविवार—इन पाँच पर्वों के अवसर पर व्रत नहीं करते, वे चाण्डाल से भी बढ़कर पापी हैं और उन्हें ब्रह्महत्या का पाप लगता है।

न पाणिना न शूर्पेण न च मेध्याजिनादिभिः।
मुखेनोपधमेदग्निं मुखादेव व्यजायत।।५।।

(देवी.एकादश स्कंध अ. २२)

हाथ से, सूप से अथवा पवित्र मृगचर्म से धौंककर अग्नि को प्रज्वलित नहीं करना चाहिये, अपितु मुख से फूँककर अग्नि को प्रज्वलित करना चाहिये; क्योंकि अग्नि का प्राकट्य मुख से ही हुआ है।

पटकेन भवेद्याधिः शूर्पेण धननाशनम्।
पाणिना मृत्युमाप्नोति कर्मसिद्धिर्मुखेन तु।।७।।

(देवी.नवमस्कंध अ. २२)

कपड़े से हवा करने पर व्याधि, सूप से हवा करने पर धननाश तथा हाथ से हवा करने पर मृत्यु की प्राप्ति होती है। मुख से फूँककर आग प्रज्वलित करने से कार्य की सिद्धि होती है।

वायुं वायौ जयेद्विप्रः प्राणसंयमनत्रयात्।
ब्राह्मणः श्रुतिसम्पन्नः स्वधर्मनिरतः सदा।।२।।

(देवी.नवमस्कंध अ. ३)

श्रुति-सम्पन्न ब्राह्मण को सदा अपने धर्म का पालन करना चाहिए, उसे वैदिक मन्त्र का जपकरना चाहिये, लौकिक मन्त्र का जप कभी नहीं करना चाहिये।

दक्षिणेनोदकं पीत्वा वामेन संस्पृशेद् बुधः।
तावन्न शुध्यते तोयं यावद्वामेन न स्पृशेत्।।२५।।

(देवी.एकादश स्कंध अ. १६-२५)

बुद्धिमान् व्यक्ति को चाहिए की दाहिने हाथ से जल पीते समय बायें हाथ से उसे स्पर्श किये रहे; क्योंकि वह जल तब तक शुद्ध नहीं होता जब तक बायें हाथ का स्पर्श नहीं होता।

शिवाय शिवरातौ च विल्पपत्रं ददाति यः।
पत्रमानयुगं तत्र मोदते शिवमन्दिरे।।७२।।

(देवी.नवमस्कंध अ. ३०)

जो मनुष्य शिवरात्रि के दिन भगवान् शंकर को बिल्वपत्र अर्पण करता है, वह बिल्वपत्रों की जितनी संख्या है उतने वर्षों तक उस शिवलोक में आनन्द करता है।

षडङ्गन्यासाः

'मनोजूति'रिति मन्त्रस्य बृहस्पतिर्ऋषिः, बृहतीच्छन्दः, बृहस्पति-र्देवता, हृदयन्यासे विनियोगः।।

ॐ मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमं तनोत्त्वरिष्ट्टं य्यज्ञठं. समिमं दधातु। विश्वेदेवास ऽइह मादयन्तामो३ँ. प्रतिष्ठ्ठ।। ॐ हृदयाय नमः।।१।।

ॐ अबोध्द्यग्निः समिधा जनानां प्रतिधेनुमिवायतीमुषासम्। यह्वा ऽइव प्प्रवयामुज्जिहानाः प्प्रभानवः सिस्रते नाकमच्छ।। ॐ शिरसे स्वाहा।।२।।

ॐ मूर्द्धानं दिवो ऽअरतिं पृथिव्या व्वैश्श्वानरमृत ऽआजातमग्निम्। कविठं. सम्म्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः।। ॐ शिखायै वषट्।।३।।

ॐ मर्म्माणि ते व्वर्मणा च्छादयामि सोमस्त्वा राजामृते नानुवस्ताम्। उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु।। ॐ कवचाय हुम्।।४।।

ॐ व्विश्श्वतश्चक्षुरुत व्विश्श्वतोमुखो व्विश्श्वतोबाहुरुत व्विश्श्वतस्प्पात्। संबाहुब्भ्यां धमति सम्पतत्त्रैर्द्यावाभूमी जनयन्देव ऽएकः।। ॐ नेत्रत्रयाय वौषट्।।५।।

ॐ मा नस्तोके तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअश्वेषु रीरिषः। मा नो व्वीरान् रुद्द्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे।। ॐ अस्त्राय फट्।।६।।

इति षडङ्गन्यासाः ।

रुद्र-प्रार्थना

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।
करचरणकृतं वाक्-कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम्।
विहितमविहितं वा सर्वमेतत् क्षमस्व
जय जय करुणाब्धे! श्रीमहादेव! शम्भो!।।२।।
ॐ शुद्ध-स्फटिक-सङ्काशं त्रिनेत्रं पञ्चवक्त्रकम्।
गङ्गाधरं दशभुजं सर्वाभरणभूषितम्।।३।।
नीलग्रीवं शशाङ्काङ्कं नाग-यज्ञोपवीतिनम्।
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम्।।४।।
कमण्डल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम्।
ज्वलन्तं पिङ्गल-जटाजूटमुद्योतकारिणम्।।५।।
अमृतेनाऽऽप्लुप्तं हृष्टमुमादेहार्धधारिणम्।
दिव्यसिंहासनासीनं दीव्यभोगसमन्वितम्।।६।।
दिग्देवतासमायुक्तं सुराऽसुर-नमस्कृतम्।
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्।।७।।
सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणम्।
एवं ध्यात्वा द्विजः सम्यक् ततो यजनमारभेत्।।८।।

●

शुक्लयजुर्वेदीय-रुद्राष्टाध्यायी

प्रथमोऽध्यायः (१)

हरिः ॐ। गणानां त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वां निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्॥१॥ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा॥२॥ द्विपदा याश्चतुष्पदा-स्त्रिपदा याश्च षट्पदाः। विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा॥३॥ सहस्तोमाः सहछन्दस ऽआवृतः सहप्रमा ऽऋषयः सप्त दैव्याः। पूर्वेषां पन्थामनुदृश्य धीरा ऽअन्वालेभिरे रथ्यो न रश्मीन्॥४॥ ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव-सङ्कल्पमस्तु॥५॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥६॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योति-रन्तरमृतं प्रजासु। यस्मान्न ऽऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥७॥ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्। येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥८॥ यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः। यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥९॥ सुषारथिरश्वानिव

यन्मनुष्यान्नेनीयते ऽभीशुभिर्वाजिन ऽइव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥१०॥

द्वितीयोऽध्यायः (२)

हरिः ॐ। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥१॥ पुरुष ऽएवेदꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति॥२॥ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥३॥ त्रिपादूर्ध्व ऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ् व्यक्रामत्साशनानशने ऽअभि॥४॥ ततो विराडजायत विराजो ऽअधि पूरुषः। स जातो ऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः॥५॥ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये॥६॥ तस्माद्यज्ञात्सर्वहुत ऽऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥७॥ तस्मादश्वा ऽअजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता ऽअजावयः ॥८॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः। तेन देवा ऽअयजन्त साध्या ऽऋषयश्च ये॥९॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत्किं बाहू किमूरू पादा ऽउच्येते॥१०॥ ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। ऊरू तदस्य

यद्वैश्यः पद्भ्याᳬशूद्रो ऽअजायत॥११॥ चन्द्रमा मनसो जातश्चक्षोः सूर्य्यो ऽअजायत। श्रोत्राद्वायुश्च प्प्राणश्च्च मुखादग्निरजायत॥१२॥ नाभ्भ्या ऽआसीदन्तरिक्षᳬ शीर्ष्णो द्यौः समवर्त्तत। पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२॥ ऽअकल्प्पयन्॥१३॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। व्वसन्तोऽस्यासीदाज्ज्यं ग्रीष्म ऽइध्मः शरद्धविः॥१४॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना ऽअबध्नन्पुरुषं पशुम्॥१५॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः॥१६॥ अद्भ्यः सम्भृतः पृथिव्व्यै रसाच्च व्विश्वकर्म्मणः समवर्त्तताग्ग्रे। तस्य त्त्वष्टा व्विदधद्रूपमेति तन्मर्त्त्यस्य देवत्त्वमाजानमग्ग्रे॥१७॥ व्वेदाहमेतं पुरुषं महान्तमादित्त्यवर्ण्णं तमसः परस्तात्। तमेव व्विदित्त्वाति मृत्युमेति नाऽन्यः पन्था व्विद्यतेऽयनाय॥१८॥ प्प्रजापतिश्चरति गर्ब्भे ऽअन्तरजायमानो बहुधा व्विजायते। तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्त्थुर्भुवनानि व्विश्वा॥१९॥ यो देवेभ्य्य ऽआतपति यो देवानां पुरोहितः। पूर्व्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥२०॥ रुचं ब्राह्मं जनयन्तो देवा ऽअग्ग्रे तदब्ब्रुवन्। यस्त्वैवं ब्राह्मणो व्विद्यात्तस्य देवा ऽअसन्वशे ॥२१॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे

नक्षत्राणि रूपमश्श्विनौ व्यात्तम्। इष्णन्निषाणामुं म ऽइषाण सर्व्वलोकं म ऽइषाण॥२२॥

तृतीयोऽध्यायः (३)

हरिः ॐ। आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। सङ्क्रन्दनोनिमिष ऽएकवीरः शतꣳ सेना ऽअजयत्साकमिन्द्रः॥१॥ सङ्क्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तत्सहद्ध्वं युधो नर ऽइषुहस्तेन वृष्णा॥२॥ स ऽइषुहस्तैः स निषङ्गिभिर्व्वशी सꣳस्रष्टा स युध ऽइन्द्रो गणेन। सꣳसृष्टजित्सोमपा बाहुशर्द्ध्युग्रधन्वा प्प्रतिहिताभिरस्ता॥३॥ बृहस्प्पते परिदीया रथेन रक्षोहामित्राँ२॥ऽअपबाधमानः। प्प्रभञ्जन्त्सेनाः प्प्रमृणो युधा जयन्नस्म्माकमेद्ध्यविता रथानाम्॥४॥ बलविज्ञायस्थविरः प्प्रवीरः सहस्वान्वाजी सहमान ऽउग्रः।अभिवीरो ऽअभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्॥५॥ गोत्रभिदं गोविदं वज्जबाहुं जयन्तमज्ज्म प्प्रमृणन्तमोजसा।इमꣳ सजाताऽअनु वीर-यद्ध्वमिन्द्रꣳ सखायो ऽअनु सꣳरभद्ध्वम्॥६॥ अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडं युद्ध्योस्म्माकꣳ सेना ऽअवतु प्प्र युत्सु॥७॥ इन्द्र ऽआसां नेता बृहस्प्पतिर्द्दक्षिणायज्ञः पुर ऽएतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां

मुरुतौ यन्त्वग्ग्रम्॥८॥ इन्द्रस्य व्वृष्ष्णो व्वरुणस्य राज्ञ ऽआदित्यानां मुरुताᳬंशर्द्ध ऽउग्ग्रम्। मुहामनसां भुवनच्च्युवानां घोषौ देवानां जयतामुदस्त्थात्॥९॥ उद्धर्षय मघवन्नायुधान्युत्सत्त्वनां मामुकानां मनाᳬंसि। उद्वृत्रहन्वाजिनां व्वाजिनान्युद्रथानां जयतां ब्यन्तु घोषाः॥१०॥ अस्म्माकमिन्द्रः समृतेषु ध्वजेष्ष्वस्म्माकं ख्या ऽइषवस्ता जयन्तु। अस्म्माकं व्वीरा ऽउत्तरे ऽभवन्त्वस्म्माँ२॥ ऽउ देवा ऽअवता हवेषु॥११॥ अमीषां चित्त म्प्रतिलोभयन्ती गृहाणाङ्गान्यप्प्वे परेहि। अभि प्प्रेहि निर्दह हृत्त्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम्॥१२॥ अवसृष्टा परापत शरव्ये ब्रह्मसᳬशिते। गच्छामित्रान्प्रपद्यस्व मामीषां कञ्चनोच्छिषः॥१३॥ प्रेता जयतानर ऽइन्द्रो वः शर्म्म यच्छतु। उग्ग्रावः सन्तु बाहवोनाधृष्ष्या यथासथ॥१४॥ असौ या सेना मरुतः परेषामभ्यैति न ऽओजसा स्प्पर्द्धमाना। तां गूह ततमसापव्व्रतेन यथामी ऽअन्न्यो ऽअन्न्यं न जानन्॥१५॥ यत्र बाणाः सम्पतन्ति कुमारा व्विशिखा ऽइव। तन्न ऽइन्द्रो बृहस्प्पतिरदितिः शर्म्म यच्छतु व्विश्श्वाहा शर्म्म यच्छतु॥१६॥ मर्म्माणि ते व्वर्म्मणा च्छादयामि सोमस्त्वा राजाऽमृतेनानुवस्ताम्। उरोर्व्वरीयो व्वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥१७॥

इति रुद्राष्टाध्याय्यां तृतीयोऽध्यायः ॥३॥

चतुर्थोऽध्यायः (४)

हरिः ॐ। व्विभ्राड्बृहत्पिबतु सोम्म्यं मद्ध्वायुर्द्दधद्यज्ञपतावविहुतम्। व्वातजूतो यो ऽअभिरक्षतित्त्मना प्रजाः पुपोष पुरुधा व्विराजति॥१॥ उदुत्त्यं जातवेदसं देवं व्वहन्ति केतवः। दृशे विश्श्वाय सूर्य्यम्॥२॥ येना पावक चक्षसा भुरण्यन्तं जनाँ२॥ऽअनु। त्त्वं व्वरुण पश्यसि॥३॥ दैव्यावद्ध्वर्य्यू ऽआगतꣳ रथेन सूर्य्यत्त्वचा। मद्ध्वायज्ञꣳ समञ्जाथे। तं प्रत्क्नथाऽयं व्वेनश्चित्रं देवानाम्॥४॥ तं प्रत्क्नथा पूर्व्वथा व्विश्वथेमथा ज्ज्येष्ठतातिं बर्हिषदꣳ स्वर्व्विदम्। प्रतीचीनं व्वृजनन्दोहसे धुनिमाशुं जयन्तमनुया सुवर्द्धसे॥५॥ अयं व्वेनश्चोदयत्पृश्निगर्ब्भा ज्ज्योतिर्ज्जरायू रजसो व्विमाने। इममपाꣳ सङ्गमे सूर्य्यस्य शिशुन्न व्विप्प्रा मतिभी रिहन्ति॥६॥ चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य व्वरुणस्याग्ग्नेः। आप्प्रा द्यावापृथिवी ऽअन्तरिक्षꣳ सूर्य्यऽआत्त्मा जगतस्तस्त्थुषश्च॥७॥ आ नऽइडाभिर्व्विदथे सुशस्ति व्विश्वानरः सविता देव ऽएतु। अपि यथा युवानो मत्सथा नो व्विश्वं जगदभिपित्त्वे मनीषा॥८॥ यदद्य कच्च व्वृत्रहन्नुदगाऽअभि सूर्य्य। सर्व्वं तदिन्द्र ते व्वशे॥९॥ तरणिर्व्विश्वदर्शतो ज्ज्योतिष्कृदसि सूर्य्य। विश्वमाभासि रोचनम्॥१०॥ तत्सूर्य्यस्य देवत्वं तन्महित्वं मद्ध्या कर्त्तोर्व्विततꣳ सं जभार। यदेदयुक्तहरितः सधस्त्थादाद्रात्री व्वासस्तनुते

सि॒मस्म्मैं॥११॥ तन्मि॒त्रस्य॒ व्वरु॑णस्या-भि॒चक्षे॒ सूर्य्यो॑ रू॒पं कृ॑णुते॒ द्योरु॒पस्त्थें॑। अ॒न॒न्तम॒न्यद्रुश॑दस्य॒ पाजः॑कृ॒ष्णम॒न्यद्धरि॑तः॒ सम्भ॑रन्ति॥१२॥ बण्म॒हाँ२॥ ऽअसि सूर्य्य॒ बडा॑दित्य म॒हाँ२॥ ऽअसि। म॒हस्तें स॒तो म॑हि॒मा प॑नस्यते॒ऽद्धा दे॑व म॒हाँ२॥ ऽअसि॥१३॥ बट्सूर्य्य॒ श्श्रव॑सा म॒हाँ२॥ ऽअसि स॒त्रा दे॑व म॒हाँ२॥ असि। म॒न्हा दे॒वाना॑मसु॒र्य्यः॑ पु॒रोहि॑तो व्वि॒भु ज्ज्योति॒रदा॑ब्भ्यम्॥१४॥ श्राय॑न्त ऽइव॒ सूर्य्यं॒ विश्श्वेदिन्द्र॑स्य भक्षत। व्वसू॑नि जा॒ते जन॑मान॒ ऽओज॑सा॒ प्प्रति॑ भा॒गं न दी॑धिम॥१५॥ अ॒द्या दे॑वा॒ ऽउदि॑ता॒ सूर्य्य॑स्य॒ निरंह॑सः॒ पिपृ॒ता निर॑व॒द्यात्। तन्नो॑ मि॒त्रो व्वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी ऽउ॒त द्यौः॥१६॥ आ कृ॒ष्णेन॒ रज॑सा॒ व्वर्त्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्त्यं॑ च। हि॒रण्यये॑न सवि॒ता रथे॒ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न्॥१७॥

इति रुद्राष्टाध्याय्यां चतुर्थोऽध्यायः॥४॥

पञ्चमोऽध्यायः (५)

हरिः॑ ॐ भूः ॐ भुवः ॐ स्वः ॐ। नम॑स्ते रुद्र म॒न्यव॑ ऽउ॒तो त॒ ऽइष॑वे॒ नमः॑। बा॒हुभ्या॑मु॒त ते॒ नमः॑॥१॥ या ते॑ रुद्र शि॒वा त॒नूरघो॒राऽपा॑पकाशिनी। तया॑ नस्त॒न्वा॒ शन्त॑मया॒ गिरि॑शन्ता॒भिचा॑कशीहि॥२॥ यामि॒षुं॑ गिरिशन्त॒ हस्ते॑ बि॒भर्ष्य॒स्त॑वे। शि॒वां गि॑रित्र॒ तां कु॑रु॒ मा हिं॑सीः॒ पुरु॑षं॒ जग॑त्॥३॥ शि॒वेन॒ व्वच॑सा त्त्वा॒

गिरिशाऽच्छावदामसि। यथा नः सर्वमिज्जगदयक्ष्मं सुमना ऽअसत्॥४॥ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातु-धान्योऽधराचीः परासुव॥५॥ असौ यस्ताम्रो ऽअरुण ऽउत बभ्रुः सुमङ्गलः। ये चैनं रुद्रा ऽअभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ऽईमहे॥६॥ असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनं गोपा ऽअदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः॥७॥ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये ऽअस्य सत्त्वानोऽहं तेभ्योऽकरं नमः॥८॥ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्। याश्च ते हस्त ऽइषवः परा ता भगवो वप॥९॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ२॥ ऽउत। अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः॥१०॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज॥११॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम्॥१२॥ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥१३॥ नमस्त ऽआयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥१४॥ मा नो महान्तमुत मा नो ऽअर्भकं मा न ऽउक्षन्तमुत मा न ऽउक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥१५॥ मा नस्तोके

तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअश्वेषु रीरिषः। मा नो व्वीरान्नुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे॥१६॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो बब्भ्लुशाय॥१७॥ नमो बब्भ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्त्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्त्यै वनानां पतये नमो नमो रोहिताय॥१८॥ नमो रोहिताय स्त्थपतये व्वृक्षाणां पतये नमो नमो भुवन्तये व्वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे व्वाणिजाय कक्षाणां पतये नमो नम ऽउच्चैर्घोषायाक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नायतया ॥१९॥ नमः कृत्स्नायतया धावते सत्त्वनां पतये नमो नमः सहमानाय निव्व्याधिन ऽआव्व्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमो वञ्चते॥२०॥ नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिण ऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिब्भ्यो जिघांꣳसद्भ्यो मुष्णतां पतये नमो नमोसिमद्भ्यो नक्तञ्चरद्भ्यो व्विकृन्तानां पतये नमः॥२१॥ नम ऽउष्णीषिणे गिरिचराय कुलुञ्चानां

पतये नमो नम ऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम ऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम ऽआयच्छद्भ्योस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥ नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्य ऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः॥२३॥ नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नम ऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम ऽउगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गणेभ्यः ॥२४॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ॥२५॥ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो नमः॥२६॥ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ॥२७॥ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः

कपुर्दिने॥२८॥ नमः कपुर्दिने च व्युप्प्त केशाय च नमः सहस्त्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय॥२९॥ नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोग्र्याय च प्प्रथमाय च नमऽआशवे॥३०॥ नमऽआशवे चाजिराय च नमः शीग्घ्र्याय च शीब्भ्याय च नमऽऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्प्याय च ॥३१॥ नमो ज्ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो मद्ध्यमाय चापगल्भाय च नमो जघन्न्याय च बुध्न्याय च नमः सोब्भ्याय ॥३२॥ नमः सोब्भ्याय च प्प्रतिसर्य्याय च नमो याम्म्याय च क्षेम्म्याय च नमः श्लोक्क्याय चावसान्याय च नमऽउर्व्वर्य्याय च खल्याय च नमो व्वन्न्याय॥३३॥ नमो वन्न्याय च कक्क्ष्याय च नमः श्रवाय च प्प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्म्मिने॥३४॥ नमो बिल्म्मिने च कवचिने च नमो व्वर्म्मिणे च वरूथिने च नमः श्श्रुताय च श्श्रुतसेनाय च नमो दुन्दुब्भ्याय चाहनन्न्याय च नमो धृष्ष्णवे॥३५॥ नमो धृष्ष्णवे च प्प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च॥३६॥ नमः स्रुत्याय च पत्थ्याय च नमः काट्याय च नीप्प्याय च नमः कुल्ल्याय च सरस्याय

च नमो नादेयाय च वैशन्ताय च नमः कूप्याय॥३७॥ नमः कूप्याय चाऽवट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च नमो वात्याय॥३८॥ नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गवे॥३९॥ नमः शङ्गवे च पशुपतये च नम ऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥४०॥ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥४१॥ नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय॥४२॥ नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नम ऽइरिण्याय च प्रपथ्याय च नमो व्रज्याय॥४३॥ नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः शुष्क्याय॥४४॥ नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम ऽऊर्व्याय च सूर्व्याय च नमः पर्णाय॥४५॥

नमः पुण्र्णाय च पर्णशदाय च नम ऽउद्गुरमाणाय चाभिघ्नते च नम ऽआखिदते च प्रखिदते च नम ऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳬ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम ऽआनिर्हतेभ्यः॥४६॥ द्रापे ऽअन्धसस्पते दरिद्रनीललोहित। आसां प्रजानामेषां पशूनां मा भेर्मा रोङ्मो च नः किञ्चनाममत्॥४७॥ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः॥ यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टङ्ग्रामे ऽअस्मिन्ननातुरम्॥४८॥ या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी। शिवा रुतस्य भेषजी तया नो मृड जीवसे॥४९॥ परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड॥५०॥ मीढुष्टम शिवतम शिवो नः सुमना भव। परमे वृक्ष ऽआयुधं निधाय कृत्तिं वसान ऽआचर पिनाकं बिभ्रदागहि॥५१॥ विकिरिद्र विलोहित नमस्ते ऽअस्तु भगवः। यास्ते सहस्रᳬ हेतयोऽन्यमस्मन्निवपन्तु ताः॥५२॥सहस्राणि सहस्रशो बाह्वोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखा कृधि॥५३॥ असङ्ख्याता सहस्राणि ये रुद्रा ऽअधि भूम्याम्। तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि॥५४॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा ऽअधि।तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि॥५५॥ नीलग्ग्रीवाः शितिकण्ठा दिवᳬ

रुद्रा ऽउपश्रिताः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥५६॥ नीलग्ग्रीवाः शितिकण्ठाः शर्वा ऽअधः क्षमाचराः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥५७॥ ये व्वृक्षेषु शष्प्पिञ्जरा नीलग्ग्रीवा व्विलोहिताः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥५८॥ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥५९॥ ये पथां पथिरक्षय ऽऐलबृदा ऽआयुर्व्युधः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥६०॥ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥६१॥ येऽन्नेषु व्विविद्ध्यन्ति पात्रेषु पिबतो जनान्। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥६२॥ य ऽएतावन्तश्च भूयाꣳसश्च दिशो रुद्रा व्वितस्त्थिरे। तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि॥६३॥ नमोऽस्तु रुद्रेब्भ्यो ये दिवि येषां व्वर्षमिषवः। तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः। तेब्भ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्म्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः॥६४॥

नमोऽस्तु रुद्रेब्भ्यो येऽन्तरिक्षे येषां व्वात ऽइषवः। तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशो-दीचीर्द्दशोर्द्ध्वाः। तेब्भ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्म्मो यश्च नो द्वेष्टि तमेषां जम्भे

दध्मः ॥६५॥ नमोऽस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः। तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः ॥६६॥ ॐ स्वः ॐ भुवः ॐ भूः।

इति रुद्राष्टाध्याय्यां पञ्चमोऽध्यायः॥५॥

षष्ठोऽध्यायः (६)

[1]हरिः ॐ। वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि॥१॥ एष ते रुद्र भागः सह स्वस्राऽम्बिकया तं जुषस्व स्वाहैष ते रुद्र भाग ऽआखुस्ते पशुः॥२॥अव रुद्रमदीमह्यव देवं त्र्यम्बकम्। यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात्॥३॥ भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजम्। सुखं मेषाय मेष्यै॥४॥

---

१. अथाऽत्र द्वितीयप्रकारः- हरिः ॐ नमस्ते० (इत्यारभ्य) मा नस्तोके० (इति पर्यन्ताः षोडश-मन्त्राः)॥१६॥ एष ते० ॥१७॥ अव रुद्र० ॥१८॥ नमस्ते० ॥१९॥ या ते० ॥२०॥ न तं विदाथ य ऽइमा जजानान्यद्युष्माकमन्तरं बभूव । निहारेण प्रावृता जल्प्या चासुतृप ऽउवथशासश्चरन्ति ॥२१॥ विश्वकर्म्मा ह्यजनिष्ट देव ऽआदिद्गन्धर्वो ऽअभवद्द्वितीयः। तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात्पुरुत्रा ॥२२॥ मीढुष्टम० ॥२३॥ विकिरिद्र०॥२४॥ सहस्राणि ॥२५॥ असङ्ख्याता० ॥२६॥ वयꣳ सोम० ॥२७॥ एष ते०॥२८॥ अव रुद्र० ॥२९॥ भेषजमसि०॥३०॥ त्र्यम्बकं०। त्र्यम्बकं० ॥३१॥ एतत्ते० ॥३२॥ त्र्यायुषं०॥३३॥ शिवो नामा० ॥३४॥ उग्रश्च० ॥३५॥ अग्निꣳ हृदये० ॥३६॥ उग्रं लोहितेन० ॥३७॥ स्वस्ति न ऽइन्द्रो०॥३८॥ पयः पृथिव्यां० ॥३९॥ विष्णो रराट० ॥४०॥ अग्निर्देवता० ॥४१॥ द्यौः शान्ति० ॥४२॥ (पश्चात् 'वाजश्च मे० ऋचं वाचं०' इत्यध्यायद्वयं पठेत् ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय माऽमृतात्। त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम्। उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः॥५॥ एतत्ते रुद्राऽवसं तेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकावसः कृत्तिवासा ऽअहिंसन्नः शिवोऽतीहि॥६॥ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नो ऽअस्तु त्र्यायुषम्॥७॥शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा मा हिंसीः। निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय॥८॥

इति रुद्राष्टाध्याय्यां षष्ठोऽध्यायः ॥६॥

सप्तमोऽध्यायः (७)

हरिः ॐ। उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा॥१॥ अग्निं हृदयेनाशनिं हृदयाग्रेण पशुपतिं कृत्स्नहृदयेन भवं यक्ना। शर्वं मतस्नाभ्यामीशानं मन्युना महादेवमन्तः पर्शव्येनोग्रं देवं वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम्॥२॥ उग्रं लोहितेन मित्रं सौव्रत्येन रुद्रं दौर्व्रत्त्येनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा। भवस्य कण्ठ्यं रुद्रस्यान्तःपार्श्व्यं महादेवस्य यकृच्छर्व्वस्य वनिष्ठुः पशुपतेः पुरीतत्॥३॥

लोमब्भ्यः स्वाहा लोमब्भ्यः स्वाहा त्त्वचे स्वाहा त्त्वचे स्वाहा लोहिताय स्वाहा लोहिताय स्वाहा मेदोब्भ्यः स्वाहा मेदोब्भ्यः स्वाहा। माᳪसेब्भ्यः स्वाहा माᳪसेब्भ्यः स्वाहा स्न्नावब्भ्यः स्वाहा स्न्नावब्भ्यः स्वाहाऽस्त्थब्भ्यः स्वाहाऽस्त्थब्भ्यः स्वाहा मज्जब्भ्यः स्वाहा मज्जब्भ्यः स्वाहा॥ रेतसे स्वाहा पायवे स्वाहा॥४॥ आयासाय स्वाहा प्प्रायासाय स्वाहा संय्यासाय स्वाहा वियासाय स्वाहोद्यासाय स्वाहा। शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा॥५॥ तपसे स्वाहा तप्प्यते स्वाहा तप्प्यमानाय स्वाहा तप्ताय स्वाहा घर्म्माय स्वाहा। निष्क्कृत्त्यै स्वाहा प्प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा॥६॥ यमाय स्वाहान्तकाय स्वाहा मृत्त्यवे स्वाहा। ब्ब्रह्मणे स्वाहा ब्ब्रह्महत्त्यायै स्वाहा व्विश्वेब्भ्यो देवेब्भ्यः स्वाहा द्यावापृथिवीब्भ्याᳪ स्वाहा॥७॥

इति रुद्राष्टाध्याय्यां सप्तमोऽध्यायः ॥७॥

अष्टमोऽध्यायः (८)

हरिः ॐ। व्वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्क्रतुश्च मे स्वरश्च्च मे श्श्लोकश्च्च मे श्श्रवश्च्च मे श्श्रुतिश्च्च मे ज्ज्योतिश्च्च मे स्वश्च्च मे यज्ञेन कल्प्पन्ताम्॥१॥

प्राणश्च्च मेऽपानश्च्च मे व्यानश्च्च मे सुश्च्च मे चित्तं च म ऽआधीतं च मे व्वाक् च मे मनश्च्च मे

चक्षुश्च्च मे श्श्रोत्रं च मे दक्षश्च्च मे बलं च मे यज्ञेन कल्प्पन्ताम्॥२॥

ओजश्च्च मे सहश्च्च म ऽआत्मा च मे तनूश्च्च मे शर्म्म च मे व्वर्म्म च मेऽङ्गानि च मेऽस्थीनि च मे परूᳩषि च मे शरीराणि च म ऽआयुश्च मे जरा च मे यज्ञेन कल्प्पन्ताम्॥३॥

ज्ज्यैष्ठ्यं च म ऽआधिपत्त्यं च मे मन्न्युश्च मे भामश्च्च मेऽमश्च्च मेऽम्भश्च्च मे जेमा च मे महिमा च मे व्वरिमा च मे प्प्रथिमा च मे व्वर्षिमा च मे द्राघिमा च मे व्वृद्धं च मे व्वृद्धिश्च्च मे यज्ञेन कल्प्पन्ताम्॥४॥ ([1]न०)।

सत्त्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च्च मे क्क्रीडा च मे मोदश्च मे जातं च मे जनिष्ष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्प्पन्ताम्॥५॥

ऋतं च मेऽमृतं च मे ऽयक्ष्मं च मे ऽनामयच्च मे जीवातुश्च्च मे दीर्घायुत्त्वं च मेऽनमित्रं च मेऽभयं च मे सुखं च मे शयनं च मे सूषाश्च मे सुदिनं च मे यज्ञेन कल्प्पन्ताम्॥६॥

---

१. अत्राऽयं विचारः—'वेद-वेदा-ऽब्धि-रामाश्च राम-राम-द्विकैककम्। द्वौ द्वौ पृथग्भिर्मन्त्रैस्तु नमकाश्चमकाः समृताः॥ बाजश्च सत्यमृक्चर्चाऽश्मा चाऽग्निरंशुस् तथाऽग्निकः। एका चैव चतस्रश्च त्र्यविर्वाजा' इति क्रमः॥ एवं चमकानेकादशधा विभज्य, एकैकभागं नमकेषु संयोज्य पठेत्,स 'रुद्रः'। तैरेकादशरुद्रः 'लघुरुद्रः'। तैरेकादशगुणैः 'महारुद्रः'। तैरेकादशावृत्तैः 'अतिरुद्रः'। एवं चाऽत्र 'नमस्ते' 'इत्यारभ्य जम्भे दध्मः' इत्यध्यायपर्यन्तं पठनीयम्। एवमग्रेऽपि बोद्धयम्।

युन्ता च मे धर्त्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च मे यज्ञेन कल्पन्ताम्॥७॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणं च मे भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम्॥८॥(न०)।

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म ऽऔद्भिद्यं च मे यज्ञेन कल्पन्ताम्॥९॥

रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे कुयवं च मेऽक्षितं च मेऽन्नं च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम्॥१०॥

वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथ्यं च म ऽऋद्धं च म ऽऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम्॥११॥ व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्॥१२॥ (न०)।

अश्म्मा च मे मृत्तिका च मे गिरयश्च मे पर्व्वताश्च मे सिकताश्च मे व्वनस्प्पतयश्च मे हिरण्ण्यं च मेऽयश्च मे श्यामं च मे लोहं च मे सीसं च मे त्रपु च मे यज्ञेन कल्प्पन्ताम्॥१३॥

अग्ग्निश्च म ऽआपश्च मे व्वीरुधश्च म ऽओषधयश्च मे कृष्टपच्च्याश्च मेकृष्टपच्च्याश्च मे ग्राम्म्याश्च मे पशव ऽआरण्ण्याश्च मे व्वित्तं च मे व्वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञेन कल्प्पन्ताम्॥१४॥

व्वसु च मे व्वसतिश्च मे कर्म्म च मे शक्तिश्च मेऽर्त्थश्च म ऽएमश्च म ऽइत्या च मे गतिश्च मे यज्ञेन कल्प्पन्ताम्॥१५॥(न०)।

अग्ग्निश्च म ऽइन्द्रश्च मे सोमश्च म ऽइन्द्रश्च मे सविता च म ऽइन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म ऽइन्द्रश्च मे बृहस्पतिश्च म ऽइन्द्रश्च मे यज्ञेन कल्प्पन्ताम्॥१६॥

मित्रश्च म ऽइन्द्रश्च मे व्वरुणश्च म ऽइन्द्रश्च मे धाता च म ऽइन्द्रश्च मे त्त्वष्टा च म ऽइन्द्रश्च्च मे मरुतश्च्च म ऽइन्द्रश्च मे विश्श्वे च मे देवा ऽइन्द्रश्च्च मे यज्ञेन कल्प्पन्ताम्॥१७॥ पृथिवी च म ऽइन्द्रश्च्च मेऽन्तरिक्षं च म ऽइन्द्रश्च्च मे द्यौश्च्च म ऽइन्द्रश्च्च मे समाश्च्च म ऽइन्द्रश्च्च मे नक्षत्त्राणि च म ऽइन्द्रश्च्च मे दिशश्च्च म ऽइन्द्रश्च्च मे यज्ञेन कल्प्पन्ताम्॥१८॥ (न०)।

अ॒ह्शुश्च॑ मे र॒श्मिश्च॒ मेऽदा॑भ्यश्च॒ मेऽधि॑पतिश्च म ऽउपा॒ꣳशुश्च॑ मेऽन्तर्य्या॒मश्च॑ म ऽऐन्द्रवाय॒वश्च॑ मे मैत्रावरु॒णश्च॑ म ऽआश्श्विनश्च॑ मे प्प्रतिप्प्र॒स्थान॑श्च मे शु॒क्रश्च॑ मे म॒न्थी च॑ मे य॒ज्ञेन॑ कल्प्पन्ताम्॥१९॥

आ॒ग्ग्र॒य॒णश्च॑ मे वैश्श्वदे॒वश्च॑ मे ध्रु॒वश्च॑ मे वैश्श्वान॒रश्च॑ म ऽऐन्द्रा॒ग्ग्नश्च॑ मे म॒हावैश्श्वदेवश्च मे मरुत्व॒तीयाश्च मे॒ निष्क्कैवल्ल्यश्च मे सावि॒त्रश्च मे सारस्व॒तश्च म पात्क्नीव॒तश्च मे हारियोज॒नश्च मे य॒ज्ञेन॑ कल्प्पन्ताम्॥२०॥

स्रु॒चश्च मे चम॒साश्च मे वा॒यव्या॒नि च मे द्रोणकल॒शश्च मे॒ ग्ग्रावा॑णश्च मेऽधि॒षव॑णे च मे पूत॒भृच्च म ऽआधव॒नीय॑श्च मे॒ वे॒दिश्च मे ब॒र्हिश्च मे ऽवभृ॒थश्च मे स्वगाका॒रश्च मे य॒ज्ञेन॑ कल्प्पन्ताम्॥२१॥(न०)।

अ॒ग्निश्च मे घ॒र्म्मश्च मे॒ऽर्कश्च मे॒ सूर्य्य॑श्च मे प्प्रा॒णश्च मेऽश्श्वमे॒धश्च॑ मे पृथि॒वी च॒ मेदि॑तिश्च मे॒ दिति॑श्च मे॒ द्यौश्च मे॒ऽङ्गुल॑यः॒ शक्क्वर॑यो॒ दिश॑श्च मे य॒ज्ञेन॑ कल्प्पन्ताम्॥२२॥

व्व्र॒तं च॑ म ऽऋ॒तव॑श्च मे॒ तप॑श्च मे संवत्स॒रश्च मेऽहोरा॒त्रे ऽऊर्व्व॒ष्ठीवे बृहद्रथन्त॒रे च॑ मे य॒ज्ञेन॑ कल्प्पन्ताम्॥२३॥ (न०)।

एका च मे तिस्रश्च्च मे तिस्रश्च्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च म ऽएकादश च म ऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म ऽएकविꣳशतिश्च्च म ऽएकविꣳशतिश्च्च मे त्रयोविꣳशतिश्च्च मे त्रयोविꣳ-शतिश्च्च मे पञ्चविꣳशतिश्च्च मे पञ्चविꣳशतिश्च्च मे सप्तविꣳशतिश्च्च मे सप्तविꣳशतिश्च्च मे नवविꣳशतिश्च्च मे नवविꣳशतिश्च्च म ऽएकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳ शच्च मे यज्ञेन कल्पन्ताम्॥२४॥ (न०)।

चतस्रश्च्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च्च मे विꣳशतिश्च्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मेऽष्टाविꣳशतिश्च मेद्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम्॥२५॥ (न०)।

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा

च्च मे तुर्व्यवाट् च्च मे तुर्व्यौही च्च मे यज्ञेन कल्प्पन्ताम्॥२६॥

पृष्ठवाट् च्च मे पष्ठौही च्च म ऽउक्षा च्च मे व्वशा च्च म ऽऋषभश्च्च मे व्वेहच्च मेनड्वाँश्च्च मे धेनुश्च्च मे यज्ञेन कल्प्पन्ताम्॥२७॥ (न०)।

व्वाजाय स्वाहा प्प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा व्वसवे स्वाहाऽहर्प्पतये स्वाहाह्ने मुग्ग्धाय स्वाहाऽमुग्ग्धाय व्वैनक्षिनाय स्वाहा व्विनक्षिन ऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्प्रजापतये स्वाहा। इयं ते राण्मित्राय यन्तासि यमन ऽऊर्ज्जेत्वा व्वृष्ट्यै त्वा प्प्रजानां त्वाधिपत्याय॥२८॥

आयुर्व्यज्ञेन कल्प्पतां प्प्राणो यज्ञेन कल्प्पतां चक्षुर्व्यज्ञेन कल्प्पताᳬ श्श्रोत्रं यज्ञेन कल्प्पतां व्वाग्ग्यज्ञेन कल्प्पतां मनो यज्ञेन कल्प्पतामात्मा यज्ञेन कल्प्पतां ब्रह्मा यज्ञेन कल्प्पतां ज्योतिर्व्यज्ञेन कल्पताᳬ स्वर्व्यज्ञेन कल्प्पतां पृष्ठं यज्ञेन कल्प्पतां यज्ञो यज्ञेन कल्प्पताम्। स्तोमश्च यजुश्च ऽऋक् च साम च बृहच्च रथन्तरं च। स्वर्द्देवा ऽअगन्मामृता ऽअभूम प्प्रजापतेः प्प्रजा ऽअभूम व्वेट् स्वाहा॥२९॥

इति रुद्राष्टाध्याय्यामष्टमोऽध्यायः॥८॥

परिशिष्टाऽध्यायः

शान्त्यध्यायः (१)

हरिः ॐ। ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये। वागोजः सहौजो मयि प्राणापानौ॥१॥ यन्मे च्छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु। शं नो भवतु भुवनस्य यस्पतिः॥२॥ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥३॥ कया नश्चित्र ऽआभुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥४॥ कस्त्वा सत्यो मदानाम् मꣳहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु॥५॥ अभीषुणः सखीनामविता जरितृणाम्। शतं भवास्यूतिभिः॥६॥

कया त्वं न ऽऊत्याभि प्रमन्दसे वृषन्। कया स्तोतृभ्य ऽआभर॥७॥ इन्द्रो विश्वस्य राजति। शं नो ऽअस्तु द्विपदे शं चतुष्पदे॥८॥ शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा। शं न ऽइन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः॥९॥ शं नो वातः पवताꣳ शं नस्तपतु सूर्यः। शं नः कनिक्रदद्देवः पर्जन्यो ऽअभिवर्षतु॥१०॥

अहानि शं भवन्तु नः शꣳ रात्रीः प्रतिधीयताम्। शं न ऽइन्द्राग्नी भवतामवोभिः शं न ऽइन्द्रावरुणा

रातहव्या। शं न ऽइन्द्रापूषणा व्वाजसातौ शमिन्द्रासोमा सुविताय शं य्योः॥११॥ शं नो देवीरभिष्टय ऽआपो भवन्तु पीतये। शं य्योरभिस्रवन्तु नः॥१२॥स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथाः ॥१३॥ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। महे रणाय चक्षसे॥१४॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥१५॥ तस्मा ऽअरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥१६॥

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्ति-रापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्श्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व्वꣳ शान्तिःशान्तिरेव शान्तिः सा मा शान्तिरेधि॥१७॥

दृते दृꣳह मा मित्रस्य मा चक्षुषा सर्व्वाणि भूतानि समीक्षन्ताम्। मित्रस्याऽहं चक्षुषा सर्व्वाणि भूतानि समीक्षे।मित्रस्य चक्षुषा समीक्षामहे॥१८॥ दृते दृꣳह मा। ज्योक्क्ते संदृशि जीव्यासं ज्योक्क्ते संदृशि जीव्यासम् ॥१९॥ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्चिषे। अन्याँस्ते ऽअस्मत्तपन्तु हेतयः पावको ऽअस्मभ्यꣳ शिवो भव॥२०॥ नमस्ते ऽअस्तु व्विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे॥२१॥

यतो यतः समीहसे ततो नो ऽअभयं कुरु। शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥२२॥ सुमित्रिया न ऽआप ऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥२३॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥२४॥

इति रुद्राष्टाध्याय्यां शान्त्यध्यायः ॥१॥

स्वस्ति-प्रार्थनामन्त्राध्यायः (२)

हरिः ॐ। स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥१॥ ॐ पयः पृथिव्याम् पय ऽओषधीषु पयो दिव्यन्तरिक्षे पयो धाः। पयस्वतीः प्रदिशः सन्तु मह्यम्॥२॥ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि। वैष्णवमसि विष्णवे त्वा॥३॥ ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥४॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः॥५॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय

नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्व्वभूतदमनाय नमो मनोन्मनाय नमः ॥६॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्व्वेभ्यः सर्व्वशर्व्वेभ्यो नमस्ते ऽअस्तु रुद्ररूपेभ्यः॥७॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥८॥ ईशानः सर्व्वविद्यानामीश्वरः सर्व्वभूतानाम्। ब्ब्रह्माधिपतिर्ब्ब्रह्मणोऽधिपतिर्ब्ब्रह्मा शिवो मे ऽअस्तु सदाशिवोम्॥९॥ ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा मा हिꣳसीः। निवर्त्तयाम्म्यायुषे ऽन्नाद्याय प्रजननाय रायस्प्पोषाय सुप्रजास्त्वाय सुवीर्य्याय॥१०॥ ॐ विश्श्वानि देवसवितर्दुरितानि परासुव। यद्भद्रं तन्न ऽआसुव॥११॥ ॐ द्यौः शान्ति-रन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्प्पतयः शान्तिर्व्विश्श्वे देवाः शान्तिर्ब्ब्रह्म शान्तिः सर्व्वꣳ शान्तिः शान्तिरेव शान्तिःसामा शान्तिरेधि॥१२॥

ॐ सर्व्वेषां वा ऽएष व्वेदानाꣳ रसो यत्साम सर्व्वेषामेवैनमतद्व्वेदानाꣳ रसेनाभिषिञ्चति॥१३॥

ॐ शान्तिः, शान्तिः, शान्तिः, सुशान्तिर्भवतु। सर्वारिष्टशान्तिर्भवतु।

अनेन रुद्राऽभिषेककर्मणा कृतेन श्रीभवानीशङ्कारमहारुद्रः प्रीयतां न मम। ॐ सदाशिवार्पणमस्तु।

इति रुद्राष्टाध्याय्यां स्वस्तिप्रार्थनामन्त्राध्यायः॥२॥

षडङ्गन्यासाः

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्त्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वेदेवास ऽइह मादयन्तामोंꣳ प्रतिष्ठ॥

ॐ हृदयाय नमः॥१॥

ॐ अबोध्द्यग्निः समिधा जनानां प्रतिधेनुमिवायतीमुषासम्। यह्वा ऽइव प्रवयामुज्जिहानाः प्रभानवः सिस्रते नाकमच्छ॥

ॐ शिरसे स्वाहा॥२॥

ॐ मूर्द्धानं दिवो ऽअरतिं पृथिव्या वैश्वानरमृत ऽआजातमग्निम्। कविꣳ सम्म्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥

ॐ शिखायै वषट्॥३॥

ॐ मर्म्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृते नानुवस्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु॥

ॐ कवचाय हुम्॥४॥

ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति सम्पतत्त्रैर्द्यावाभूमी जनयन् देव एकः॥

ॐ नेत्रत्रयाय वौषट्॥५॥

ॐ मा नस्तोके तनये मान ऽआयुषि मा नो गोषु मा नो ऽअश्वेषुरीरिषः। मा नो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे॥

ॐ अस्त्राय फट्॥६॥

इति षडङ्गन्यासान् कृत्वा, ध्यानं कुर्यात्। तद्यथा –

ध्यानम्–ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥

॥ श्रीः ॥

रुद्रस्वाहाकारविधिः

ॐ गणानान्त्वा० स्वाहा।

ॐ अम्बेऽअम्बिके० स्वाहा। इति हुत्वा,

ॐ यज्जाग्रतः० (६ मन्त्राः) स्वाहा।

ॐ सहस्त्रशीर्षा० (१६ मन्त्राः) स्वाहा।

ॐ अद्भ्यः सम्भृतः० (६ मन्त्राः) स्वाहा।

ॐ आशुः शिशानः० (१२ मन्त्राः) स्वाहा ।

ॐ विब्भ्राड् बृहत्पिबतु० (१७ मन्त्राः) स्वाहा ।

ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ नमस्ते रुद्द्र मन्न्यव ऽउतो त ऽइषवे नमः। बाहुब्भ्यामुत ते नमः स्वाहा।।१।।

ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि स्वाहा।।२।।

ॐ यामिषुङ्गिरिशन्त हस्ते व्विभर्ष्यस्तवे। शिवाङ्गिरित्रताङ्कुरु मा हिर्ठ. सीः पुरुषञ्जगत् स्वाहा।।३।।

ॐ शिवेन व्वचसा त्त्वा गिरिशाच्छा व्वदामसि। यथा नः सर्व्वमिज्जगदयक्ष्मर्ठ. सुमना ऽअसत् स्वाहा।।४।।

ॐ अद्ध्यवोचदधिवक्ता प्प्रथमो दैव्व्यो भिषक्। अहींश्च्च सर्व्वाञ्जम्भयन्त्सर्व्वांश्च्च यातुधान्न्योऽधराचीः परासुव स्वाहा।।५।।

ॐ असौ यस्ताम्म्रो ऽअरुण ऽउत बब्भ्रुः सुमङ्गलः। ये चैनर्ठ० रुद्द्रा ऽअभितो दिक्षु श्रिताः सहस्त्रशो वैषाᳩ हेड ऽईमहे स्वाहा।।६।।

ॐ असौ योऽवसर्प्पति नीलग्ग्रीवो व्विलोहितः। उतैनङ्गोपा ऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सः दृष्ट्टो मृडयाति नः स्वाहा।।७।।

ॐ नमोऽस्तु नीलग्ग्रीवाय सहस्राक्षाय मीढुषे। अथो ये ऽअस्य सत्त्वानो हन्तेब्भ्योऽकरन्नमः स्वाहा।।८।।

ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्क्न्योंर्ज्ज्याम्। याश्च्च ते हस्त ऽइषवः परा ता भगवो व्वप स्वाहा।।९।।

ॐ व्विज्ज्यन्धनुः कपर्द्दिनो व्विशल्ल्यो बाणवाँ२ ऽउत। अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः स्वाहा।।१०।।

ॐ या ते हेतिर्म्मीढुष्ट्टम हस्ते बभूव ते धनुः। तयास्म्मान्विश्श्वतस्त्वमयक्ष्मया परिभुज स्वाहा।।११।।

ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु व्विश्श्वतः। अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम् स्वाहा।।१२।।

ॐ अवतत्त्य धनुष्ट्वर्ठ० सहस्राक्ष शतेषुधे। निशीर्य्य शल्ल्यानां मुखा शिवो नः सुमना भव स्वाहा।।१३।।

ॐ नमस्त ऽआयुधायानातताय धृष्णवे। उभाब्भ्यामुत ते नमो बाहुब्भ्यान्तव धन्वने स्वाहा।।१४।।

ॐ मा नो महान्तमुत मा नो ऽअर्ब्भकम्मा न ऽउक्षन्तमुत मा न ऽउक्षितम् । मा नो व्वधीः पितरम्मोत मातरम्मा नः प्प्रियास्तन्न्वो रुद्द्र रीरिषः स्वाहा।।१५।।

ॐ मा नस्तोके तनये मा न ऽआयुषि मा नो गोषु मा नो ऽअश्श्वेषु रीरिषः । मा नो व्वीरान् रुद्द्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे स्वाहा।।१६।।

ॐ नमो हिरण्ण्यबाहवे सेनान्न्ये दिशाञ्च पतये नमः स्वाहा।।१७।।

ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः पशूनाम्पतये नमः स्वाहा॥१८॥

ॐ नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमः स्वाहा॥१९॥

ॐ नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमः स्वाहा॥२०॥

ॐ नमो बब्भ्लुशाय व्व्याधिनेऽन्नानाम्पतये नमः स्वाहा॥२१॥

ॐ नमो भवस्य हेत्यै जगताम्पतये नमः स्वाहा॥२२॥

ॐ नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमः स्वाहा॥२३॥

ॐ नमः सूतायाहन्त्यै व्वनानाम्पतये नमः स्वाहा॥२४॥

ॐ नमो रोहिताय स्थपतये व्वृक्षाणाम्पतये नमः स्वाहा॥२५॥

ॐ नमो भुवन्तये व्वारिवस्कृतायौषधीनाम्पतये नमः स्वाहा॥२६॥

ॐ नमो मन्त्रिणे व्वाणिजाय कक्षाणाम्पतये नमः स्वाहा॥२७॥

ॐ नम ऽउच्चैर्ग्घोषायाक्क्रन्दयते पत्तीनाम्पतये नमः स्वाहा॥२८॥

ॐ नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमः स्वाहा॥२९॥

ॐ नमः सहमानाय निव्व्याधिन ऽआव्व्याधिनीनाम्पतये नमः स्वाहा॥३०॥

ॐ नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमः स्वाहा॥३१॥

ॐ नमो निचेरवे परिचरायारण्ण्यानाम्पतये नमः स्वाहा॥३२॥

ॐ नमो व्वञ्चते परिवञ्चते स्तायूनाम्पतये नमः स्वाहा॥३३॥

ॐ नमो निषङ्गिण ऽइषुधिमते तस्कराणाम्पतये नमः स्वाहा॥३४॥

ॐ नमः सृकायिब्भ्यो जिघाᳬसद्भ्यो मुष्णताम्पतये नमः स्वाहा॥३५॥

ॐ नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो व्विकृन्तानाम्पतये नमः स्वाहा॥३६॥

ॐ नम ऽउष्ण्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमः स्वाहा॥३७॥

ॐ नम ऽइषुमद्भ्यो धन्वायिब्भ्यश्च्च वो नमः स्वाहा॥३८॥

ॐ नम ऽआतन्वानेब्भ्यः प्प्रतिदधानेब्भ्यश्च्च वो नमः स्वाहा॥३९॥

ॐ नम ऽआयच्छद्भ्योऽस्यद्भ्यश्च्च वो नमः स्वाहा॥४०॥

ॐ नमो व्विसृजद्भ्यो व्विद्ध्यद्भ्यश्च्च वो नमः स्वाहा॥४१॥

ॐ नमः स्वपद्भ्यो जाग्ग्रद्भ्यश्च्च वो नमः स्वाहा॥४२॥

ॐ नमः शयानेब्भ्य ऽआसीनेब्भ्यश्च्च वो नमः स्वाहा॥४३॥

ॐ नमस्तिष्ठद्‌भ्यो धावद्‌भ्यश्च्च वो नमः स्वाहा॥४४॥

ॐ नमः सभाभ्यः सभापतिभ्यश्च्च वो नमः स्वाहा॥४५॥

ॐ नमोऽश्श्वेभ्योऽश्श्वपतिभ्यश्च्च वो नमः स्वाहा॥४६॥

ॐ नम ऽआव्याधिनीभ्यो व्विविद्ध्यन्तीभ्यश्च्च वो नमः स्वाहा॥४७॥

ॐ नम ऽउगणाभ्यस्तृठं. हतीभ्यश्च्च वो नमः स्वाहा॥४८॥

ॐ नमो गणेभ्यो गणपतिभ्यश्च्च वो नमः स्वाहा॥४९॥

ॐ नमो व्व्रातेभ्यो व्व्रातपतिभ्यश्च्च वो नमः स्वाहा॥५०॥

ॐ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च्च वो नमः स्वाहा॥५१॥

ॐ नमो व्विरूपेभ्यो व्विश्श्वरूपेभ्यश्च्च वो नमः स्वाहा॥५२॥

ॐ नमः सेनाभ्यः सेनानिभ्यश्च्च वो नमः स्वाहा॥५३॥

ॐ नमो रथिभ्यो ऽअरथेभ्यश्च्च वो नमः स्वाहा॥५४॥

ॐ नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च्च वो नमः स्वाहा॥५५॥

ॐ नमो महद्‌भ्यो ऽअर्भकेभ्यश्च्च वो नमः स्वाहा ॥५६॥

ॐ नमस्तक्षभ्यो रथकारेभ्यश्च्च वो नमः स्वाहा ॥५७॥

ॐ नमः कुलालेभ्यः कर्म्मारेभ्यश्च्च वो नमः स्वाहा ॥५८॥

ॐ नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च्च वो नमः स्वाहा ॥५९॥

ॐ नमः श्श्वनिभ्यो मृगयुभ्यश्च्च वो नमः स्वाहा ॥६०॥

ॐ नमः श्श्वभ्यः श्श्वपतिभ्यश्च्च वो नमः स्वाहा॥६१॥

ॐ नमो भवाय च रुद्राय च स्वाहा ॥६२॥

ॐ नमः शर्व्वाय च पशुपतये च स्वाहा॥६३॥

ॐ नमो नीलग्ग्रीवाय च शितिकण्ठाय च स्वाहा॥६४॥

ॐ नमः कपर्द्दिने च व्व्युप्तकेशाय च स्वाहा॥६५॥

ॐ नमः सहस्राक्क्षाय च शतधन्वने च स्वाहा॥६६॥

ॐ नमो गिरिशयाय च शिपिविष्ट्टाय च स्वाहा॥६७॥

ॐ नमो मीढुष्ट्टमाय चेषुमते च स्वाहा॥६८॥

ॐ नमो ह्रस्वाय च व्वामनाय च स्वाहा॥६९॥

ॐ नमो बृहते च व्वर्षीयसे च स्वाहा॥७०॥

ॐ नमो व्वृद्धाय च सवृधे च स्वाहा॥७१॥

ॐ नमोऽग्ग्र्याय च प्प्रथमाय च स्वाहा॥७२॥

ॐ नम ऽआशवे चाजिराय च स्वाहा॥७३॥

ॐ नमः शीग्घ्याय च शीब्भ्याय च स्वाहा॥७४॥
ॐ नम ऽऊम्र्म्याय चावस्वन्न्याय च स्वाहा॥७५॥
ॐ नमो नादेयाय च द्वीप्प्याय च स्वाहा॥७६॥
ॐ नमो ज्ज्येष्ठ्ठाय च कनिष्ठ्ठाय च स्वाहा॥७७॥
ॐ नमः पूर्व्वजाय चापरजाय च स्वाहा॥७८॥
ॐ नमो मद्ध्यमाय चापगल्भाय च स्वाहा॥७९॥
ॐ नमो जघन्न्याय च बुद्ध्न्याय च स्वाहा॥८०॥
ॐ नमः सोब्भ्याय च प्प्रतिसर्य्याय च स्वाहा॥८१॥
ॐ नमो याम्म्याय च क्षेम्म्याय च स्वाहा॥८२॥
ॐ नमः श्श्लोक्क्याय चावसान्न्याय च स्वाहा॥८३॥
ॐ नम ऽउर्व्वर्य्याय च खल्ल्याय च स्वाहा॥८४॥
ॐ नमो व्वन्न्याय च कक्क्ष्याय च स्वाहा॥८५॥
ॐ नमः श्श्रवाय च प्प्रतिश्श्रवाय च स्वाहा॥८६॥
ॐ नम ऽआशुषेणाय चाशुरथाय च स्वाहा॥८७॥
ॐ नमः शूराय चावभेदिने च स्वाहा॥८८॥
ॐ नमो बिल्मिने च कवचिने च स्वाहा॥८९॥
ॐ नमो व्वर्म्मिणे च व्वरूथिने च स्वाहा॥९०॥
ॐ नमः श्श्रुताय च श्श्रुतसेनाय च स्वाहा॥९१॥
ॐ नमो दुन्दुब्भ्याय चाहनन्न्याय च स्वाहा॥९२॥
ॐ नमो धृष्ष्णवे च प्प्रमृशाय च स्वाहा॥९३॥
ॐ नमो निषङ्गिणे चेषुधिमते च स्वाहा॥९४॥
ॐ नमस्तीक्क्ष्णेषवे चायुधिने च स्वाहा॥९५॥
ॐ नमः स्वायुधाय च सुधन्न्वने च स्वाहा॥९६॥
ॐ नमः स्त्रुत्याय च पत्थ्याय च स्वाहा॥९७॥

ॐ नमः काट्याय च नीप्याय च स्वाहा॥९८॥
ॐ नमः कुल्ल्याय च सरस्याय च स्वाहा॥९९॥
ॐ नमो नादेयाय च व्वैशन्ताय च स्वाहा॥१००॥
ॐ नमः कूप्याय चावट्याय च स्वाहा॥१०१॥
ॐ नमो व्वीद्ध्याय चातप्याय च स्वाहा॥१०२॥
ॐ नमो मेग्घ्याय च व्विद्युत्याय च स्वाहा॥१०३॥
ॐ नमो व्वर्ष्याय चावर्ष्याय च स्वाहा॥१०४॥
ॐ नमो व्वात्याय च रेष्म्याय च स्वाहा॥१०५॥
ॐ नमो व्वास्तव्याय च व्वास्तुपाय च स्वाहा॥१०६॥
ॐ नमः सोमाय च रुद्राय च स्वाहा॥१०७॥
ॐ नमस्ताम्म्राय चारुणाय च स्वाहा॥१०८॥
ॐ नमः शङ्गवे च पशुपतये च स्वाहा॥१०९॥
ॐ नम ऽउग्ग्राय च भीमाय च स्वाहा॥११०॥
ॐ नमोऽग्ग्रेवधाय च दूरेवधाय च स्वाहा॥१११॥
ॐ नमो हन्त्रे च हनीयसे च स्वाहा॥११२॥
ॐ नमो व्वृक्षेब्भ्यो हरिकेशेब्भ्यः स्वाहा॥११३॥
ॐ नमस्ताराय स्वाहा॥११४॥
ॐ नमः शम्भवाय च मयोभवाय च स्वाहा॥११५॥
ॐ नमः शङ्कराय च मयस्कराय च स्वाहा॥११६॥
ॐ नमः शिवाय च शिवतराय च स्वाहा॥११७॥
ॐ नमः पार्य्याय चावार्य्याय च स्वाहा॥११८॥
ॐ नमः प्प्रतरणाय चोत्तरणाय च स्वाहा॥११९॥
ॐ नमस्तीर्त्थ्याय च कूल्ल्याय च स्वाहा॥१२०॥
ॐ नमः शष्प्याय च फेन्न्याय च स्वाहा॥१२१॥

ॐ नमः सिकत्त्याय च प्रवाह्याय च स्वाहा॥१२२॥

ॐ नमः किर्ठ. शिलाय च क्षयणाय च स्वाहा॥१२३॥

ॐ नमः कपर्द्दिने च पुलस्तये च स्वाहा॥१२४॥

ॐ नम ऽइरिण्ण्याय च प्रपत्थ्याय च स्वाहा॥१२५॥

ॐ नमो व्व्रज्ज्याय च गोष्ठ्याय च स्वाहा॥१२६॥

ॐ नमस्तल्प्याय च गेह्याय च स्वाहा॥१२७॥

ॐ नमो हृदय्याय च निवेष्प्याय च स्वाहा॥१२८॥

ॐ नमः काट्ट्याय च गह्वरेष्ठाय च स्वाहा॥१२९॥

ॐ नमः शुष्क्क्याय च हरित्त्याय च स्वाहा॥१३०॥

ॐ नमः पाᳬसव्व्याय च रजस्याय च स्वाहा॥१३१॥

ॐ नमो लोप्प्याय चोलप्प्याय च स्वाहा॥१३२॥

ॐ नम ऽऊर्व्व्याय च सूर्व्व्याय च स्वाहा॥१३३॥

ॐ नमः पर्ण्णाय च पर्ण्णशदाय च स्वाहा॥१३४॥

ॐ नम ऽउद्गुरमाणाय चाभिग्घ्नते च स्वाहा॥१३५॥

ॐ नम ऽआखिदते च प्रखिदते च स्वाहा॥१३६॥

ॐ नम ऽइषुकृद्ब्भ्यो धनुष्कृद्ब्भ्यश्च्च वो नमः स्वाहा॥१३७॥

ॐ नमो वः किरिकेब्भ्यो देवानाᳬ हृदयेब्भ्यः स्वाहा॥१३८॥

ॐ नमो व्विचिन्वत्केब्भ्यो देवानाᳬ हृदयेब्भ्यः स्वाहा॥१३९॥

ॐ नमो व्विक्षिणत्केब्भ्यो देवानाᳬ हृदयेब्भ्यः स्वाहा॥१४०॥

ॐ नम ऽआनिर्हतेब्भ्यो देवानाᳬ हृदयेब्भ्यः स्वाहा॥१४१॥

ॐ द्रापे ऽअन्धसस्पते दरिद्र नीललोहित। आसाम्प्रजाना-मेषाम्पशूनाम्मा भेर्म्मा रोङ् मो च नः किञ्चनाममत् स्वाहा॥१४२॥

ॐ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा शमसद् द्विपदे चतुष्पदे विश्श्वम्पुष्टं ग्रामे ऽअस्मिन्ननातुरम् स्वाहा॥१४३॥

ॐ या ते रुद्र शिवा तनूः शिवा विश्श्वाहा भेषजी।
शिवा रुतस्य भेषजी तया नो मृड जीवसे स्वाहा॥१४४॥

ॐ परि नो रुद्द्रस्य हेतिर्व्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः।
अव स्त्थिरा मघवद्भ्भ्यस्तनुष्व मीड्ढ्वस्तोकाय तनयाय मृड स्वाहा॥१४५॥

ॐ मीढुष्टम शिवतम शिवो नः सुमना भव। परमे व्वृक्ष ऽआयुधन्निधाय कृतिं व्वसान ऽआचर पिनाकम्बिब्भ्रदागहि स्वाहा॥१४६॥

ॐ व्विकिरिद्र व्विलोहित नमस्ते ऽअस्तु भगवः।
यास्ते सहस्रठं. हेतयोऽन्न्यमस्म्मन्निवपन्तु ताः स्वाहा॥१४७॥

ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः।
तासामीशानो भगवः पराचीना मुखा कृधि स्वाहा॥१४८॥

ॐ असङ्ख्याता सहस्राणि ये रुद्रा ऽअधि भूम्म्याम्।
तेषाᳬ सहस्रयोजने ऽव धन्वानि तन्मसि स्वाहा॥१४९॥

ॐ अस्म्मिन्म्महत्यण्णर्वेऽन्तरिक्षे भवा ऽअधि।
तेषाᳬ सहस्रयोजनेऽव धन्वानि तन्मसि स्वाहा॥१५०॥

ॐ नीलग्ग्रीवाः शितिकण्ठाः दिवर्ठ. रुद्रा ऽउपश्श्रिताः।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५१।।
ॐ नीलग्ग्रीवाः शितिकण्ठाः शर्व्वा ऽअधः क्षमाचराः।
तेषार्ठ० सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५२।।
ॐ ये व्वृक्षेषु शष्प्पिञ्जरा नीलग्ग्रीवा व्विलोहिताः।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५३।।
ॐ ये भूतानामधिपतयो व्विशिखासः कपर्द्दिनः।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५४।।
ॐ ये पथाम्पथिरक्षय ऽऐलवृदा ऽआयुर्य्युधः।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५५।।
ॐ ये तीर्त्थानि प्प्रचरन्ति सृकाहस्ता निषङ्गिणः।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५६।।
ॐ येऽन्नेषु व्विविद्ध्यन्ति पात्रेषु पिबतो जनान्।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५७।।
ॐ य ऽएतावन्तश्च भूयाꣳसश्च्च दिशो रुद्द्रा व्वितस्त्थिरे।
तेषाꣳ सहस्त्रयोजनेऽव धन्वानि तन्मसि स्वाहा।।१५८।।

ॐ नमोऽस्तु रुद्द्रेब्भ्यो ये दिवि येषां व्वर्षमिषवः। तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वाः। तेब्भ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्म्मो यश्च्च नो द्वेष्ट्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा।।१५९।।

ॐ नमोऽस्तु रुद्द्रेब्भ्यो येऽन्तरिक्षे येषां व्वात ऽइषवः। तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वाः।

तेब्भ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा॥१६०॥

ॐ नमोऽस्तु रुद्द्रेब्भ्यो ये पृथिव्यां येषामन्नमिषवः। तेब्भ्यो दश प्प्राचीर्द्दश दक्षिणा दश प्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वाः। तेब्भ्यो नमो ऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च्च नो द्वेष्टि तमेषाञ्जम्भे दद्ध्मः स्वाहा॥१६१॥

शान्त्यध्यायः

ऋचं व्वाचं प्रपद्द्ये मनो यजुः प्प्रपद्द्ये साम प्प्राणं प्रपद्द्ये चक्षुः श्श्रोत्रं प्रपद्द्ये। व्वागोजः सहौजो मयि प्प्राणापानौ स्वाहा॥१॥ यन्मे च्छिद्द्रं चक्षुषो हृदयस्य मनसो व्वातितृण्णं बृहस्प्पतिर्म्मे तद्दधातु। शं नो भवतु भुवनस्य यस्प्पतिः स्वाहा॥२॥ भूर्ब्भुवः स्वः तत्सवितुर्व्वरेण्यं भर्ग्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् स्वाहा॥३॥ कया नश्चित्र ऽआभुवदूती सदावृधः सखा। कया शचिष्ठया व्वृता स्वाहा॥४॥ कस्त्वा सत्यो मदानाम् मꣳहिष्ठो मत्सदन्धसः। दृढा चिदारुजे व्वसु॥५॥ अभीषुणः सखीनामविता जरितॄणाम्। शतं भवास्यूतिभिः स्वाहा॥६॥

कया त्वं न ऽऊत्याभि प्प्रमन्दसे व्वृषन्। कया स्तोतृब्भ्य ऽआभर स्वाहा॥७॥ इन्द्रो व्विश्श्वस्य राजति। शं नो ऽअस्तु द्विपदे शं चतुष्प्पदे स्वाहा॥८॥ शं नो मित्रः शं व्वरुणः शं नो भवत्त्वर्य्यमा। शं न ऽइन्द्रो बृहस्प्पतिः शं नो व्विष्णुरुरुक्क्रमः स्वाहा॥९॥ शं नो

व्वातः पवताᳯं शं नस्तपतु सूर्य्यः। शं नुः कनिक्रदद्देवः पुर्ज्जन्न्यो ऽअुभिवर्षतु स्वाहा॥१०॥

अहानि शं भवन्तु नुः शᳯं रात्रीः प्रतिधीयताम्। शं न ऽइन्द्राग्नी भवतामवोभिः शं नु ऽइन्द्रावरुणा रातहव्व्या। शं न ऽइन्द्रापूषणा व्वाजसातौ शमिन्द्रासोमा सुवितायु शं य्योः स्वाहा॥११॥ शं नो देवीरभिष्ष्टय ऽआपो भवन्तु पीतये। शं य्योरभिस्रवन्तु नः स्वाहा॥१२॥स्योना पृथिवि नो भवान्नृक्षरा निवेशनी। यच्छा नुः शर्म्म सुप्रथाः स्वाहा॥१३॥ आपो हि ष्ठा मयोभुवस्ता न ऽऊर्ज्जे दधातन। मुहे रणाय चक्षसे स्वाहा॥१४॥ यो वः शिवतमो रसुस्तस्य भाजयतेह नः। उशतीरिव मातरः स्वाहा॥१५॥ तस्म्मा ऽअरं गमाम वो यस्य क्षयाय जिन्न्वथ। आपो जुनयथा च नः स्वाहा॥१६॥

द्यौः शान्तिरन्तरिक्षᳯं शान्तिः पृथिवी शान्ति-रापः शान्तिरोषधयः शान्तिः। व्वनस्प्पतयः शान्तिर्व्विश्श्वे देवाः शान्तिर्ब्ब्रह्म शान्तिः सर्व्वᳯं शान्तिःशान्तिरेव शान्तिः सा मा शान्तिरेधि स्वाहा॥१७॥

दृते दृᳯंह मा मित्रस्य मा चक्षुषा सर्व्वाणि भूतानि समीक्षन्ताम्। मित्रस्याऽहं चक्षुषा सर्व्वाणि भूतानि समीक्षे।मित्रस्य चक्षुषा समीक्षामहे स्वाहा॥१८॥ दृते दृᳯंह मा। ज्योक्क्ते संदृशि जीव्यासं ज्योक्क्ते संदृशि जीव्यासम् स्वाहा॥१९॥ नमस्ते हरसे शोचिषे नमस्ते ऽअस्त्वर्च्चिषे। अन्न्याँस्ते ऽअस्म्मत्तपन्तु हेतयः पावको

ऽअस्म्मभ्यꣳ शिवो भव स्वाहा॥२०॥ नमस्ते ऽअस्तु व्विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे स्वाहा॥२१॥

यतो यतः समीहसे ततो नो ऽअभयं कुरु। शं नः कुरु प्प्रजाभ्योऽभयं नः पशुब्भ्यः स्वाहा॥२२॥ सुमित्त्रिया न ऽआपऽओषधयः सन्तु दुर्म्मित्त्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च व्वयं द्विष्मः स्वाहा॥२३॥ तच्चक्षुर्द्देवहितं पुरस्ताच्छुक्क्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्ब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् स्वाहा॥२४॥

स्वस्ति-प्रार्थनामन्त्राध्यायः

स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्श्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्प्पतिर्द्दधातु॥१॥ ॐ पयः पृथिव्व्याम् पय ऽओषधीषु पयो दिव्व्यन्तरिक्षे पयो धाः। पयस्वतीः प्प्रदिशः सन्तु मह्यम्॥२॥ॐ व्विष्णो रराटमसि व्विष्णोः श्नप्त्रे स्त्थो व्विष्णोः स्यूरसि व्विष्णोर्द्ध्रुवोऽसि। व्वैष्णवमसि व्विष्णवे त्त्वा॥३॥ ॐ अग्निर्द्देवता व्वातो देवता सूर्य्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता व्विश्श्वेदेवा देवता बृहस्प्पतिर्द्देवतेन्द्रो देवता व्वरुणो देवता॥४॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः॥५॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥६॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते ऽअस्तु रुद्ररूपेभ्यः॥७॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥८॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे ऽअस्तु सदाशिवोम्॥९॥ ॐ शिवो नामासि स्वधितिस्ते पिता नमस्ते ऽअस्तु मा मा हिꣳसीः। निवर्त्तयाम्यायुषे ऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय॥१०॥ ॐ विश्श्वानि देवसवितर्दुरितानि परासुव। यद्भद्रं तन्न ऽआसुव॥११॥ ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्व्विश्श्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व्वꣳ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि॥१२॥

ॐ सर्व्वेषां वा ऽएष व्वेदानाꣳ रसो यत्साम सर्व्वेषामेवैनेमतद्वेदानाꣳ रसेनाभिषिञ्चति॥१३॥

ॐ शान्तिः, शान्तिः, शान्तिः, सुशान्तिर्भवतु। सर्वारिष्टशान्तिर्भवतु।

इति रुद्राष्टाध्याय्यां स्वस्तिप्रार्थनामन्त्राध्यायः॥२॥

अथ शिवसहस्रनामावलिः

१. ॐ स्थिराय नमः
२. ॐ स्थाणवे नमः
३. ॐ प्रभवे नमः
४. ॐ भीमाय नमः
५. ॐ प्रवराय नमः
६. ॐ वरदाय नमः
७. ॐ वराय नमः
८. ॐ सर्वात्मने नमः
९. ॐ सर्व्वविख्याताय नमः
१०. ॐ सर्व्वस्मै नमः
११. ॐ सर्व्वकराय नमः
१२. ॐ भवाय नमः
१३. ॐ जटिने नमः
१४. ॐ चर्म्मिणे नमः
१५. ॐ शिखण्डिने नमः
१६. ॐ सर्व्वाङ्गाय नमः
१७. ॐ सर्व्वभावनाय नमः
१८. ॐ हराय नमः
१९. ॐ हरिणाक्षाय नमः
२०. ॐ सर्व्वभूतहराय नमः
२१. ॐ प्रभवे नमः
२२. ॐ प्रवृत्तये नमः
२३. ॐ निवृत्ताय नमः
२४. ॐ नियताय नमः
२५. ॐ शाश्वताय नमः
२६. ॐ ध्रुवाय नमः
२७. ॐ श्मशानवासिने नमः
२८. ॐ भगवते नमः
२९. ॐ खचराय नमः
३०. ॐ गोचराय नमः
३१. ॐ अर्द्दनाय नमः
३२. ॐ अभिवाद्याय नमः
३३. ॐ महाकर्म्मणे नमः
३४. ॐ तपस्विने नमः
३५. ॐ भूतभावनाय नमः
३६. ॐ उन्मत्तवेषप्रच्छान्नाय नमः
३७. ॐ सर्व्वलोकप्रजापतेय नमः
३८. ॐ महारूपाय नमः
३९. ॐ महाकायाय नमः
४०. ॐ वृषरूपाय नमः
४१. ॐ महायशसे नमः
४२. ॐ महात्मने नमः
४३. ॐ सर्व्वभूतात्मने नमः
४४. ॐ विश्वरूपाय नमः
४५. ॐ महाहनवे नमः
४६. ॐ लोकपालाय नमः
४७. ॐ अन्तर्हितात्मने नमः
४८. ॐ प्रसादाय नमः
४९. ॐ हयगर्दभये नमः
५०. ॐ पवित्राय नमः
५१. ॐ महते नमः
५२. ॐ नियमाय नमः
५३. ॐ नियमाश्रिताय नमः
५४. ॐ सर्व्वकर्म्मणे नमः

५५. ॐ स्वयम्भूताय नमः
५६. ॐ आदये नमः
५७. ॐ आदिकराय नमः
५८. ॐ निधये नमः
५९. ॐ सहस्राक्षाय नमः
६०. ॐ विशालाक्षाय नमः
६१. ॐ सोमय नमः
६२. ॐ नक्षत्रसाधकाय नमः
६३. ॐ चन्द्राय नमः
६४. ॐ सूर्य्याय नमः
६५. ॐ शनये नमः
६६. ॐ केतवे नमः
६७. ॐ ग्रहाय नमः
६८. ॐ ग्रहपतये नमः
६९. ॐ वराय नमः
७०. ॐ अत्रये नमः
७१. ॐ अत्र्यानमस्कर्त्रे नमः
७२. ॐ मृगवाणार्प्यणाय नमः
७३. ॐ अनघाय नमः
७४. ॐ महातपसे नमः
७५. ॐ घोरतपसे नमः
७६. ॐ अदीनाय नमः
७७. ॐ दीनसाधकाय नमः
७८. ॐ सँव्वत्सरकराय नमः
७९. ॐ मन्त्राय नमः
८०. ॐ प्रमाणाय नमः
८१. ॐ परमायतपसे नमः
८२. ॐ योगिने नमः
८३. ॐ योज्याय नमः
८४. ॐ महाबीजाय नमः
८५. ॐ महारेतसे नमः
८६. ॐ महाबलाय नमः
८७. ॐ सुवर्णरितसे नमः
८८. ॐ सर्व्वज्ञाय नमः
८९. ॐ सुबीजाय नमः
९०. ॐ बीजवाहनाय नमः
९१. ॐ दशवाहवे नमः
९२. ॐ अनिमिषाय नमः
९३. ॐ नीलकण्ठाय नमः
९४. ॐ उमापतये नमः
९५. ॐ विश्वरूपाय नमः
९६. ॐ स्वयंश्रेष्ठाय नमः
९७. ॐ बलबीराय नमः
९८. ॐ अबंलगणाय नमः
९९. ॐ गणकर्त्रे नमः
१००. ॐ गणपतये नमः
१०१. ॐ दिग्वाससे नमः
१०२. ॐ कामाय नमः
१०३. ॐ मन्त्रविदे नमः
१०४. ॐ परममन्त्राय नमः
१०५. ॐ सर्व्वभवकराय नमः
१०६. ॐ हराय नमः
१०७. ॐ कमण्डलुधराय नमः
१०८. ॐ धन्विने नमः
१०९. ॐ बाणहसताय नमः
११०. ॐ कपालवेत नमः
१११. ॐ अशनिने नमः
११२. ॐ शतघ्निने नमः

११३. ॐ खड्गिने नमः
११४. ॐ पट्टिशिने नमः
११५. ॐ आयुधिने नमः
११६. ॐ महते नमः
११७. ॐ स्रुवहस्ताय नमः
११८. ॐ सुरूपाय नमः
११९. ॐ तेजसे नमः
१२०. ॐ तेजस्करनिधये नमः
१२१. ॐ उष्णीषिणे नमः
१२२. ॐ सुवक्त्राय नमः
१२३. ॐ उदग्राय नमः
१२४. ॐ विनताय नमः
१२५. ॐ दीर्घाय नमः
१२६. ॐ हरिकेशाय नमः
१२७. ॐ सुतीर्त्थाय नमः
१२८. ॐ कृष्णाय नमः
१२९. ॐ सृगालरूपाय नमः
१३०. ॐ सिद्धत्र्थाय नमः
१३१. ॐ मुण्डाय नमः
१३२. ॐ सर्व्वशुभंकराय नमः
१३३. ॐ अजाय नमः
१३४. ॐ बहुरूपाय नमः
१३५. ॐ गन्धधारिणे नमः
१३६. ॐ कपिर्द्दिने नमः
१३७. ॐ ऊर्द्धवरितसे नमः
१३८. ॐ उर्द्धलिङ्गाय नमः
१३९. ॐ उर्ध्वशायिने नमः
१४०. ॐ नभस्थलाय नमः
१४१. ॐ त्रिजटिनेय नमः
१४२. ॐ चीरवाससे नमः
१४३. ॐ रुद्राय नमः
१४४. ॐ सेनापतये नमः
१४५. ॐ विभवे नमः
१४६. ॐ अहश्चराय नमः
१४७. ॐ नक्तंचराय नमः
१४८. ॐ तिग्ममन्यवे नमः
१४९. ॐ सुवर्च्चसाय नमः
१५०. ॐ गजघ्ने नमः
१५१. ॐ दैत्यघ्ने नमः
१५२. ॐ कालाय नमः
१५३. ॐ लोकधात्रे नमः
१५४. ॐ गुणाकराय नमः
१५५. ॐ सिंहशार्द्दूलरूपाय नमः
१५६. ॐ आदर्द्रचर्म्भाम्बरावृताय नमः
१५७. ॐ कालयोगिने नमः
१५८. ॐ महानादाय नमः
१५९. ॐ सर्व्वकामाय नमः
१६०. ॐ चतुष्पथाय नमः
१६१. ॐ निशाचराय नमः
१६२. ॐ प्रेतचारिणे नमः
१६३. ॐ भूतचारिणे नमः
१६४. ॐ महेश्वराय नमः
१६५. ॐ बहुभूताय नमः
१६६. ॐ बहुधराय नमः
१६७. ॐ स्वर्भानवे नमः
१६८. ॐ अमिताय नमः
१६९. ॐ गतये नमः

१७०. ॐ नृत्यप्रियाय नमः
१७१. ॐ नित्यनर्त्ताय नमः
१७२. ॐ नर्त्तकाय नमः
१७३. ॐ सर्व्वलालसाय नमः
१७४. ॐ घोराय नमः
१७५. ॐ महातपसे नमः
१७६. ॐ पाशाय नमः
१७७. ॐ नित्याय नमः
१७८. ॐ गिरिरूहाय नमः
१७९. ॐ नभसे नमः
१८०. ॐ सहस्रहस्ताय नमः
१८१. ॐ विजयाय नमः
१८२. ॐ व्यवसाय नमः
१८३. ॐ अतन्द्रिताय नमः
१८४. ॐ अधर्ष्षणाय नमः
१८५. ॐ धर्ष्षणात्मने नमः
१८६. ॐ यज्ञघ्ने नमः
१८७. ॐ कामनासकाय नमः
१८८. ॐ दक्षयागापहारिणे नमः
१८९. ॐ सुसहाय नमः
१९०. ॐ मध्यमाय नमः
१९१. ॐ तेजोपहारिणे नमः
१९२. ॐ बलघ्ने नमः
१९३. ॐ मुदिताय नमः
१९४. ॐ अर्त्थाय नमः
१९५. ॐ अजिताय नमः
१९६. ॐ अवराय नमः
१९७. ॐ गम्भीराय नमः
१९८. ॐ गभीराय नमः
१९९. ॐ गम्भीरबलवाहनाय नमः
२००. ॐ न्यग्रोधरूपाय नमः
२०१. ॐ न्यग्रोधाय नमः
२०२. ॐ वृक्षकर्ण्णस्थितये नमः
२०३. ॐ विभवे नमः
२०४. ॐ सुतीक्ष्णदशनाय नमः
२०५. ॐ महाकायाय नमः
२०६. ॐ महाननाय नमः
२०७. ॐ विष्वक्सेनाय नमः
२०८. ॐ हरये नमः
२०९. ॐ यज्ञाय नमः
२१०. ॐ संय्युगापीडवाहनाय नमः
२११. ॐ तीक्ष्णतापाय नमः
२१२. ॐ हर्य्यश्वाय नमः
२१३. ॐ सहायाय नमः
२१४. ॐ कर्म्मकालविदे नमः
२१५. ॐ विष्णुप्रसाविताय नमः
२१६. ॐ यज्ञाय नमः
२१७. ॐ समुद्राय नमः
२१८. ॐ वडवामुखाय नमः
२१९. ॐ हुताशनसहायाय नमः
२२०. ॐ प्रशान्तात्मने नमः
२२१. ॐ हुताशनाय नमः
२२२. ॐ उग्रतेजसे नमः
२२३. ॐ महातेजसे नमः
२२४. ॐ जन्याय नमः
२२५. ॐ विजयकालविदे नमः
२२६. ॐ ज्योतिषामयनाय नमः
२२७. ॐ सिद्धये नमः

२२८. ॐ सर्व्वविग्रहाय नमः
२२९. ॐ शिखिने नमः
२३०. ॐ मुण्डिने नमः
२३१. ॐ जटिने नमः
२३२. ॐ ज्वालिने नमः
२३३. ॐ मूर्तिजाय नमः
२३४. ॐ मूर्द्धगाय नमः
२३५. ॐ बलिने नमः
२३६. ॐ वेणविने नमः
२३७. ॐ पणविने नमः
२३८. ॐ तालिने नमः
२३९. ॐ खलिने नमः
२४०. ॐ कालकटङ्कटाय नमः
२४१. ॐ नक्षत्रविग्रहमतये नमः
२४२. ॐ गुणबुद्धये नमः
२४३. ॐ लयाय नमः
२४४. ॐ अगमाय नमः
२४५. ॐ प्रजापतये नमः
२४६. ॐ विश्ववाहवे नमः
२४७. ॐ विभगााय नमः
२४८. ॐ सर्व्वगाय नमः
२४९. ॐ अमुखाय नमः
२५०. ॐ विमोचनाय नमः
२५१. ॐ सुसरणाय नमः
२५२. ॐ हिरण्यकवचोद्भवाय नमः
२५३. ॐ मेढ्रजाय नमः
२५४. ॐ बलचारिणे नमः
२५५. ॐ महीचारिणे नमः
२५६. ॐ स्रुताय नमः
२५७. ॐ सर्व्वतूर्य्यनिनाविने नमः
२५८. ॐ सर्व्वतोद्यपरिग्रहाय नमः
२५९. ॐ व्यालरूपाय नमः
२६०. ॐ गुहावासिने नमः
२६१. ॐ गुहाय नमः
२६२. ॐ मालिने नमः
२६३. ॐ तरङ्गविदे नमः
२६४. ॐ त्रिदशाय नमः
२६५. ॐ त्रिकालधृषे नमः
२६६. ॐ कर्म्मसर्व्वबन्धविमोचनाय नमः
२६७. ॐ असुरेन्द्राणाम्बन्धनाय नमः
२६८. ॐ युधिशत्रुविनाशनाय नमः
२६९. ॐ साङ्ख्यप्रसादाय नमः
२७०. ॐ दुर्व्वाससे नमः
२७१. ॐ सर्व्वसाधुनिषेविताय नमः
२७२. ॐ प्रसकन्दनाय नमः
२७३. ॐ विभागाज्ञाय नमः
२७४. ॐ अतुल्याय नमः
२७५. ॐ यज्ञविभागविदे नमः
२७६. ॐ सर्व्ववासाय नमः
२७७. ॐ सर्व्वचारिणे नमः
२७८. ॐ दुर्व्वाससे नमः
२७९. ॐ वासवाय नमः
२८०. ॐ अमराय नमः
२८१. ॐ हैमाय नमः
२८२. ॐ हेमकराय नमः

२८३. ॐ अयज्ञाय नमः
२८४. ॐ सर्व्वधारिणे नमः
२८५. ॐ धरोत्तमाय नमः
२८६. ॐ लोहिताक्षाय नमः
२८७. ॐ महाक्षाय नमः
२८८. ॐ विजयाक्षाय नमः
२८९. ॐ विशारदाय नमः
२९०. ॐ सङ्ग्रहाय नमः
२९१. ॐ निग्रहाय नमः
२९२. ॐ कर्त्रे नमः
२९३. ॐ सर्प्पचीरनिवासनाय नमः
२९४. ॐ मुख्याय नमः
२९५. ॐ अमुख्याय नमः
२९६. ॐ देहाय नमः
२९७. ॐ काहलये नमः
२९८. ॐ सर्व्वकामदाय नमः
२९९. ॐ सर्व्वकालप्रसादाय नमः
३००. ॐ सुबलाय नमः
३०१. ॐ बलरूपधृषे नमः
३०२. ॐ सर्वकामवराय नमः
३०३. ॐ सर्व्वदाय नमः
३०४. ॐ सर्व्वतोमुखाय नमः
३०५. ॐ आकाशनिर्व्विरूपाय नमः
३०६. ॐ निपातिने नमः
३०७. ॐ अवशाय नमः
३०८. ॐ खगाय नमः
३०९. ॐ रौद्ररूपाय नमः
३१०. ॐ अंशवे नमः
३११. ॐ आदित्याय नमः
३१२. ॐ बहुरश्मये नमः
३१३. ॐ सुवर्च्चस्विने नमः
३१४. ॐ वसुवेगाय नमः
३१५. ॐ महावेगाय नमः
३१६. ॐ मनोवेगाय नमः
३१७. ॐ निशाचराय नमः
३१८. ॐ सर्व्ववासिने नमः
३१९. ॐ उपदेकराय नमः
३२०. ॐ उपदेशकराय नमः
३२१. ॐ अकाराय नमः
३२२. ॐ मुनये नमः
३२३. ॐ आत्मनिरालोकाय नमः
३२४. ॐ सम्भग्नाय नमः
३२५. ॐ सहस्त्रदाय नमः
३२६. ॐ पक्षिणे नमः
३२७. ॐ पक्षरूपाय नमः
३२८. ॐ अतिदीप्ताय नमः
३२९. ॐ विशाम्पतये नमः
३३०. ॐ उन्मादाय नमः
३३१. ॐ मदनाय नमः
३३२. ॐ कामाय नमः
३३३. ॐ अश्वत्थाय नमः
३३४. ॐ अर्थकराय नमः
३३५. ॐ यशसे नमः
३३६. ॐ वामदेवाय नमः
३३७. ॐ वामाय नमः
३३८. ॐ प्राचे नमः
३३९. ॐ दक्षिणाय नमः

३४०. ॐ वामनाय नमः
३४१. ॐ सिद्धयोगिने नमः
३४२. ॐ महर्षये नमः
३४३. ॐ सिद्धार्थाय नमः
३४४. ॐ सिद्धासाधकाय नमः
३४५. ॐ भिक्षवे नमः
३४६. ॐ भिक्षुरूपाय नमः
३४७. ॐ विपणाय नमः
३४८. ॐ मृदवे नमः
३४९. ॐ अव्ययाय नमः
३५०. ॐ महासेनाय नमः
३५१. ॐ विशाखाय नमः
३५२. ॐ षष्टिभागाय नमः
३५३. ॐ गवाम्मतये नमः
३५४. ॐ वज्रहसताय नमः
३५५. ॐ विष्कम्भिने नमः
३५६. ॐ चमूस्तम्भनाय नमः
३५७. ॐ वृत्तावृत्तकराय नमः
३५८. ॐ तालाय नमः
३५९. ॐ मधवे नमः
